बडवासुतो बाडवः । कुङ्खो कुञ्चा । कौञ्चः । कौकिलः । भूमी-सपत्नी-गोपिका-गोपालिकादेस्तु शिवाद्यणेव ।

६२. द्व्यचः । ४-१-१२१ ॥

द्व्यज्भ्यः स्त्रीशब्देभ्योऽपत्ये ढक् स्यात् । 'अवृद्धाभ्य': - (४-१-११३) इत्यणोऽपवादः । दत्ताख्यायाः पुत्रो दात्तेयः । गौत्तेयः । ऐलः पार्थश्च शिवादिः । नदीभ्यस्तु 'द्व्यचो नद्याः' इति शिवादिपाठादणेव । नीलासुतो नैलः । तौङ्गः । भाद्रः ।

६३. **इतश्चानिञः** । ४-१-१२२ ॥

अनिञन्ताद्ध्यच इदन्तादल्लीलिङ्गादपि ढक् । आत्रेयः । वार्ष्णेयः । गाधेयः । गाधिरिदन्तोऽप्यस्तीति शङ्करः । भूमेः शिवादित्वात् भौमः । इञस्तु दाक्षेरपत्यं दाक्षायणः इति फगेव । ध्यच इत्युक्तेः मारीच इत्यणेव । शाकुन्तेयस्तु शुभ्रादिः ।

६४. **शुभ्रादिभ्यश्च** । ४-१-१२३ ॥

एभ्योऽपत्ये ढक् । शुभ्रस्य शौभ्रेयः । श्वन् । 'नस्तद्धिते' (६-४-१४४) इति टिलोपः । द्वारादित्वादैच् । शौवेयः । मृकण्डोः ढे लोपः । मार्कण्डेयः । अदन्तान्मृकण्डाद्दृष्यणि मार्कण्डोऽपीति नाथः । शुकजीवयोः शौकेयः । जैवेयः । विभिन्नमातृजो वैमात्रेयः । द्वैमात्रेय इति वृत्तौ ।

शुभ्रादित्वेन गाङ्गेयो गाङ्गश्चापि शिवाद्यणि ।
गाङ्गायनिस्तिकादित्वादिति गङ्गा लिरूपिणी ॥

पाण्डोश्शुभ्रशिवाद्युक्तेः पाण्डवेयश्च पाण्डवः ।
पाण्ड्वादीनां च ढे लोपो नेति वार्तिककीर्तितम् ॥

जिह्वाशिन् इत्यस्य दाण्डिनाद्युक्त्या टिलोपाभावः । जैह्वाशिनेयः ।

६५. **प्रवाहणस्य ढे** । ७-३-२८ ॥

अस्य ढकि परे पूर्वपदस्य वा वृद्धिः । उत्तरपदस्य नित्यं स्यात् । प्रावाहणेयः । प्रवाहणेयः ।

६६. **तत्प्रत्ययस्य च** । ७-३-२९ ॥

ढक्प्रत्ययान्तस्यास्य वृद्धिनिमित्तप्रत्ययान्तरे परेऽपि पूर्वपदस्य वृद्धिर्वा स्यात् । प्रावाहणेयिः । प्रवाहणेयिः । गोलाद्यूनि अत इञ् अयम् ।

६७. **विकर्णकुषीतकात्काश्यपे** । ४-१-१२४ ॥

काश्यपे दत्तपुत्रे वैकर्णेयः । कौषीतकेयः । स्वपुत्रे वैकर्णिः । कौषीतकिः ।

६८. **भ्रुवो वुक् च** । ४-१-१२५ ॥

भ्रूव् एय् । वृद्धिः । भ्रौवेयः । भ्रूर्नाम काचित् ।

६९. **कल्याण्यादीनामिनङ् च** । ४-१-१२६ ॥

एषां ढक् । इनङ् चान्तादेशः । कालयाणिनेयः ।

७०. **हृद्भगसिन्ध्वन्ते पूर्वपदस्य च** । ७-३-१९ ॥

एतदन्तेषु शब्देषु वृद्धिहेतुतद्धिते परे पूर्वोत्तरपदयोर्वृद्धिः स्यात् । सुभगापुत्रः सौभागिनेयः । दौर्भागिनेयः । परस्त्रियाः इनङि परस्त्रिन् एय् । अनुशतिकादित्वादुभयपदवृद्धिः । पारस्त्रैणेयः । एवं बन्धकी-जरती-बलीवर्दी-ज्येष्ठा-कनिष्ठा-मध्यमादेः ।

७१. कुलटाया वा । ४-१-१२७ ॥

अस्या अपत्ये ढकि इनङ् वा स्यात् । कौलटिनेयः । कौलटेयः । भिक्षार्थं कुलान्यटन्त्या एवम् । पुंश्चल्यर्थात्तु 'क्षुद्राभ्यो वा' (४-१-१३१) इति ढकि कौलटेरोऽपि ।

७२. चटकाया ऐरक् । ४-१-१२८ ॥

चटकाचेति वाच्यम् ।

चटकायाः चटकस्य वा पुत्रः चाटकैरः ।

स्त्र्यपत्ये लुग्वाच्यः ।

द्वयोः पुत्री चटका ।

७३. गोधाया ढ्रक् । ४-१-१२९ ॥

ढमात्रस्य एय् । गोधा एय् र । 'लोपो व्योः' (६-१-६६) इति यलोपः । गोधा एर । वृद्धिः । 'यस्येति च' (६-४-१४८) गौधेरः । शुभ्रादित्वात् ढकि गौधेयोऽपि ।

७४. आरगुदीचाम् । ४-१-१३० ॥

तन्मते गोधाया आरक् स्यात् । गौधारः । आरगन्येभ्योऽपीष्यते । पण्डः क्लीबः । तत्पुत्रः पाण्डारः । जडस्य जाडारः ।

७५. क्षुद्राभ्यो वा । ४-१-१३१ ॥

अङ्गहीना व्यभिचारिण्यश्च स्त्रियः क्षुद्राः । तद्वाचिभ्यः अपत्ये वा ढ्रक् । काणेरः । काणेयः । दासेरः । दासेयः । नट्या नाटेरः । नाटेयः । आरगन्येभ्योऽपि इति नाटारश्च ।

७६. पितृष्वसुश्छण् । ४-१-१३२ ॥

छस्य ईय् । पैतृष्वसीयः ।

७७. ढकि लोपः । ४-१-१३३ ॥

पितृष्वसुः ढक् स्यात् । तस्मिन् परेऽन्त्यलोपश्च । पैतृष्वसेयः ।

७८. मातृष्वसुश्च । ४-१-१३४ ॥

पितृष्वसृवत्स्यात् । मातृष्वसीयः । मातृष्वसेयः ।

७९. चतुष्पाद्भ्यो ढञ् । ४-१-१३५ ॥

चतुष्पाद्वाचिभ्योऽपत्ये ढञ् । सुरभिर्गौः । तदपत्यं सौरभेयः । जम्बुः सृगालः । जाम्बेयः ।

८०. गृष्ट्यादिभ्यश्च । ४-१-१३६ ॥

एभ्योऽचतुष्पाद्वचनेऽपि ढञ् । गार्ष्टेयः । सकृत्प्रसूता मानुषीह गृष्टिः । मित्रयोर्ढञि दाण्डिनायनक्त्या युलोपः । मैत्रेयः ।

८१. राजश्वशुराद्यत् । ४-१-१३७ ॥

श्वशुर्यः । राजन् य । 'नस्तद्धिते' (६-४-१४४) इति टिलोपे प्राप्ते

८२. ये चाभावकर्मणोः । ६-४-१६८ ॥

भावकर्मार्थादन्यस्मिन् यादौ तद्धिते परे अन् प्रकृत्या स्यात् । राज्ञो यति जातिग्रहणं कार्यम्—इति राजन्यः क्षत्रियजातिः । अपत्यमात्रे तु ञ्यण् । राजनः । अभाव-कर्मणोरित्युक्त्या राज्ञो भावः कर्म वा राज्यमिति टिलोपः ।

८३. क्षत्राद्घः । ४-१-१३८ ॥

घस्य इय् । क्षत्रियः । अयमपि जातावेव । क्षात्रिरन्यः ।

८४. कुलात्खः । ४-१-२३९ ॥

केवलात्कुलात् तदन्ताच्च खः स्यात् । कुलशब्देन सत्कुलवान् लक्ष्यते । तत्सुतः कुलीनः । द्विजकुलीनः ।

८५. अपूर्वपदादन्यतरस्यां यड्ढकञौ । ४-१-१४० ॥

पूर्वपदरहितात्कुलादेतौ वा स्तः । कुल्यः । कौलेयकः । विकल्पात् कुलीनः ।

अत्रापूर्वपदत्वोक्तेस्तुल्यकुल्यो न सिद्ध्यति ।
यद्वा तुल्यकुले साधुः साध्वर्थे यद्वदिष्यते ॥

८६. महाकुलादञ्खञौ । ४-१-१४१ ॥

वाधिकारात् खश्च । माहाकुलः । माहाकुलीनः । महाकुलीनः ।

८७. दुष्कुलाड्ढक् । ४-१-१४२ ॥

वा स्यात् । दौष्कुलेयः । दुष्कुलीनः ।

८८. स्वसुश्छः । ४-१-१४३ ॥

स्वस्रीयः ।

८९. भ्रातुर्व्यच्च । ४-१-१४४ ॥

छश्च स्यात् । भ्रातृपुत्रो भ्रातृव्यः । भ्रात्रीयः ।

९०. व्यन् सपत्ने । ४-१-१४५ ॥

रूढ्या शत्रौ वाच्ये भ्रातुर्व्यन् स्यात् । भ्रातृव्यं हन्यात् । व्यद्व्यघनोः स्वरे भेदः ।

९१. रेवत्यादिभ्यष्ठक् । ४-१-१४६ ॥

९२. ठस्येकः । ७-३-५० ॥

ठरूपस्य प्रत्ययस्येकादेशः स्यात् । रेवतीसुतो रैवतिकः । दण्डमाहरस्य दाण्डाहिकः ।

अश्वमणिद्वारेभ्यः पाल्याः ।

आश्वपालिकः । माणिपालिकः । ऐच् । दौवारपालिकः ।

९३. गोत्रस्त्रियाः कुत्सने ण च । ४-१-१४७ ॥

गोत्रप्रत्ययान्तस्त्रीशब्दात् कुत्सितेऽपत्ये वाच्ये णश्च ठक् च स्यात् । गार्गीपुत्रो गार्गोऽयं जडः । गार्गिको वा । अकुत्सने 'स्त्रीभ्यो ढक्' (४-१-१२०) गार्गेयः ।

९४. वृद्धाट्ठक् सौवीरेषु बहुलम् । ४-१-१४८ ॥

वृद्धात्सौवीरगोत्रात्कुत्सितेऽपत्ये बहुलं ठक् । भागवित्तिः तार्णबिन्दवः आकशापेय इति त्रिभ्य एव । भागवित्तिको जडः । बहुलोक्तेः 'यञिञोः' (४-१-१०१) इति फगपि । भागवित्तायनः ।

९५. फेरछ च । ४-१-१४९ ॥

वृद्धात् फक्यन्तात्सौवीरगोत्रात्कुत्सितापत्ये छ च ठक् च स्यात् । तिकादिफिञन्तेभ्यो यामुन्दायनि-सौयामायनि-वार्ष्यायणिभ्य एव । यामुन्दायनीयो यामुन्दायनिको वा जडः ।

९६. फाण्टाहृतिमिमताभ्यां णफिञौ । ४-१-१५० ॥

सौवीरगोत्रजाभ्यामपत्ये णफिञौ स्तः । क्रमोऽत्र न । फाण्टाहृतः । फाण्टाहृतायनिः । मैमतः । मैमतायनिः ।

९७. कुर्वादिभ्यो ण्यः । ४-१-१५१ ॥

कौरव्यः । वादिपुत्रो वावदूक्यः । वैन्यः । मौर्यः । सौम्यो बुधः । हार्दिक्यः कृतवर्मा ।

सम्राजः क्षत्रिये ।

सम्राट्पुत्रः क्षत्रियश्चेत् साम्राज्यः । साम्राजोऽन्यः । ब्राह्मणोऽयं कुरुः । क्षत्रियकुरोस्तु 'कुरुनादिभ्य'-(४-२-९७२) इति तद्राजाख्यो ण्यो वक्ष्यते ।

९८. सेनान्तलक्षणकारिभ्यश्च । ४-१-१५२ ॥

सेनान्तेभ्यो लक्षणशब्दात् कारिभ्यश्चापत्ये ण्यः स्यात् । हरिषेणसुतो हारिषेण्यः । लाक्षण्यः । कारी शिल्पी । तान्तुवाय्यः । ताक्षण्यः । 'यं च' (६-४-१६८) इति प्रकृतिभावः । शिवाद्यृक्तेस्ताक्षणोऽपि । 'षपूर्व' (६-४-१३५) इति अलोपः ।

९९. उदीचामिञ् । ४-१-१५३ ॥

तन्मते उक्तेभ्यः स्त्रीभ्यः इञ् । हारिषेणिः । लाक्षणिः । तान्तुवायिः ।

१००. तिकादिभ्यः फिञ् । ४-१-१५४ ॥

तिकपुत्रः तैकायनिः । चान्द्रमसायनिः । कौरव्यात्क्षत्रियात् कौरव्यायणिः ।

१०१. कौशल्यकार्मार्याभ्यां च । ४-१-१५५ ॥

कौशलकर्मारयोरेतावादेशौ निपात्य ताभ्यां फिञ्विधिः । कुशलपुत्रः कौशल्यायनिः । कर्मारपुत्रः कार्मार्यायणिः ।

१०२. उदीचां वृद्धादगोत्रात् । ४-१-१५७ ॥

अगोत्रवाचिनो वृद्धाच्छब्दात्फिञ् स्यादुदङ्मते ।
प्राङ्मते तु यथाप्राप्तं वाङ्मदैत्यद्विषादयः ॥

दैत्यद्विषायणिः । कामायनिः । कालद्रुहायणिः ।

भसंज्ञायां पदत्वस्य बाधाज्जस्त्वादि नो भवेत् ।
राजायनिस्तथा वाङ्मायनिर्नान्ते टिलोपतः ॥
वाशिब्शब्दाद्दाण्डिनादेरलोपाद्वाशिनायनिः ।
गोत्राच्च फिञ् भानवस्य पुत्रो भानविरेव हि ॥

१०३. त्यदादीनि च । १-१-७४ ॥

एतानि च वृद्धसंज्ञानि । तेन तत्पुत्रः तादायनिः । ऐदमायनिः । अत्रापि प्राङ्मतेऽण् । तादः । ऐदमः ।

बा नामधेयस्य वृद्धसंज्ञा वाच्या ।

नान्दायनिः कृष्णः । द्रौणायनिः । अवृद्धत्वे नान्दिः । द्रौणिः ।

१०४. वाहिनादीनां कुक् च । ४-१-१५८ ॥

एषामुदङ्मते फिञ् । कुगागमश्च । वाहिनस्य पुत्रो वाहिनकायनिः । प्राङ्मते वाहिनिः ।
चर्मिवर्मिणोर्नलोपश्च ।

चार्मिकायणिः । वार्मिकायणिः ।

१०५. पुत्रान्तादन्यतरस्याम् । ४-१-१५९ ॥

पुत्रान्तस्य शब्दस्य 'उदीचां वृद्धात्' (४-१-१५७) इति फिञि परे वा कुक् स्यात् । वात्सीपुत्रस्य पुत्रो वात्सीपुत्रकायणिः । वात्सीपुत्रायणिः । अनुदङ्मते फिञभावात् वात्सीपुत्रिः ।

१०६. प्राचामवृद्धात्फिन् बहुलम् । ४-१-१६० ॥

म्लुचुकायनिः । उदङ्मते म्लौचुकिः । बहुलोक्तेः सर्वत्र न । दक्षात् दाक्षिः ।

१०७. मनोर्जातावञ्यतौ षुक् च । ४-१-१६१ ॥

अस्मादपत्ये जातौ वाच्यायां अञ्यतौ स्तः । षुगागमश्च । मानुषः । मनुष्यः । अपत्यमात्रे त्वणि मानवः । पौत्रादौ गर्गादित्वान्मानव्यः । जातौ तु मानवा इति सम्बन्धमात्रेऽण् ।

कुत्सितेऽज्ञेऽपि चापत्ये मनोरण् नस्य णस्तथा ।
कुत्सिते माणवो जाल्मः तथाज्ञे माणवः शिशुः ॥

अथ तद्राजसंज्ञाः प्रत्ययाः ।

१०८. जनपदशब्दात्क्षत्रियादञ् । ४-१-१६८ ॥

जनपदवाचकात् क्षत्रियवाचिनोऽपत्येऽञ् स्यात् । पञ्चालाः इति जनपदो राजानश्चोच्यन्ते । तदपत्यं पाञ्चालः । वैदेहः । इक्ष्वाकुशब्दादञि ओर्गुणे प्राप्ते दाण्डिनायनादित्वात् टिलोपः । ऐक्ष्वाकः । केकयशब्दादञि

१०९. केकयमित्रयुप्रलयानां यादेरियः । ७-३-२ ॥

एषां वृद्धिहेतुतद्धिते परे यादेर्भागस्य इयः स्यात् । केक इय । 'आद्गुणः' (६-१-८७) आदिवृद्धिः । कैकेयः ।

क्षत्रियसमानशब्दाज्जनपदात् तस्य राजेत्यर्थेऽपत्यवत्प्रत्ययो वाच्यः ।
पञ्चालानां राजा पाञ्चालः । मागधः ।

११०. साल्वेयगान्धारिभ्यां च । ४-१-१६९ ॥

अञ् स्यात् । साल्वेयः । गान्धारः । अपत्यं च राजा च एवम् ।

१११. द्व्यञ्मगधकलिङ्गसूरमसादण् । ४-१-१७० ॥

द्व्यञ्भ्यो मगधादिभ्यश्च जनपदतुल्यक्षत्रियतुल्यनामभ्यः अण् स्यात् । आङ्गः । वाङ्गः । मागधः । कालिङ्गः । सौरमसः ।

११२. वृद्धेत्कोसलाजादाञ्ञ्यङ् । ४-१-१७१ ॥

वृद्धेभ्य इदन्तात् कोसलाजादशब्दाभ्यां च ञ्यङ् स्यात् । वृद्धात् सौवीरपुत्रः सौवीर्यः । इदन्तात् चैद्यः । आवन्त्यः । कौन्त्यः । कौसल्यः । आजाद्यः ।

अप्रसिद्धात् पाण्डोर्ढ्यण् वाच्यः ।
पाण्डूनां सुतः तेषां राजा च पाण्ड्यः ।

११३. कुरुनादिभ्यो ण्यः । ४-१-१७२ ॥

कुरोर्नकारादिभ्यश्च ण्यः स्यात् । कौरव्यः । नैषध्यः । कुरोः शिवादितिकादिपाठात् कौरवः कौरवायणिरपि । नैषधस्तु निषधस्य राज्ञः सम्बन्धार्थेऽणि दाशरथवत् साध्यः ।

११४. साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् । ४-१-१७३ ॥

साल्वजनपदक्षत्रियांशपालकेभ्यः प्रत्यग्रथादिभ्यश्च इञ् स्यात् । 'जनपदशब्दात्' (४-१-१६८) इत्यञोऽपवादः । औदुम्बरादयः साल्वावयवाः । तदपत्यं औदुम्बरिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः ।

११५. ते तद्राजाः । ४-१-१७४ ॥

एतेऽञादयस्तद्राजाख्याः । तेन 'तद्राजस्य बहुषु' (२-४-६२) इति अञादेर्लुक् । वैदेहः वैदेहौ विदेहाः । आङ्गः आङ्गौ अङ्गाः । एवं सुवीराः । अवन्तयः । कुन्तयः । कुरवः । निषधाः । 'कौरव्याः पशवः' इति वेणीसंहारोक्तिः ब्राह्मणत्वारोपात् । तत्र ण्यस्यातद्राजत्वादस्त्रियामित्युक्तेः स्त्रीलिङ्गे बहुत्वेऽपि लुड् न । वैदेह्यः स्त्रियः । अपत्यार्थैरेव सहद्वन्द्वेन कृते बहुत्वेऽप्ययं लुक् स्यात् । यादवः कौरव्यो मागधश्च यदुकुरुमगधाः ।

११६. कम्बोजाल्लुक् । ४-१-१७५ ॥

अस्मादञो लुक् । कम्बोजपुत्रः कम्बोजः । एवं राजापि ।

कम्बोजादिभ्यो लुम्वाच्यः चोलाद्यर्थम् ।

चोलानां सुतश्चोलः । केरळः । मुरळः । शकः ।

११७. स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । ४-१-१७६ ॥

एभ्यस्तद्राजप्रत्ययस्य स्त्रीलिङ्गे लुक् स्यात् । अवन्तीनां पुत्री अवन्ती । कुन्ती । कुरूः ।

इतो मनुष्यजातेरित्युदितो ङीषिह्याद्ययोः ।
कुरोरूङुत इत्यूङ् स्यादपत्यत्वेन जातिता ॥

११८. अतश्च । ४-१-१७७ ॥

स्त्रीलिङ्गेऽकाररूपस्य तद्राजप्रत्ययस्य लुक् । शूरसेनी । अत्र अञो लुक् । मद्री । अत्र द्व्यचूत्वादण् न । माद्री तु चिन्त्या ।

११९. न प्राच्यभर्गादियौधेयादिभ्यः । ४-१-१७८ ॥

शरावत्याः प्राच्यजनपदवाचिभ्यो भर्गादिभ्यो यौधेयादिभ्यश्च अतः इत्युक्तो लुङ् न स्यात् । प्राच्येभ्यः पाञ्चाली । वैदेही । आङ्गी । वाङ्गी ।

नदी शरावती नाम निर्ऋतीशानदिग्वहा ।
तस्याः प्राग्दक्षिणाः प्राच्या उदीच्याः पश्चिमोत्तराः ॥

भर्गादेः भार्गी । कैकेयी इत्यादि । यौधेयादेस्तु पाञ्चनिकतद्राजस्य लुङ् निषिध्यते । न त्वपत्यस्य । अथ कौरव्य-वासुदेव-वासिष्ठ-वैद-तैकायनिप्रभृतिभ्यो युवविवक्षायां 'गोत्रादूनिं' (४-१-९४) इति प्रत्ययान्तरं प्राप्नोति । तैकायनेरण् । पूर्वेभ्यः अत इञ् । तत्रोच्यते ।

१२०. ण्यक्षत्रियार्षञितो यूनि लुगणिञोः । २-४-५८ ॥

ण्यन्ताक्षत्रियगोत्रादप्यार्षगोत्राञ्ञिदन्ततः ।
परयोरणिञोर्लुक् स्याद्युवापत्ये विवक्षिते ॥

कौरव्यः 'कुर्वादिभ्यो' (४-१-१५१) ण्यन्तः । तस्य युवा कौरव्य एव । इञो लुक् । वासुदेवो वृष्णित्वादण्नन्तः । क्षत्रियगोत्रम् । तत्रापि युवा वासुदेव एव । न तु वासुदेविः । वासिष्ठः इति ऋष्यण् । तत्रापि युवा वासिष्ठ एव । ञिदन्तात्तु वैदो विदाद्यञन्तः । तत्र युवा वैद एव । तिकादिभ्यः फिञ् । अण् । इदन्तः तैकायनिः । तस्य यूनि अणो लुक् । तेन तैकायनिरेव युवापि । एभ्योऽन्यत्र यूनि आदिः प्रागुक्तः । औपगविः । अब्राह्मणगोत्रमात्राद्युवप्रत्ययमात्रस्य लुम्वाच्यः । तेन क्षत्रियगोत्रादणिञ्भ्यां अन्यस्यापि युवप्रत्ययस्य लुक् स्यात् ।

वैश्यादिगोत्रादपि च स्यात्। 'द्व्यञ्मगध' (४-१-१७०) इति अणन्त आङ्गशब्दः। क्षत्रियगोत्रम्। ततः 'अणो द्व्यचः' (४-१-१५६) इति प्राप्तस्य फिञो लुक्। आङ्गो युवा। कुम्भको वैश्यः। चन्द्रगुप्तः शूद्रः। तयोः अत इञन्तयोः यूनि 'यञिञोः' (४-१-१०१) इति फको लुक्। कौम्भकिः चान्द्रगुप्तिश्च युवा।

एवं च वार्तिकोक्त्यात्र सूत्रे क्षत्रियगीर्वृथा।
प्यार्षपैलादिलुक् सर्वो ब्राह्मणेष्विति च स्थितम्॥

१२१. पैलादिभ्यश्च। २-४-५९॥

एभ्यः परस्य युवप्रत्ययस्य लुक्। 'पीलाया वा' (४-१-११८) इत्यणि पैलः। तस्मात् 'अणो द्व्यचः' (४-१-१५६) इति फिञो लुक्। तेन युवापि पैल एव। एवं औदमेधिः सात्यकिश्च युवा। अत्र 'यञिञोः' (४-१-१०१) इति फको लुक्।

१२२. इञः प्राचाम्। २-४-६०॥

प्राग्देशगोत्रवाचिभ्य इञन्तेभ्योऽत्र यूनि लुक्।
पात्रागारेर्युवापत्यं पात्रागारिः फकोऽत्र लुक्॥

उदग्देशजे तु दाक्षेर्युवापत्यं दाक्षायणः इति फगस्त्येव।

१२३. न तौल्वलिभ्यः। २-४-६१॥

तौल्वलिप्रभृतिभ्यस्तु प्राग्देशेऽपि न लुग्भवेत्।
तौल्वलेर्हि युवापत्यं फक्कि स्यात्तौल्वलायनः॥

अथ तद्राजेभ्योऽन्येषामपि केषांचित् बहुत्वे लुगुच्यते।

१२४. यस्कादिभ्यो गोत्रे। २-४-६३॥

एभ्यः परस्य गोत्रप्रत्ययस्य तेनैव कृते बहुत्वे सति स्त्रीलिङ्गादन्यत्र लुक् स्यात्। अत्र अनन्तरापत्यमपि गोत्रम्। यस्कस्यापत्ये शिवादियण्। यास्कः यास्कौ यास्काः।

१२५. यञञोश्च। २-४-६४॥

गोत्रार्थयोर्यञञोर्बहुत्वे लुक्। 'गर्गादिभ्यो यञ्' (४-१-१०५) गार्ग्यः गार्ग्यौ गार्गाः। बिदादिभ्योऽञ्। बैदः बैदौ बिदाः।

षष्ठीतत्पुरुषे लुग्वा यञादेरबहुष्वपि ।
गार्ग्यस्य हि प्रिया गर्गप्रिया गार्ग्यप्रियापि वा ॥
एवं विदप्रिया वैदप्रियेत्याद्युत्तरेष्वपि ।
बहुत्वे तु लुगेव स्याद्गर्गाणां भूर्हि गर्गभूः ॥

१२६. अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च । २-४-६५ ॥

एभ्यः अपत्यप्रत्ययस्य बहुत्वे लुक् । अत्रेः 'इतश्चानिञः' (४-१-१२२) इति ढक् । आत्रेयः आत्रेयौ आत्रेयाः । भृग्वादेः ऋष्यणो लुक् । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः ।

१२७. बह्वच इञः प्राच्यभरतेषु । २-४-६६ ॥

प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्य बह्वचः शब्दात् परस्येञो बहुत्वे लुक् स्यात् । प्राच्ये पात्रागारिः पात्रागाराः । भरते आर्जुनिः अर्जुनाः । भरतानां प्राच्यत्वेऽपि पृथगुक्तिः अन्यत्र प्राच्यग्रहे भरतानामग्रहार्थम् ।

१२८. न गोपवनादिभ्यः । २-४-६७ ॥

बिदादिगतेभ्यो गोपवनादिभ्योऽष्टभ्यः परस्य बिदाद्यञो 'यञञोश्च' (२-४-६४) इति प्राप्तो लुङ् न स्यात् । गौपवनाः । वैन्दवाः इत्यादि । पौनर्भव-पारशव-दौहित्र-पौत्र-नानान्द्राणां बिदाद्यञन्तानामपि बहुषु लुङ् न इति भोजः ।

१२९. तिककितवादिभ्यो द्वन्द्वे । २-४-६८ ॥

तिकादेः कितवादेश्च परस्य गोत्रप्रत्ययस्य द्वन्द्वसमासे बहुत्वे लुक् स्यात् । तिकादित्वात् फिञ् । तैकायनयः कैतवायनयश्च । तेषां द्वन्द्वे तिककितवाः ।

१३०. उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । २-४-६९ ॥

उपकादिभ्यः परस्यापत्यप्रत्ययस्य द्वन्द्वे चाद्वन्द्वे च बहुत्वे वा लुक् स्यात् । उपकाः । औपकायनाः । लमकाः । लामकायनाः । इत्यद्वन्द्वे । द्वन्द्वेऽपि उपकलमकाः । औपकायनलामकायनाः । नडादिफगन्तावेतौ ।

१३१. आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । २-४-७० ॥

अनयोर्बहुत्वेऽपत्यप्रत्ययस्य लुक् । क्रमादेतावादेशौ च स्तः । चः स्वरार्थः । आगस्त्याः आगस्त्यौ आगस्त्यः । एवं कुण्डिनाः ।

१३२. अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे । ४-१-७८ ॥

अणिञन्तानां गोत्रवाचिनां आर्षगोत्रवर्जितानां गुरूपोत्तमानां शब्दानां अणिञोः स्थाने स्त्रियां ष्यङादेशः स्यात् ।

वृत्तवद्वर्णगणनात्तिप्रभृत्यक्षरान्विताः ।
शब्दा उपान्त्यगुरवः स्युर्गुरूपोत्तमा इह ॥

कुमुदगन्धेरपत्यमित्यणि कौमुदगन्धः । तत्र पौत्रादौ स्त्रियां वाच्यायां अणः ष्यङ् । षडलोपः । 'यङश्चाप्' (४-१-७४) इति चाप् । कौमुदगन्ध्या । एवं वराहात् 'अत इञ्' (४-१-९५) वाराहिः । ततो गोत्रे स्त्रियां इञः ष्यङ् । वाराह्या । हास्तिशीर्ष्या । आर्षगोत्रे तु ष्यङ् न । वासिष्ठी । अगुरूपोत्तमेऽपि न । औपगवी । द्वयोरणन्तत्वात् ङीप् ।

१३३. गोत्रावयवात् । ४-१-७९ ॥

स्वतो न गोत्रशब्दा ये कुलाख्या गोत्रवन्मताः ।
ते गोत्रावयवा नाम ये केचिन्मुखरादयः ॥

तेभ्योऽणिञोः स्त्रियां गोत्रे ष्यङादेशः स्यात् । मुखरस्य गोत्रस्त्री मौख्यी ।

१३४. क्रौड्यादिभ्यश्च । ४-१-८० ॥

क्रौडिप्रभृतिभ्यः स्त्रियां ष्यङ्प्रत्ययः स्यात् । पञ्चम्युक्तेर्नायमादेशः । 'यस्येति च' (६-४-१४८) इति इलोपः । क्रौड्या । आपिशल्या ।

सूताद्युवत्याम् ।
सूत्या यौवनवती ।

भोजात् क्षत्रियगोत्रे ।
भोजगोत्रजा भोज्या ।

१३५. दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् । ४-१-८१ ॥

इञन्तेभ्यः एभ्यः स्त्रियां ष्यङ्प्रत्ययो वा स्यात् । दैवयज्ञ्या । दैवयज्ञीत्यादि । इञन्तात् 'इतो मनुष्यजातेः' (४-१-६५) इति ङीष् ॥ इति ॥

अथ प्राग्दीव्यतीयसाधारणा उच्यन्ते ।

१३६. दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । ४-१-८५ ॥

दित्यादिभ्यः पत्युत्तरपदेभ्यश्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् । दितेरपत्यं दैत्यः । ङीषन्ता-दितिशब्दात् स्त्रीभ्यो ढकि दैतेयः । ण्ये आदित्यः । ङीषन्ताड्ढकि आदितेयः । आदित्यस्य ण्ये यस्येति लोपे च कृते पूर्वयकारस्य 'हलो यमाम्' (८-४-६४) इति लोपः । आदित्य-देवतं आदित्यं हविः । पत्युत्तरपदात् बार्हस्पत्योऽयमादिः । 'प्रातिपदिकग्रहणे लिङ्ग-विशिष्टस्यापि ग्रहणम्' इति सपत्नीशब्दादपि पत्युत्तरत्वाण्ण्यः इति सुब्धातुवृत्तौ । भस्याढे तद्धिते पुंवद्भावो वाच्यः इति पुंवत्त्वम् । सपति य । यस्येति लोपः । वृद्धिः । सापत्यः । न्यासमते तु सपत्न्याः पुंवत्त्वं नेति सापत्न्यः । शत्रुस्त्रीवाचकात्तु सपत्नी-शब्दात् अपत्ये शिवाद्यणि पुंवत्त्वस्यानिष्टत्वात् सापत्न एव ।

यमादपीष्यते याम्यः टीकासर्वस्वकृत्पुनः ।
सोमादप्यमुमेवाह सौम्यः सोमसुतो बुधः ॥
सौम्यः कुर्वादिरित्येके गर्गादियञितीतरे ।
प्राग्दीव्यतीयव्यापित्वाद्दित्यादिण्यस्तु शोभनः ॥
तथापि सति सौम्याः स्युः सोमसम्बन्धिनोऽखिलाः ।
तेषां च कोमलत्वात्स्यात् सौम्योऽन्योऽप्युपचारतः ॥
देवतार्थेऽपि सोमाट्ट्यण् तेन सौम्य इतीतरे ।
तद्देवतात्त्वोपचारः स्याद्धि सम्बन्धिनामपि ॥
स्त्रियां तु तत्र सौमी स्यादिह सौम्येति भिद्यते ।
स्वाम्याह सौम्य इत्येव शास्त्रादेय इवार्थकः ॥

१३७. अश्वपत्यादिभ्यश्च । ४-१-८४ ॥

एभ्यः पत्युत्तरपदत्वेऽप्येव । अश्वशतधनगणराष्ट्रमूलकुलगृहपशुधान्यधर्मधन्वन्समा-प्राणसेनाक्षेत्राधिपूर्वादण् । आश्वपतः । शातपतः । धानपतः इत्यादि ।

पृथिव्या आञौ वाच्यौ ।

अञि ङीविति भेदः । पार्थिवा । पार्थिवी ।

देवस्य यञञौ ।

देवस्यापत्यादिः दैव्यः देवः ।

बहिषो यञ् टिलोपश्च ।

बर्हिर्भवादि बाह्यम् ।

ईकक् च ।

टिलोपश्च स्यात् । बाहीको म्लेच्छः ।

स्थामान्तादप्रत्ययो वाच्यः ।

'नस्तद्धिते' (६-४-१४४) अश्वत्थाम्नः पुत्रादिः अश्वत्थामः । प्राग्दीव्यतीयेऽन्यत्रापि अजादिप्रत्ययप्राप्तौ

गोर्यद्वाच्यः ।

गोरपत्यादौ अण्प्राप्तौ गव्यः । तथा दीव्यत्यर्थे इकः प्राप्तौ गव्यः ।

१३८. उत्सादिभ्योऽञ् । ४-१-८६ ॥

एभ्यः प्राग्दीव्यतीयेऽञ् स्यात् । अणञोः स्वरे भेदः । उत्सो निर्झरः । तत्र भवादिः औत्सः । औदपानः । सौवर्णः । माहानसः । माध्यंदिनः । एवं भरतकुरुसत्त्वज्ञनपदपञ्चालोशीनरककुबुष्णिगादेः ।

१३९. स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । ४-१-८७ ॥

'घान्यानां भवने' (५-२-१) इत्यतः प्राच्येष्वर्थेषु स्त्रीपुंसशब्दाभ्यां क्रमादेतौ स्तः ।

स्त्री नञ् । वृद्धिणत्वे । स्त्रिया अपत्यादिः स्त्रैणः ।

तस्येदमर्थतोऽन्यत्र ष्यादयः सर्वबाधकाः ।
इत्येवं माधवाद्युक्तेः स्त्रीभ्यो ढग्बाध्यते नञा ॥

पुंस् नञ् ।

१४०. स्वादिष्वसर्वनामस्थाने । १-४-१७ ॥

सर्वनामस्थानवर्जितेषु स्वादिषु परेषु भसंज्ञा । अतोऽन्यत्र पूर्वस्य पदसंज्ञा । इति पदत्वेन संयोगान्तलोपः । पौंस्नः । वतिप्रत्ययात्पूर्वम्

सर्वत्राग्निकलिभ्यां ढग्वाच्यः ।

अग्निकल्योरपत्यादिः आग्नेयः । कालेयः ॥

॥ इत्यपत्यभागः ॥

१४१. तेन रक्तं रागात् । ४-२-१ ॥

रागो रञ्जनसाधनम् । तद्वाचकात्तेन रक्तमित्यर्थेऽण् स्यात् । कुसुम्भेन रक्तं कौसुम्भं वसनम् । काषायम् । द्वाभ्यां वर्णाभ्यां रक्तमित्यर्थे द्विवर्ण अण् ।

१४२. द्विगोर्लुगनपत्ये । ४-१-८८ ॥

संख्यापूर्वः समासो द्विगुः । द्विगुसंज्ञकात् प्राग्दीव्यतीयप्रत्ययस्यापत्यार्थादन्यत्र लुक् स्यात् । द्विवर्णः षटः । अपत्ये तु न लुक् । द्वयोः पुरुषयोरपत्यं द्वैपुरुषिः ।

१४३. लाक्षारोचनाशकलकर्दमाट्ठक् । ४-२-२ ॥

'ठस्येकः' (७-३-५०) । कित्त्वाद्वृद्धिः । लाक्षया रक्तं लाक्षिकम् । रौचनिकम् । शाकलिकम् । कार्दमिकम् । अन्त्याभ्यामणपीष्टः । शाकलम् । कार्दमम् ।

नील्या अन् वाच्यः ।

नील्या रक्तं नीलम् । शुक्लस्य वर्णान्तरकरणमेवात्र रञ्जनम् । तेन नील्यादेरपि स्यात् ।

पीतात्कन् ।

पीतकम् ।

हरिद्रामहारजनाभ्यामञ् वाच्यः ।

हारिद्रम् । माहारजनम् । महारजनं कुसुंभम् ।

१४४. नक्षत्रेण युक्तः कालः । ४-२-३ ॥

नक्षत्रवाचिभ्यः तेन युक्तः काल इत्यर्थेऽण् स्यात् ।
कृत्तिकाभिर्युक्तं कार्तिकं अहः ।

१४५. सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः । ६-४-१४९ ॥

सूर्यादिशब्दसंबन्धी भसंज्ञस्योपधास्थितः ।
यकारो लुप्यते तेन तैषं तिष्ययुतं दिनम् ॥
नक्षत्रगामिन्यणि तिष्यपुष्ययोश्छे ड्यां च लोपोऽयमगस्त्यसूर्ययोः ।
ड्यामेव मत्स्यस्य भवेदितीरणाद्व्यनाशि सूत्रं प्रविभज्य वार्तिके ॥

तिष्यपुष्ययोरित्युक्तया पौषं दिनमित्यपि ।

१४६. लुबविशेषे । ४-२-४ ॥

कालस्य दिनादिविशेषानुक्तौ प्रत्ययस्य लुप् स्यात् ।

१४७. लुपि युक्तवद्व्यक्तिवचने । १-२-५१ ॥

प्रत्ययस्य लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । कृत्तिकाभिः युक्तः कालः कृत्तिकाः । कृत्तिकासु कर्म कृतम् । विशेषोक्तौ न लुप् । कार्तिकं अहः ।

१४८. संज्ञायां श्रवणाश्वत्थाभ्याम् । ४-२-५ ॥

आभ्यां तेन युक्त इति जातस्याणः संज्ञायां लुप् स्यात् । श्रवणा पौर्णमासी श्रावणीत्यपीष्टम् । अश्विनीनक्षत्रं अश्वत्थः । तद्युक्तोऽश्वत्थो मुहूर्तः ।

१४९. द्वन्द्वाच्छः । ४-२-६ ॥

नक्षत्रद्वन्द्वाद्युक्तेऽर्थे छः स्यात् । ज्येष्ठामूलीयं अहः । ज्येष्ठामूलीये कर्म कृतम् ।

१५०. दृष्टं साम । ४-२-७ ॥

तेन दृष्टं सामेत्यर्थेऽण् स्यात् । वसिष्ठेन दृष्टं साम वासिष्ठम् ।

१५१. कलेर्ढक् । ४-२-८ ॥

कलिना दृष्टं साम कालेयम् ।

दृष्टे सामन्यण्वा ढिद्वाच्यः ।

ढित्त्वे टिलोपः । उशनसा दृष्टं साम औशनं औशनसम् ।

गोत्रात्तस्येदमर्थे यो वृञादिः स इहेष्यते ।
दृष्टमौपगवेनेति सामौपगवकं भवेत् ॥

१५२. वामदेवाड्ड्यड्ड्यौ । ४-२-९ ॥

वामदेवमिदं साम ड्यतस्तित्त्वात्स्वरे भिदा ।
यस्येति लोपतः सिद्धेर्ढित्फलं चोभयोः स्वरे ॥

तीयादीकक् स्वार्थे वा वाच्यः ।

द्वैतीयीकम् । द्वितीयम् । तार्तीयीकम् । तृतीयम् ।

न विद्यायाम् ।

द्वितीया विद्या ।

१५३. परिवृतो रथः ४-२-१० ॥

तेनाच्छादितो रथ इत्यर्थेऽण् स्यात् । वस्त्रेणाच्छादितो वास्त्रो रथः । चार्मणं अनः । शकटाद्यपि रथत्वेन मन्यते ।

१५४. पाण्डुकम्बलादिनिः । ४-२-११ ॥

गजास्तरणार्थे वर्णकम्बलः पाण्डुकम्बलः । तदाच्छादितो रथः पाण्डुकम्बली ।

१५५. द्वैपवैयाघ्रादञ् । ४-२-१२ ॥

द्वीपि चर्म द्वैपम् । तदेव वैयाघ्रम् । आभ्यामुक्तार्थे अञ् । द्वैपो रथः । वैयाघ्रः ।

१५६. कौमारापूर्ववचने । ४-२-१३ ॥

अपूर्वत्वे द्योत्येऽणन्तः कौमारशब्दो निपात्यते । अनन्यपूर्वां कुमारीमूढवान् कौमारः पतिः । अनन्यपूर्वा पतिं प्राप्ता सा कुमार्येव च कौमारी । इत्युभयत्रापि स्त्रिया अपूर्वत्वमिष्टं वृत्यादौ । शृङ्गारे तूक्तम् ।

कौमारी सा भवेद्भार्या यां कुमारः प्रपद्यते ।
प्रपद्यते कुमारी यं स कौमारो मतः पतिः ॥

इति । अत्र अनूढभार्यस्य आद्या भार्या कौमारीति भेदः ।

१५७. तत्रोद्धृतममत्रेभ्यः । ४-२-१४ ॥

भुक्तशिष्टमुद्धृतम् । पात्रवाचिभ्योऽस्मिन्नर्थेऽण् । कंसे भुक्तशिष्टमन्नं कांसम् । स्थाले चेत् स्थालम् ।

१५८. स्थण्डिलाच्छयितरि व्रते । ४-२-१५ ॥

स्थण्डिलशब्दात् तत्र शयितर्यर्थे व्रते द्योत्येऽण् । व्रतेन स्थण्डिले शयिता स्थाण्डिलः ।

१५९. संस्कृतं भक्षाः । ४-२-१६ ॥

तत्र संस्कृतमित्यर्थेऽण् भक्षाश्चेत्संस्कृता इह ।
दन्तैर्भक्ष्यं भक्षमाहुः पैठरास्तिलतण्डुलाः ॥

१६०. शूलोखाद्यत् । ४-२-१७ ॥

शूले संस्कृतं शूल्यं मांसम् । उखायां चेत् उख्यम् ।

१६१. दध्नष्ठक् । ४-२-१८ ॥

इकः । 'यस्येति च' (६-४-१४८) दाधिकाः सक्तवः ।

१६२. उदश्वितोऽन्यतरस्याम् । ४-२-१९ ॥

अस्माद्वा ठक् ।

१६३. इसुसुक्तान्तात्कः । ७-३-५१ ॥

इस् उस् इत्यन्तादुगन्तात्तकारान्ताच्च परस्य ठस्य कः स्यात् । न त्विकः । नक्रे संस्कृतं औदश्वित्कम् । अणि औदश्वितम् ।

१६४. क्षीराड्ढञ् । ४-२-२० ॥

क्षीरे संस्कृतः क्षैरेयः पृथुकः । संस्कृतत्वमात्रमत्रेष्टं न भक्ष्यत्वं इति रामः । तेन क्षैरेयी श्राणा इत्यपि । क्षीरस्य श्राणातः पृथक्त्वविवक्षया तत्र संस्कृतत्वं नेयम् ।

१६५. सास्मिन् पौर्णमसीति संज्ञायाम् । ४-२-२१ ॥

पौर्णमासीवाचकेभ्यः सास्मिन्नस्तीत्यर्थे संज्ञायां अण् स्यात् । पौषी पौर्णमासी अस्मिन्नस्तीति पौषो मासः । पूर्णो मास्यन्द्रः । तत्संबन्धिनी पौर्णमासीति तत्सिद्धिः ।

१६६. आग्रहायण्यश्वत्थाट्ठक् । ४-२-२२ ॥

आग्रहायणि पौर्णमासी अस्मिन्नस्तीति आग्रहायणिको मासः । अश्विनीयुक्ता पौर्णमासी अश्वत्थः । तद्वान् मास आश्वत्थिकः ।

१६७. विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः । ४-२-२३ ॥

फाल्गुनी पौर्णमासी अस्मिन्नस्तीति फाल्गुनिकः फाल्गुनो वा मास इत्यादि ।

१६८. सास्य देवता । ४-२-२४ ॥

अस्मिन्नर्थे अणादयः स्युः । इन्द्रो देवता अस्य इति ऐन्द्रम् । अश्वपत्यादित्वात् गाणपतम् । पाशुपतम् । अदितिदेवत्यं आदित्यम् । आदित्यदेवत्यमपि तथा । बार्हस्पत्यम् । वाजिनं इत्यण् । अत्र 'नस्तद्धिते' (६-४-१४४) इति टिलोपे प्राप्ते

१६९. इनण्यनपत्ये । ६-४-१६४ ॥

अनपत्येऽणि परे इन् प्रकृत्या स्यात् । अपत्ये तु मैधाव इति टिलोप एव ।

१७०. मघवा बहुलम् । ६-४-१२८ ॥

मघवन्नित्यङ्गस्य बहुलं तृ इत्यन्तादेशः स्यात् । ऋकारः उगित्त्वार्थः । माघवतम् । माघवनम् । अत्र 'अन्' (६-४-१६७) इति प्रकृतिभावः । इन्द्राविष्णू देवता अस्येत्यण् ।

१७१. देवताद्वन्द्वे च । ७-३-२१ ॥

वृद्धिहेतुतद्धिते परे देवताद्वन्द्वे उभयपदवृद्धिः स्यात् । ऐन्द्राविष्णवम् । पत्युत्तरपदत्वाण्ण्ये वृद्धिः । ऐन्द्राबार्हस्पत्यम् ।

१७२. नेन्द्रस्य परस्य । ७-३-२२ ॥

परस्येन्द्रस्य वृद्धिर्न । सौमेन्द्रः ।

१७३. दीर्घाच्च वरुणस्य । ७-३-२३ ॥

दीर्घात्परस्य वरुणस्य वृद्धिर्न । ऐन्द्रावरुणम् । दीर्घादित्युक्तेः आग्निवारुणम् । इति ।

१७४. कस्येत् । ४-२-२५ ॥

कशब्दादुक्तार्थेऽण् स्यात् । इच्चान्तादेशः । कि अ । वृद्ध्यायौ । को देवतास्येति कायं हविः ।

१७५. शुक्राद्वन् । ४-२-२६ ॥

वस्येत् । शुक्रदेवत्यं शुक्रियम् ।

१७६. अपोनप्त्रपांनप्तृभ्यां घः । ४-२-२७ ॥

अपोनप्त्रियं । अपांनप्त्रियं हविः । घघनोः स्वरे भेदः ।

१७७. छ च । ४-२-२८ ॥

ताभ्यां छ च स्यात् । ईय् । अपोनप्त्रीयम् । अपांनप्त्रीयम् ।

पैङ्गाक्षीपुलादिभ्यश्च वाच्यम् ।

पैङ्गाक्षीपुलीयं तद्देवत्यम् ।

शतरुद्राच्छ च ।

शतरुद्रीयम् । शतरुद्रियम् ।

१७८. महेन्द्राद्घाणौ च । ४-२-२९ ॥

छ च स्यात् । महेन्द्रियत् । माहेन्द्रम् । महेन्द्रीयम् ।

१७९. सोमाट्ट्यण् । ४-२-३० ॥

सौम्यं हविः । टित्वान् ङीपि यस्येति लोपे

१८०. हलस्तद्धितस्य । ६-४-१५० ॥

हलः परस्य तद्धितयकारस्य ईति परे लोपः स्यात् । सौमी ऋक् ।

१८१. वाय्वृतुपित्रुषसो यत् । ४-२-३१ ॥

'ओर्गुणः' (६-४-१४६) 'वान्तो यि' (६-१-७९) इत्यवादेशः । वायव्यम् । ऋतव्यम् ।

१८२. रीङृतः । ७-४-२७ ॥

कृत्सार्वधातुकाभ्यामन्यस्मिन्यादौ प्रत्यये च्वौ च परे ऋदन्तस्य रीङ् स्यात् । ङित्वादन्त्यस्य । पित्रीयम् । 'यस्येति च' (६-४-१४८) पित्र्यम् । उषस्यम् ।

१८३. द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पति-गृहमेधाच्छ च । ४-२-३२ ॥

एभ्यः छ च यच्च । द्यावापृथिवीयम् । द्यावापृथिव्यम् । शुनासीरौ वायुसूर्यौ । तद्देवत्यं शुनासीरीयम् । शुनासीर्यम् । मरुत्वतीयम् । मरुत्वत्यं इत्यादि ।

१८४. अग्नेर्ढक् । ४-२-३३ ॥

आग्नेयम् । अग्नायीदेवत्यमपि आग्नेयम् ।

भस्याढे

इत्यत्राढ इत्यनेन स्त्रीभ्यो ढक्येव पुंवत्वनिषेधादिह पुंवत्त्वम् ।

१८५. कालेभ्यो भववत् । ४-२-३४ ॥

भवार्थे 'कालाट्ठञ्' (४-३-११) इत्याद्या वक्ष्यन्ते । ते तत्रापि स्युः । ठञि मासदेवत्यं मासिकम् ।

१८६. प्रावृष एण्यः । ४-३-१७ ॥

प्रावृषेण्यम् ।

१८७. महाराजप्रोष्ठपदाभ्यां ठञ् । ४-२-३५ ॥

महाराजः कुबेरः । तद्देवत्यं माहाराजिकम् । प्रौष्ठपदिकम् । तन्नक्षत्रदेवत्यम् ।

तदस्मिन्वर्तत इति नवयज्ञादिभ्यः ठञ्वाच्यः ।

नवयज्ञ आग्रयणम् । तदस्मिन् वर्तत इति नावयज्ञिकः शरत्कालः । पाकयज्ञिकं गृहम् ।

१८८. पितृव्यमातुलमातामहपितामहाः । ४-२-३६ ॥

एते निपात्यन्ते । अन्त्ययोष्फित्वं वाच्यम् । मातामही । पितामही ।

अवेर्दुग्धे सोढदूसमरीसचः ।

अवेः क्षीरमविसोढम् । अत्र प्रत्ययस्य चत्वं नेष्टम् । एवं अविदूसम् । अविमरीसम् ।

तिलात्पिष्फलात्पिञ्जपेजौ ।

फलशून्यो व्यर्थो वा तिलः तिलपिञ्जः । तिलपेजः ।

१८९. तस्य समूहः । ४-२-३७ ॥

षष्ठ्यन्तात्समूहार्थेऽण्यादि स्यात् । काकानां समूहः काकम् । वाकम् ।

१९०. भिक्षादिभ्योऽण् । ४-२-३८ ॥

एभ्यो वक्ष्यमाणबाधकोऽण् स्यात् । भिक्षाक्षेत्रकरीषगर्भिणीदक्षिणाङ्गारसहस्राथर्वन्चर्मन्युवतिपदातिपद्धतिभ्यः । भिक्षासमूहो भैक्षम् । क्षैत्रम् । कारीषम् ।

भस्याढे तद्धिते

इति पुंवत्वात् गर्भिण्याः ङीन्निवृत्तिः । गर्भिन् अ । 'इनणि' (६-४-१६४) इति प्रकृतिभावः । गार्भिणम् । दक्षिणासमूहो दाक्षिणम् । आङ्गारम् । साहस्रम् । आथर्वणम् । चार्मणम् । युवतेरिह पुंवत्वं वेष्टम् । यौवतम् । यौवनम् । पादातम् । पाद्धतम् ।

१९१. गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्स-मनुष्याजाद्धुञ् । ४-२-३९ ॥

अपत्याधिकारादन्यत्र गोत्रशब्दः अपत्यमात्रार्थः । औपगवानां समूह औपगवकम् । एवं गार्ग्य अक ।

१९२. आपत्यस्य च तद्धितेऽनाति । ६-४-१५१ ॥

अनाकारादौ दद्धिते परे हलः परस्यापत्ययकारस्य लोपः स्यात् । गार्गकम् । आकारादौ तु गार्ग्यायण इति यलोपो न । औक्षकम् । औष्ट्रकम् । उरभ्रो मेषः । औरभ्रकम् । राजकम् । राजन्यकम् । वात्सकम् । मानुष्यकम् । आजकम् ।

वृद्धाच्चेति वाच्यम् ।

वार्द्धकम् ।

राजन्यमनुष्ययोः 'आपत्यस्य' (६-४-१५१) इति यलोपे प्राप्ते

प्रकृत्याके राजन्यमनुष्ययुवानः ।

इति प्रकृतिभावः । सामूहिके तदन्तविधिरिष्यते । कौरुराजकम् । गौवात्सिकम् ।

१९३. केदाराद्यञ्च । ४-२-४० ॥

वुञ् च स्यात् । कैदार्यम् । कैदारकम् ।

गणिकायाश्च यञ्वाच्यः ।

गाणिक्यम् ।

१९४. ठञ्कवचिनश्च । ४-२-४१ ॥

अस्मात्केदाराच्च समूहे ठञ् । 'नस्तद्धिते' (६-४-१४४) कावचिकम् । कैदारिकम् ।

१९५. ब्राह्मणमाणवबाडवाद्यन् । ४-२-४२ ॥

ब्राह्मणसमूहो ब्राह्मण्यम् । माणव्यम् । बाडव्यम् ।

वृषाच्चेष्टम् ।

वृषसमूहो वृष्यम् ।

अहः खः क्रतौ ।

अहन् ईन ।

१९६. अह्नष्टखोरेव । ६-४-१४५ ॥

अस्य टखयोः परयोरेव टिलोपः स्यात् । अह्नां समूहरूपः क्रतुः अहीनः ।

पृष्ठाद्यः ।

पृष्ठाख्यानां साम्नां समूहरूपः क्रतुः पृष्ठ्यः । पृष्ठास्थानां समूहः पृष्ठ्यम् इत्यन्ये ।

पर्शोर्णस्वाच्यः ।

१९७. सिति च । १-४-१६ ॥

सिति प्रत्यये परे पूर्वं पदाख्यम् । इति पदत्वेन भत्वाभावात् ओर्गुणो न । पार्श्वास्थीनि पर्शवः । तत्समूहः पार्श्वम् ।

१९८. ग्रामजनबन्धुसहायेभ्यस्तल् । ४-२-४३ ॥

तलन्तं स्त्रियामेव । ग्रामसमूहो ग्रामता इत्यादि ।

गजाच्चेति वाच्यम् ।

गजता ।

१९९. अनुदात्तादेरञ् । ४-२-४४ ॥

अनुदात्तादित्वं स्वरशास्त्रगम्यम् । कापोतम् । मायूरम् । तैत्तिरम् ।

२००. खण्डिकादिभ्यश्च । ४-२-४५ ॥

अञ् स्यात् । खण्डिकाहन्हलवन्धयुगवरत्राबडवामिक्षुकशुकोलूकस्रवभ्यः । खण्डिका दात्रम् । तत्समूहः खाण्डिकम् । 'अह्नष्टखोरेव' (६-४-१४५) इति नियमादिह लोपाभावः ।

२०१. अल्लोपोऽनः । ६-४-१३४ ॥

अन्नन्तस्य भस्य अल्लोपः स्यात् । अह्नां समूहः आह्नम् । हालवन्धम् । युगवरत्रेति व्यस्तं समस्तं च । यौगम् । वारत्रम् । यौगवारत्रम् । अनन्त्यात् 'अन्' (६-४-१६७) इति प्रकृतिभावो न । द्वारादित्वादैच् । शौवम् ।

क्षुद्रकमालवात्सेनायाम् ।

क्षुद्रका मालवाश्च क्षत्रियाः । तेषां समूहरूपा सेना क्षौद्रकमालवी ।

२०२. चरणेभ्यो धर्मवत् । ४-२-४६ ॥

'तस्येदम्' (४-३-१२०) इत्यारभ्य तस्य धर्म इत्यर्थे चरणेभ्यो वुञ् । छन्दोगादेर्ण्य इत्यादि वक्ष्यते । तत्समूहेऽपि तथैव स्यात् । शाखाभेदकृताः कठादिसंज्ञाः चरणाख्याः । वुञि कठानां समूहः काठकम् । छन्दोगानां छान्दोग्यं इत्यादि ।

२०३. अचित्तहस्तिधेनोष्ठक् । ४-२-४७ ॥

अचेतनेभ्यः आपूपिकम् । पार्वतिकम् । 'नस्तद्धिते' (६-४-१४४) हास्तिकम् । उगन्तत्वात् ठस्य कः । धैनुकम् । सामूहिके तदन्तविधिप्रकृतेः वानहस्तिकम् । सुधेनूनां समूह इत्यत्र

२०४. जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् । ७-३-२५ ॥

एतत्प्रत्यान्तस्याङ्गस्य वृद्धिनिमित्ततद्धिते परे पूर्वपदवृद्धिः स्यात् । उत्तरपदस्य तु वा स्यात् । सौधैनुकम् । सौधेनुकम् ।

धेनोरनञ इति वाच्यम् ।

इति ठगभावे अणि प्राग्वद्वृद्धिः । आधैनवम् । आधेनवम् ।

२०५. केशाश्वाभ्यां यञ्छावन्यतरस्याम् । ४-२-४८ ॥

आभ्यां क्रमात् यञ्छौ वा स्तः । कैश्यम् । अचित्तत्वात् कैशिकम् । अश्वीयम् । आश्वम् ।

२०६. पाशादिभ्यो यः । ४-२-४९ ॥

पाशतृणधूमाङ्गारशलवातपिटकपिटाकपटाकशकटहलनडवनेभ्यश्च । समूहे 'इनित्रकट्यच' (४-२-५१) इति लिङ्गशास्त्रात् स्त्रीत्वम् । पाशानां समूहः पाश्या । तृण्या । धूम्या । अङ्गार्या । शल्यं शल्यरोम । शल्या । पटाकः पताका । पटाक्या । टीकासर्वस्वे तु गळ-समूहो गळघा । पोटगलो नलतृणम् । तत्समूहः पोटगल्या इति चोक्तम् ।

२०७. खलगोरथात् । ४-२-५० ॥

एभ्यो यः स्यात् । खल्या । गव्या । रथ्या ।

२०८. इनित्रकट्यचश्च । ४-२-५१ ॥

खलादेः क्रमादेते च स्युः । प्राग्वत् स्त्रीत्वम् । खलिनी । गोत्रा । रथकट्या । इनिस्तु अन्येभ्योऽपि । उलूकिनी । रथिनी । ऊकोन्दुमौ समूहार्थौ । समूहस्यानेकत्वविवक्षायां ऊकिनी । उन्दुमिनी ।

२०९. विषयो देशे । ४-२-५२ ॥

कस्यचिन्नियतोऽर्थो विषयः । षष्ठ्यन्तात् तस्य नियतो देश इत्यर्थेऽण् स्यात् । शिबीनां देशः शैबः ।

२१०. राजन्यादिभ्यो वुञ् । ४-२-५३ ॥

राजन्यानां नियतो देशो राजन्यकः ।

एवं मालवकास्त्रैगर्तकः शैलूषकस्तथा ।
शालङ्कायनको वाभ्रव्यको वैराटकादयः ॥

२११. मौरिक्याद्येषुकार्यादिभ्यो विधल्भक्तलौ । ४-२-५४ ॥

क्रमात् स्तः । मौरिकीणां देशो मौरिकिविधः । मौलिकिविधः । ऐषुकारिभक्तः । सौवीर-भक्त इत्यादि ।

२१२. सोऽस्यादिरिति च्छन्दसः प्रगाथेषु । ४-२-५५ ॥

छन्दोवाचिभ्यः सोऽस्यादिरित्यर्थे प्रगाथे वाच्येऽण् स्यात् । अनुष्टुबादिः यस्य प्रगाथस्य स आनुष्टुभः । बार्हतः । ऋक्संघातः प्रगाथाख्यः ।

छन्दसः स्वार्थे क्लीबेऽण् वाच्यः ।

अनुष्टुबेव आनुष्टुभम् । गायत्रम् ।

२१३. संग्रामे प्रयोजनयोद्धृभ्यः । ४-२-५६ ॥

सोऽस्य प्रयोजनं सोऽस्य योद्धेति चार्थे संग्रामे वाच्येऽणादि स्यात् । सुभद्रा प्रयोजनमस्य सौभद्रो रणः । भरता योद्धारोऽस्य भारतं युद्धम् । एवं स्त्रीप्रयोजनः स्त्रैणो रणः ।

२१४. तदस्यां प्रहरणमिति क्रीडायां णः । ४-२-५७ ॥

तदस्यां प्रहरणसाधनमित्यर्थे क्रीडायां वाच्यायां णः स्यात् । अणि ङीभ्यात् ण उक्तः । दण्डः प्रहरणं अस्यां क्रीडायामिति दाण्डा । मौष्टा ।

२१५. घञः सास्यां क्रियेति ञः । ४-२-५८ ॥

घञन्तात्सा क्रियास्यामस्तीत्यर्थे ञः स्यात् । अस्यामित्युक्तया स्त्रीलिङ्गमेव विशेष्यम् । ध्वजपातः क्रिया अस्यामस्तीति ध्वाजपाता तिथिः । मौसलपाता भूमिः ।

२१६. श्येनतिलस्य पाते ञे । ६-३-७१ ॥

आन्ते पातशब्दे परे अनयोर्मुम् स्यात् । श्येनपातोऽस्यामस्तीति श्यैनंपाता मृगया । तैलंपाता पितृक्रिया ।

२१७. तदधीते तद्वेद । ४-२-५९ ॥

अनयोरर्थयोरण् स्यात् । प्रायेण अन्यपरेभ्य एवेदम् । व्याकरणमधीते वैयाकरणः । 'न य्वाभ्याम्' (७-३-३) इत्यैच् । निमित्तं वेद नैमित्तः । तैतिल्यादिभिः कृताः तैतिलि-जाजलि-लाङ्गलिनो नाम ग्रन्थाः । तानधीते इत्यणि 'इनणि' (६-४-१६४) इति प्रकृतिभावे प्राप्ते

सत्रब्रह्मचारिपीठसर्पिष्कलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणां टिलोपो वाच्यः ।

तैतिलः । जाजलः । लाङ्गलः । द्वौ वेदौ अधीते द्विवेदः । 'द्विगोर्लुगनपत्ये' (४-१-८८) इत्यणो लुक् ।

२१८. क्रतूक्थादिसूत्रान्ताट्ठक् । ४-२-६० ॥

क्रतुनाम्नः उक्थादेः सूत्रान्ताच्च अर्थद्वये ठक् स्यात् । अग्निष्टोममधीते वेद वा इति आग्निष्टोमिकः । वाजपेयिकः । क्रतुभिः तद्विधिभागो लक्ष्यते । उक्थाख्यं सामलक्षणं अधीते वेद वा औक्थिकः । सूत्रान्तात् सांग्रहसूत्रिकः । कल्पसूत्रात्तु अण् इष्टः । काल्पसूत्रः । उक्थादिस्तु उक्थलोकायतन्यायन्यासपुनरुक्तयज्ञचर्काक्रमेतरश्लक्ष्णसंहितासंघाटपदक्रमेभ्यः । औक्थिकः । लौकायतिकः । ऐच् । नैयायिकः । नैयासिकः । पुनरुक्तस्य लक्षणमधीयानः पौनरुक्तिकः । याज्ञिकः । चर्चा विचारग्रन्थः । चार्चिकः । क्रमादन्यत्सर्वमधीयन् क्रामेतरिकः । श्लाक्ष्णिकः । सांहितिकः । सांघाटिकः । तुल्यौ । पादक्रमिकः ।

वृत्तिसंग्रहायुर्वेदगुणगणानुपदद्विपदज्योतिषगणितानुमूलक्ष्यलक्षणेभ्यः ।

वार्तिकः । सांग्रहिकः । आयुर्वैदिकः । गुणश्री गुणी इति हरः । गौणिकः । गणपाठो गणः । गाणिकः । आनुपदिकः । सन्दिश्ये द्विपदं जानन् द्वैपदिकः । ज्यौतिषिकः । गाणितिकः । अनुसूत्रं ग्रन्थः । उगन्तत्वाट्टस्य कः ।

२१९. केऽणः । ७-४-१३ ॥

कप्रत्यये परेऽणो ह्रस्वः स्यात् । आनुलुकः । लाक्षियकः । लाक्षणिकः । मौहूर्तिकश्चोक्थादिरिति स्वामी ।

आख्यानाख्यायिकाभ्याम् ।

एते कथाभेदौ । यवक्रीत इति आख्यानम् । वासवदत्ता इति आख्यायिका । यावक्रीतिकः । वासवदत्तिकः ।

इतिहासपुराणाभ्याम् ।

ऐतिहासिकः । पौराणिकः ।

लक्षणकल्पान्तात् ।

आश्वलक्षणिकः । मान्तकल्पिकः ।

विद्यान्तादनङ्क्षत्रधर्मत्रिपूर्वात् ।

शब्दविद्यां विदन् शाब्दविधिकः । अङ्गादिपूर्वात्तु अङ्गेव : आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । त्रिभागा विद्या त्रिविद्या वेदत्रयम् । तद्वित् त्रैविद्यः । द्विगुत्वे तु 'द्विगोर्लुक्' (४-१-८८) इत्यणो लुकि त्रिविद्य इत्येव ।

पदोत्तरपदाट्ठञ् ।

प्रगृह्यपदिकः ।

शतषष्ट्यादेः पथः षिकन् ।

शतपथं ब्राह्मणमेदः । शतपथिकः । षष्टिपथिकः । षित्त्वात् शतपथिकी । शातपथ इत्यण-पीति नाथः ।

सर्वसादेर्लुक् ।

सर्ववेदानधीयन् सर्ववेदः । सशब्दादेस्तु सवार्तिकमधीयन् सवार्तिकः ।

२२०. क्रमादिभ्यो वुन् । ४-२-६१ ॥

क्रमपदशिक्षामीमांसासामभ्यः । क्रममधीते वेद वा क्रमकः । पदकः । शिक्षकः । मीमांसकः । सामकः ।

२२१. अनुब्राह्मणादिनिः । ४-२-६२ ॥

ब्राह्मणसदृशं ग्रन्थमधीते अनुब्राह्मणी ।

२२२. वसन्तादिभ्यष्ठक् । ४-२-६३ ॥

वसन्तवर्षाशरद्धेमन्तशिशिरप्रथमचरमानुगुणकल्पार्थवेभ्यः । वसन्तेऽध्येयः तद्गुणनरूपो वा ग्रन्थो वासन्तः । तमधीते वासन्तिकः । वार्षिकः । प्रथमं भागं विदन् प्राथमिकः । चारमिकः । आनुगुणिकः । आर्थवणिकः । अस्य दाण्डिनाद्युक्त्या टिलोपाभावः ।

२२३. प्रोक्ताल्लुक् । ४-२-६४ ॥

तेन प्रोक्तमित्यर्थे प्रत्यया वक्ष्यन्ते । तदन्तादध्येतृवेदितृभ्यो जातस्य प्रत्ययस्य लुक् स्यात् । पाणिनिना प्रोक्तं पाणिनीयम् । तदधीते वेद वा पाणिनीयः । स्त्रियां पाणिनीया । अण्य-लुप्ते ङीष्स्यादिति भेदः ।

२२४. सूत्राच्च कोपधात् । ४-२-६५ ॥

कोपधात्सूत्रवाचकादर्थद्वये प्रत्ययस्य लुक् स्यात् । संख्याकनन्तादेवेष्टम् । अष्टकमिति पाणिनीयम् । तदधीत इत्यष्टकः ।

२२५. छन्दोब्राह्मणानि च तद्विषयाणि । ४-२-६६ ॥

प्रोक्तप्रत्ययान्तानि यानि वेद ब्राह्मणानि तान्यध्येतृवेदितृत्वयुक्तान्येव प्रयुज्यन्ते । न स्वयम् । 'तेन प्रोक्तम्' (४-३-१०१) इत्यत्र तित्तिर्याश्छण् वक्ष्यते । तित्तिरिप्रोक्तं वेदमधीयते तैत्तिरीया इत्येव प्रयोग्यम् । तित्तिरिभिः प्रोक्तं तैत्तिरीयं इत्येतावन्न प्रयोग्यमित्यर्थः । प्रोक्ताधिकारे चेदं विस्तरिष्यते । छन्दोब्राह्मणेभ्योऽन्यत्र तु पाणिनिना प्रोक्तं पाणिनीयं सूत्रम् । शौनकीया शिक्षा इत्येतावत्प्रयोगोऽप्यस्ति । यजूंषि तैत्तिरीयाणि इति मुरार्युक्तिस्तु तित्तिरीणां समूहः तैत्तिरम् । तत्संबन्धि तैत्तिरीयम् । इति वृद्धाच्छेन साध्या इति ।

२२६. तदस्मिन्नस्तीति देशे तन्नाम्नि । ४-२-६७ ॥

तदस्मिन्नस्तीत्यर्थे देशे वाच्येऽण् स्यात् । उदुम्बरवत्त्वात् औदुम्बरो नाम देशः ।

२२७. तेन निर्वृत्तम् । ४-२-६८ ॥

अत्रार्थे देशनाम्नि अण् । तेनेति हेतौ कर्तरि वा तृतीया । सहस्रेण निर्वृत्ता साहस्री परिखा । कुशाम्बेन कृता कौशाम्बी नगरी ।

२२८. तस्य निवासः । ४-२-६९ ॥

अत्रार्थेऽपि देशनाम्नि अण् । ऋजुनावां निवासः आर्जुनावः ।

२२९. अदूरभवश्च । ४-२-७० ॥

तस्यादूरभव इत्यर्थेऽपि देशनाम्नि अण् । विदिशाया अदूरं नगरं वैदिशम् । शेषात्सप्तमीषु चतुर्ष्वर्थेषु तुल्यं प्रत्ययाः ।

२३०. ओरञ् । ४-२-७१ ॥

उवर्णान्ताच्चातुरर्थिकः अञ् स्यात् । अणञोः स्वरे भेदः । कृकटेलुशब्दात् कार्कटेलवम् ।

२३१. मतोश्च बह्वजङ्गात् । ४-२-७२ ॥

बह्वच्प्रकृतिको यो मतुप् तदन्तादुक्तार्थेष्वञ् स्यात् । शार्यणावतम् । शर्यणावान्नाम सरः ।

२३२. बह्वचः कूपेषु । ४-२-७३ ॥

बह्वचः शब्दात् कूपनाम्न्यञ् । दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः कूपः ।

२३३. उदक्च विपाशः । ४-२-७४ ॥

विपाश उदक्कूलजेषु कूपेषु वाच्येषु अबह्वचोऽप्यञ् । दत्तेन निर्वृत्तो दात्तः कूपः ।

२३४. सङ्कलादिभ्यश्च । ४-२-७५ ॥

एभ्यश्चातुरर्थिकः अञ् । सङ्कलेन निर्वृत्तः सांकलः इत्यादि ।

२३५. स्त्रीषु सौवीरसाल्वप्राक्षु । ४-२-७६ ॥

सौवीरगेषु साल्वगेषु प्राग्देशगेषु च स्त्रीलिङ्गेषु देशेषु वाच्येष्वञ् । सौवीरे दत्तामित्रकृता दात्तामित्री नगरी । साल्वे वैधूमाग्नी तत्कृता । प्राक्षु ककन्दकृता काकन्दी पूः ।

२३६. सुवास्त्वादिभ्योऽण् । ४-२-७७ ॥

ओरञ्यपवादः । सुवास्तोर्नेद्या अदूरं सौवास्तवं नगरं इत्यादि ।

२३७. रोणी । ४-२-७८ ॥

रोणीशब्दात्कूपात् अञ्बाधकोऽण् । रौणः कूपः । तदन्तादपि । आजकरौणः ।

२३८. कोपधाच्च । ४-२-७९ ॥

अण् स्यात् । कुकवाकुकृतं कार्किवाकवम् । कार्णच्छिद्रकः कूपः । ओरञि कूपाञि च प्राप्तेऽण् ।

२३९. वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ण्यकक्ठको-
ऽरीहणकुशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबल-
पक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः । ४-२-८० ॥

अरीहणादिभ्यः सप्तदशभ्यो गणेभ्यः क्रमात् वुञादयः सप्तदश स्युः । अरीहणादेर्वुञ् । आरीहणकम् । द्रौघणकम् । कुशाश्वादेश्छण् । कार्शाश्वीयम् । ऋश्यादेः कः । ऋश्यकम् । अश्मकम् । कुमुदादेः ठच् । कुमुदिकम् । काशादेरिलः ।

काशिलो वनिलः कर्पूरिलः कर्दमिलस्तथा ।
पलाशिलः कण्टकिलस्तृणिलो देशवाचकाः ॥

तृणादेः सः । तृणसः । प्रेक्षादेरिनिः । प्रेक्षी । अश्मादेः रः । अश्मरम् । सख्यादेर्ढञ् । साखेयम् । सङ्काशादेर्ण्यः । साङ्काश्यः । काम्पिल्यः । बलादेर्यः । बल्यम् । पक्षादेः फक्ङ । पाक्षायणः । कर्णादेः फिञ् । कार्णायनिः । सुतङ्गमादेरिञ् । सौतङ्गमिः । इञः स्त्रियां ङीष् वाच्यः । तेन सौतङ्गमी इति नगर्यादौ । प्रगदिन्नादेर्ण्यः । 'नस्तद्धिते' (६-४-१४४) प्रागद्यम् । वराहादेः कक् । वाराहकम् । कुमुदादेष्ठक् । कौमुदिकम् । देशनामत्वादप्रसिद्धेर्गणानुक्तिः ।

२४०. जनपदे लुप् । ४-२-८१ ॥

जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात् । 'लुपि युक्तवत्' (१-२-५१) इति प्रकृतिवल्लिङ्गवचने । कुरूणां निवासो जनपदः कुरवः । प्रकृतेर्बहुत्वाद्बहुवचनम् ।

२४१ विशेषणानां चाजातेः । १-२-५२ ॥

विशेषणानां च प्रकृतिवल्लिङ्गवचने स्तः । रम्याः कुरवः । जातिवाचिनां तु जनपदनीवृदादीनां स्वलिङ्गवचने एव । कुरवो नीवृत् । एवं प्राक्तनमतेनोक्तमेव निराचष्टे पाणिनिः ।

२४२. तदशिष्यं संज्ञाप्रमाणत्वात् । १-२-५३ ॥

लुपि प्रकृतिवल्लिङ्गवचने इत्येतन्न विधेयम् । दाराः इत्यादिवत् कुरवः इत्यादीनामपि संज्ञाप्रमाण्यादेव सिद्धेः ।

२४३. लुब्योगाप्रख्यानात् । १-२-५४ ॥

जनपदे लुप् इति लुबप्यशिष्यः । कुरूणां निवासः इत्यादियोगार्थस्याप्रख्यानाद्बुद्धिमात्रस्यैव प्रतीतेः इति ।

२४४. योगप्रमाणे च तदभावेऽदर्शनं स्यात् । १-२-५५ ॥

शब्दे च कुर्वादियोगस्य वाचके सति तत्कुलोच्छेदे संज्ञाया अभावः स्यात् । दृश्यते च नन्देषूच्छिन्नेष्वपि जनपदस्य तत्संज्ञा इति । वैदिशो जनपदः औदुम्बर इत्यादौ लुम्नेष्टः ।

२४५. वरणादिभ्यश्च । ४-२-८२ ॥

एभ्यश्चातुरर्थिकस्य लुप् स्यात् । वरणानामदूरं नगरं वरणाः । शिरीषाः । ग्रामः अस्य शैरीषकः । शिरीषक इति चेष्टम् । गोदौ नाम ह्रदौ । तयोरदूरभवो गोदौ ग्रामः । प्रकृतेः द्वित्त्वाल्लुपि द्वित्वम् ।

एवं तक्षशिलोपान्तभूमिस्तक्षशिला किल ।
मधुरोज्जयिनीकाञ्चीत्याद्याकृतिगणस्त्वयम् ॥

खलतिको विन्ध्यः । तस्यादूरभवानि खलतिकं वनानि । खलतिकादेर्लुपि वचनमेव प्रकृतिवदित्येकवचनम् । लिङ्गं तु वनस्यैव ।

२४६. शर्कराया वा । ४-२-८३ ॥

अणो वा लुप् । शर्करालास्तीति शर्करा अयं देशः । शार्करः ।

२४७. ठक्छौ च । ४-२-८४ ॥

शार्करिकः । शर्करीयः । कुमुदादित्वाट्ठच् । वराहादित्वात्कक्वास्ति । ठचि शर्करिकः । ककि 'केऽणः' (७-४-१३) इति ह्रस्वः । शार्करिकः ।

२४८. नद्यां मतुप् । ४-२-८५ ॥

नद्यां वाच्यायां उक्तार्थेषु अण्बाधको मतुप् स्यात् ।

२४९. मतौ बह्वचोऽनजिरादीनाम् । ६-३-११९ ॥

अजिरादिवर्जितस्य बह्वचश्शब्दस्य मतौ परे नाम्नि दीर्घः स्यात् ।

२५०. मादुपधायाश्च मतोर्वोऽयवादिभ्यः । ८-२-९ ॥

मान्तान्मोपधादवर्णान्तादवर्णोपधाच्च यवादिवर्जिताच्छब्दात्परस्य मतोरादेर्वः स्यात् ।

उदुम्बरावती नाम नदी । वीरणावती । अजिरादेस्तु न दीर्घः । अजिरवती । पुलिनवती ।

२५१. शरादीनां च । ६-३-१२० ॥

एषां मतौ नाम्नि दीर्घः स्यात् । शरावती नदी ।

एवं मुनीवती सिन्धुः कपीवत्यप्यहीवती ।
संज्ञायामिति सूत्रेण नाम्नि वत्वमिदं मतोः ॥
भागीरथी भैमरथी तन्निवृत्तं नदीद्वयम् ।
तत्र नद्यां मतुम्नेष्टो निवृत्तेऽणेव चेष्यते ॥

२५२. मध्वादिभ्यश्च । ४-२-८६ ॥

एभ्यश्चातुरर्थिको मतुप् । मधुमान् देशः । बिसवान् ॥

२५३. कुमुदनडवेतसेभ्यो ड्मतुप् । ४-२-८७ ॥

डित्त्वाट्टिलोपः । कुमुद्मत् ।

२५४. झयः । ८-२-१० ॥

झयः परस्य मतोर्वः स्यात् । कुमुद्वान् देशः । नड्वान् । वेतस्वान् । अत्र अदुपधत्वाद्वः ।

महिषाच्चेति वाच्यम् ।

महिष्मान्नाम देशः ।

२५५. नडशादाड्ड्वलच् । ४-२-८८ ॥

टिलोपः । नड्वलः । शादः शष्पः । तद्वान् शाद्वलः । शाद्वला दूर्वा इति नीलत्वोपचारात् ।

२५६. शिखाया वलच् । ४-२-८९ ॥

शिखावलं नाम नगरम् ।

२५७. उत्करादिभ्यश्छः । ४-२-९० ॥

उत्करीयो देशः । पिप्पलीयः ।

२५८. नडादीनां कुक् च । ४-२-९१ ॥

एषां छः कुक् च । नडप्लक्षबिल्ववेणुवेत्रवेतसतृणकाष्ठेक्षुकपोतानाम् । नडकीयम् । प्लक्षकीयम् । बिल्वकीयम् । वेणुकीयम् । इत्यादि ।

कुच्छाया ह्रस्वश्च ।

कुच्छकीयम् ।

तक्ष्णो नलोपश्च ।

तक्षकीयम् । एषु बिल्वकीयादीनां भवाद्यर्थेऽणि कृते

२५९. बिल्वकादिभ्यश्छस्य लुक् । ६-४-१५३ ॥

एभ्यः परस्य छस्य भसंज्ञानिमित्ते तद्धिते परे लुक् स्यात् । बिल्वकीये भवो वैल्वकः । वैणुकः इति ।

२६०. शेषे । ४-२-९२ ॥

इतः परं शिष्टेषु तत्सजातादितस्येदमन्तेषु अर्थेषु तुल्यं प्रत्यया उच्यन्ते । अन्यान्योऽप्यर्थः । उक्तादन्यत्रार्थेऽण्यण् स्यात् । चक्षुषा गृह्यत इति चाक्षुषं रूपम् । श्रावणः शब्दः । दृषदि पिष्टाः दार्षदाः सक्तवः । उलूखले क्षुण्णाः औलूखलाः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरः शकटः । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । कुणपमत्ति कौणपः । शृङ्गारे त्वणोऽन्येऽपि उक्तादन्यत्रार्थे दर्शिताः । कलिं कुर्वन्ति अस्मै इति कालेयं गन्धद्रव्यम् । अग्निः पतत्यस्मात् आग्नेयो व्रणः । नद्यः स्यन्दन्तेऽस्मान्नादेयः शैलः । कृक्षिं रक्षन्त्यस्मात् कौक्षेयकः कृपाणः ।

२६१. राष्ट्रावारपाराद्घखौ । ४-२-९३ ॥

आभ्यां शेषे जाताद्यर्थे क्रमात् घखौ स्तः । राष्ट्रियः । अवारपारीणः । अर्वाक्तीरमवारम् । परतीरं पारम् ।

व्यस्ताद्विपर्यस्ताच्च ।

अवारीणः । पारीणः । पारावारीणः ।

२६२. ग्रामाद्यखञौ । ४-२-९४ ॥

ग्राम्यः । ग्रामीणः । कव्यादित्वात् ग्रामेयकोऽपि ।

२६३. कव्यादिभ्यो ढकञ् । ४-२-९५ ॥

ढस्य एय् । कव्युम्भिकुम्भिकुण्डिनपुष्करपुष्कलमोदनमाहिष्मतीवर्मतीनगरग्रामेभ्यः । कुत्सितास्त्रयः कतयः । तेषु जातादिः कातेयकः । कत्रिरिति बहुव्रीहिर्वेति हरः । औम्भेयकः । कौम्भेयकः । कौण्डिनेयकः । पौष्करेयकः । पौष्कलेयकः । मौदनेयकः । माहिष्मतेयकः । वार्मतेयकः । नागरेयकः । संज्ञाशब्दान्नगरादेव ढकञ् । प्रसिद्धात्तु नागरः ।

कुल्याया यलोपश्च ।

कौलेयकं जलम् ।

२६४. कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । ४-२-९६ ॥

कुले गृहे भवत्वात् कौलेयकः श्वा । कौक्षेयकः खड्गः । ग्रैवेयको ग्रीवालङ्कारः ।

२६५. नद्यादिभ्यो ढक् । ४-२-९७ ॥

नदीमहीश्रावस्तीवाराणसीकौशाम्बीवनकौशाम्बीसाल्वापूर्वनगरीपूर्वनगिरिभ्यः । नादेयः । माहेयः । श्रावस्तेयः । वाराणसेयः । कौशाम्बेयः । वानकौशाम्बेयः । साल्वेयः । पौर्वनगरेयः । पौरेयः । वानेयः । गैरेयः ।

बडवाया वृषे ।

बडवायाः पतित्वेन सम्बन्धी बाडवेयो वृषः ।

२६६. दक्षिणापश्चात्पुरसस्त्यक् । ४-२-९८ ॥

दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ।

२६७. कापिश्याः ष्फक् । ४-२-९९ ॥

कापिशीदेशजातं कापिशायनं मधु । षित्त्वात् कापिशायनी द्राक्षा ।

बाह्वादिपर्दादिभ्यश्चेति वाच्यम् ।

बाह्वायनः । औदायनः । पादायनः ।

२६८. रङ्कोरमनुष्येऽण् च । ४-२-१०० ॥

जनपदार्थादस्मादमनुष्ये प्राणिनि वाच्येऽण् प्फक्च स्यात् । राङ्कवो मेषः । राङ्कवायणी गौः । अप्राणिनि तु अण् । राङ्कवः कम्बलः । वार्तिकमते तु तत्रापि प्फगस्ति । राङ्कवायणः कम्बलः ।

२६९. द्युप्रागपागुदक्प्रतीचो यत् । ४-२-१०१ ॥

दिवादेर्यत्स्यात् । दिव्यम् । प्राच्यम् । अपाच्यम् ।

२७०. उद ईत् । ६-४-१३९ ॥

उदः परस्य अच्शब्दस्य भत्व आदेरीत्स्यात् । उदीच्यम् । प्रतीच्यम् ।

२७१. कन्थायाष्ठक् । ४-२-१०२ ॥

कन्थास्थे ग्रामे भवं कान्थिकम् ।

२७२. वर्णौ वुक् । ४-२-१०३ ॥

वर्णसंज्ञनदसमीपगात् कन्थाग्रामात् वुक् स्यात् । कान्थकम् ।

२७३. अव्ययात्त्यप् । ४-२-१०४ ॥

अमेहक्वतसिल्त्रेभ्यः त्यब्विधिः परिगण्यते ।

अमात्यः । इहत्यः । क्वत्यः । तसिलन्तात् कुतस्त्यः । ततस्त्यः । त्रान्तात् तत्रत्यः । यत्रत्यः । अस्य परिगणनस्य प्रायिकत्वात् प्रातस्त्यस्तूर्यनाद इत्याहुः । अन्याव्ययात्त्वण् । उपरिष्टाद्भव औपरिष्टः । पारस्तः ।

अव्ययानां भमात्रे टिलोपो वाच्यः ।

नेर्ध्रुवे ।

त्यप् स्यात् । नित्यः ।

निसो निर्गते ।

निसृत्यः ।

२७४. ह्रस्वात्तादौ तद्धिते । ८-३-१०१ ॥

तकारादौ तद्धिते परे ह्रस्वादिणः परस्य षः स्यात् । त्यप्तयतल्तयतस्तमतस्सु इष्यते । निष्ठ्यो वर्णाश्रमेभ्यो निर्गतः चण्डालादिः ।

आविषच्छन्दसीत्येतल्लोकेऽपीत्याह भोजराट् ।

प्राग्वत् षः । आविष्ठ्यः प्रकाशे भवः ।

अरण्याण्णो वाच्यः ।

तेन ङीब्न । आरण्याः लताः ।

दूरादेत्यः ।

दूरेत्यः पथिकः ।

उत्तरादाहञ् ।

औत्तराहः ।

२७५. ऐषमोह्यःश्वसोऽन्यतरस्याम् । ४-२-१०५ ॥

एभ्यो वा त्यप् । अस्मिन् वत्सरे भवं ऐषमस्त्यम् । ह्यस्त्यम् । श्वस्त्यम् । वा इत्युक्तेः वक्ष्यमाणौ ट्युट्युलौ तुट् च । ऐषमस्तनम् । ह्यस्तनम् । श्वस्तनम् ।

२७६. तीररूप्योत्तरपदादञ्जौ । ४-२-१०६ ॥

तीरोत्तरपदात् रूप्योत्तरपदाच्च क्रमादेतौ स्तः । अजि पल्वलतीरे भवं पाल्वलतीरम् । ञे शैवरूप्यम् । अञो ङीब्भेदः ।

२७७. दिक्पूर्वपदादसंज्ञायां ञः । ४-२-१०७ ॥

पूर्वशालायां भवः पौर्वशालः । संज्ञारूपात्तु न । प्राग्देशे पूर्वकृष्णमृत्तिकाख्यो ग्रामः । तस्मादणि कृते 'उत्तरपदस्य' (७-३-१०) इत्यधिकारे

२७८. प्राचां ग्रामनगराणाम् । ७-३-१४ ॥

दिक्शब्दात्परेषां प्राग्देशजग्रामनगराणां वृद्धिकृत्तद्धिते परे उत्तरपदादिवृद्धिः स्यात् । पूर्वकार्ष्णमृत्तिकः । नगरात्तु पूर्वकान्याकुब्जः ।

२७९. मद्रेभ्योऽञ् । ४-२-१०८ ॥

दिक्पूर्वपदान्मद्रशब्दादञ् । आपरमद्रः ।

२८०. उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् । ४-२-१०९ ॥

अञ् स्यात् । शैवपुरम् ।

२८१. प्रस्थोत्तरपदपलद्यादिकोपधादण् । ४-२-११० ॥

प्रस्थोत्तरपदात् पलद्यादेः कोपधाच्च पूर्वेणाञि प्राप्ते अण् स्यात् । माहकीप्रस्थः । पालदः । कोपधात् नैलीनकः ।

२८२. कण्वादिभ्यो गोत्रे । ४-२-१११ ॥

गर्गाद्यन्तर्गणात् गोत्रयञन्तात् कण्वादेरण् स्यात् । वृद्धाच्छापवादः । काण्व्यस्येदं काण्वम् । 'आपत्यस्य' (६-४-१५१) इति यलोपः ।

शाकलस्याचेष्टम् ।

शाकलम् ।

२८३. इञश्च । ४-२-११२ ॥

इञन्तादपत्यवाचिनोऽण् । दाक्षेरिदं दाक्षम् । गोत्रप्रत्ययान्तात्समासेऽपि असमस्तवत्प्रत्ययो वाच्यः । आर्यदाक्षेरिदं आर्यदाक्षं इति दाक्षिवदेवाण् ।

आसुरेश्छो वाच्यः ।

असुरस्यापत्यं आसुरिः । तस्येदं आसुरीयम् ।

२८४. न द्व्यचः प्राच्यभरतेषु । ४-२-११३ ॥

प्राग्देशजानां भरतानां च गोत्रवचनात् द्व्यचः इञन्तादण् न । पैङ्गेरिदं पैङ्गीयं इति वृद्धाच्छ एव । एवं भरतेषु ऊह्यम् ।

२८५. वृद्धाच्छः । ४-२-११४ ॥

वृद्धेभ्यः शेषेऽर्थे छः स्यात् । मालीयः । शैषिकात्सरूपः शैषिको नेष्टः । तेन मालीये भव

इत्यत्र पुनश्छो न । विरूपस्तु स्यात् । राष्ट्रियीयः । संज्ञापूर्वत्वात् वृद्धाच्छोऽनित्यः । द्वारपालस्येदं दौवारपालं धनम् । श्वादंष्ट्रायां भवः शौवादंष्ट्रः । द्वारादौ । गोत्रप्रत्ययान्तादसमस्तवदिति काश्यपीयवत् परमकाश्यर्षाय इत्यपि छः ।

जिह्वाकात्यहरीतकात्यवर्जम् ।

इत्युक्तेः तयोरणेव । जैह्वाकातः । हारीतकातः । आपत्यलोपः । 'त्यदादीनि च' (१-१-७४) इति वृद्धत्वात् त्यदीयम् । तदीयम् । द्वीयम् । किमीयम् ।

२८६. एङ् प्राचां देशे । १-१-७५ ॥

एङ् यस्यादामादिः स प्राग्देशवाचकः शब्दो वृद्धसंज्ञः । भोजकटीयः ।

वा नामधेयस्य वृद्धसंज्ञा

इति नळीयः । नाळः ।

२८७. भवतष्ठक्छसौ । ४-२-११५ ॥

त्यदादिगतभवच्छब्दस्यैतौ स्तः । तान्तत्वात् ठस्य कः । भावत्कम् । 'सिति च' (१-४-१६) इति पदत्वाज्जश् । भवदीयम् । अत्र स्त्रियां पुंवत्त्वं वाच्यम् । भवत्या इदं भावत्कम् । भवदीयम् ।

२८८. काश्यादिभ्यष्ठञ्ञिठौ । ४-२-११६ ॥

एभ्यः ठञ् ञिठ इति स्तः । ञिठस्येकार उक्तार्थः । द्वयोः ञित्त्वं वृद्ध्यर्थम् । ञिठस्य ङीब्नेति भेदः । काशिकः । चैदिकः । स्त्रियां काशिकी । काशिका ।

आपदादिपूर्वात्कालात् ठञ्ञिठाविष्टौ ।

आपत्कालिकी । आपत्कालिका । एवं और्ध्वकालिकतात्कालिकौ ।

२८९. वाहीकग्रामेभ्यश्च । ४-२-११७ ॥

वृद्धेभ्यो म्लेच्छग्रामेभ्यः ठञ्ञिठौ स्तः । मान्धविकी । मान्धविका ।

२९०. विभाषोशीनरेषु । ४-२-११८ ॥

उशीनरगतात् वृद्धम्लेच्छग्रामाद्वा ठञ्ञिठौ । आह्वजालिकः । स्त्रियां प्राग्वत् । वा इति 'वृद्धाच्छः' (४-२-११४) आह्वजालीयः ।

२९१. ओर्देशे ठञ् । ४-२-११९ ॥

उवर्णान्ताद्देशाद्ठञ् । उगन्तात्कः । 'केऽणः' (७-४-१३) शम्बरजम्ब्वां भवं शाम्बर-जम्बुकम् ।

२९२. वृद्धात्प्राचाम् । ४-२-१२० ॥

प्राग्देशे तु उवर्णान्तात् वृद्धादेव ठञ् । नापितवास्तुकः । अवृद्धात्तु अणेव । मलवास्तोः मालवास्तवः ।

२९३. धन्वयोपधाद्वुञ् । ४-२-१२१ ॥

मरोर्योपधाच्च वृद्धादेशात् वुञ् । पारेधन्वाख्ये मरुदेशे जातः पारेधन्वकः । योपधात् साङ्काश्यकः ।

२९४. प्रस्थपुरवहान्ताच्च । ४-२-१२२ ॥

एतत्त्रयान्तात् वृद्धादेशाद्वुञ् । मालाप्रस्थकः । नान्दीपुरकः । फल्गुनीवहकः ।

२९५. रोपधेताः प्राचाम् । ४-२-१२३ ॥

रोपधादीदन्ताच्च वृद्धात्प्राग्देशाद्वुञ् । पाटलिपुत्रकः । ऐकचक्रकः । 'एङ् प्राचाम्' (१-१-७५) इति वृद्धता । काकन्दीभवः काकन्दकः ।

२९६. जनपदतदवध्योश्च । ४-२-१२४ ॥

वृद्धाज्जनपदाज्जनपदावधेश्च वुञ् । आभिसारकः । त्रैगर्तो जनपदावधिभूतोऽन्तरजनपदः । तत्र जातः त्रैगर्तकः । जनपदावधेरपि ग्रामादेर्नेष्टम् ।

२९७. अवृद्धादपि बहुवचनविषयात् । ४-२-१२५ ॥

अवृद्धादपि बहुवचननियतात् जनपदात् तदवधेश्च वुञ् । पञ्चालेषु भवः पाञ्चालकः । तदवधेः आजमीढकः ।

सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ।

इति तदन्तविधेस्तत्पूर्वादपि जनपदात् वुञ् । सुपञ्चालेषु भव इत्यत्र

२९८. सुसर्वार्धाज्जनपदस्य । ७-३-१२ ॥

एभ्यः परस्य जनपदस्य वृद्धिर्कृत्तद्धिते परे उत्तरपदवृद्धिः स्यात् । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः ।

२९९. दिशोऽमद्राणाम् । ७-३-१३ ॥

दिक्शब्दात्परेषाममद्राणां जनपदानामुत्तरपदवृद्धिः स्यात् । पूर्वपाञ्चालकः । अपरपाञ्चालकः । मद्रात्तु मद्रेभ्योऽञि पौर्वमद्रः ।

३००. कच्छाग्निवक्त्रवर्तोत्तरपादात् । ४-२-१२६ ॥

कच्छाद्युत्तरपदाद्देशाद्वुञ् । दारुकच्छकः । काण्डाग्निकः । ऐन्दुवक्त्रकः । बाहुवर्तकः ।

३०१. धूमादिभ्यश्च । ४-२-१२७ ॥

एभ्यो देशेभ्यो वुञ् । धौमकः । आन्तरीपकः । धौषकः । औज्जयिनकः । दाक्षिणापथकः । साकेतकः । पाथेयस्येदं पाथेयकम् । शरीरावयवः कुक्षिशब्दो धूमादिः इति हरः । कुक्षौ जातं कौक्षकम् । विदेहानतोऽदेशार्थादपि वुञ् । विदेहानां राज्ञामिदं वैदेहकम् । आनर्तकम् ।

समुद्राज्ञावि मनुष्ये च ।

सामुद्रकः तज्जातमनुष्यः । सामुद्रिका समुद्रनौः ।

३०२. नगरात्कुत्सनप्रावीण्ययोः । ४-२-१२८ ॥

नगरजुषां छलादीनां कुत्सितत्वं बहुपरिचयात्प्रावीण्यं चास्ति । तयोर्द्योत्ययोर्नगराद्वुञ् । नागरकेण मुषितं स्यात् । नागरकेण सा वशीकृता स्यात् ।

३०३. अरण्यान्मनुष्ये । ४-२-१२९ ॥

वुञ् स्यात् । आरण्यको नरः ।

पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् ।

आरण्यकः पन्थाः । वनेऽध्येतव्यः आरण्यकः अध्यायः । इत्यादि ।

वा गोमयेषु ।

आरण्यका आरण्या वा गोमयाः । एभ्योऽन्यत्र तु आरण्याः पशवः ।

३०४. विभाषा कुरुयुगन्धराभ्याम् । ४-२-१३० ॥

आभ्यां वा वुञ् । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः ।

३०५. मद्रवृज्योः कन् । ४-२-१३१ ॥

मद्रेषु जातादिः मद्रकः । वृजिकः ।

३०६. कोपधादण् । ४-२-१३२ ॥

कोपधाद्देशादणेव । ऋषिकेषु जातः आर्षिकः । ऐक्ष्वाकः । अवृद्धादपीति वुञि ओर्देशे ठञि च प्राप्ते अण् ।

३०७. कच्छादिभ्यश्च । ४-२-१३३ ॥

एभ्यो देशेभ्योऽणेव । कच्छकुरुसिन्धुसिन्ध्वन्तगन्धारिकुलूतमधुमद्वर्णुरङ्कुद्वीपानूपसाल्वेभ्योऽण् । काच्छः । कौरवः । सैन्धवः । सिन्ध्वन्तस्य 'हृद्भग' (६-३-१९) इति उभयपदवृद्धिः । साक्तु-सैन्धवः । गान्धारः । कौलूतः । माधुमतः । वार्णवः । राङ्कवः । द्वैपः । आनूपः । साल्वः । द्वीपस्य धूमादित्त्वात् द्वैपकोऽपि ।

३०८. मनुष्यतत्स्थयोर्वुञ् । ४-२-१३४ ॥

कच्छादेर्मनुष्ये तत्स्थे च वाच्ये वुञ् । काच्छको मनुष्यः । काच्छकं हसितम् । कौरवको नरः । कौरविका चूडा इत्यादि ।

३०९. अपदातौ साल्वात् । ४-२-१३५ ॥

साल्वान्मनुष्यतत्स्थयोर्वुञ् । पदातौ वाच्ये न । साल्वको नरः । साल्वकं जल्पितम् । पदातिस्तु कच्छादणि साल्वः ।

३१०. गोयवाग्वोश्च । ४-२-१३६ ॥

साल्वाद्वुञ् । साल्वजातः साल्वको गौः । साल्विका यवागूः ।

३११. गर्तोत्तरपदाच्छः । ४-२-१३७ ॥

देशादित्येव । वृकगर्तीयम् ।

३१२. गहादिभ्यश्च । ४-२-१३८ ॥

एभ्यः छः स्यात् । गहान्तस्थसमविषमोत्तमोत्तरान्तरान्याङ्गवङ्गमगधेभ्यः । गहीयम् । अन्तस्थीयम् । समीयम् । विषमीयम् । उत्तमीयम् । उत्तरीयम् । अन्तरीयम् । अन्यदीयम् । अस्य दुग्धक्ष्यते । अङ्गीयम् । वङ्गीयम् । मगधीयम् । वाल्मीकिसौमित्र्यादेः 'इञश्च' (४-२-११२) इति अणूबाधाय पाठः । वाल्मीकीयम् । सौमित्रीयम् ।

इषोरग्रामीकाभ्याम् ।

इष्वग्रीयम् । इष्वग्रामीयम् ।

एकाद्वृक्षपलाशिकाभ्याम् ।

एकवृक्षीयम् । एकपलाशिकीयम् ।

समानाच्च ग्रामात् ।

समानग्रामीयम् । एकग्रामीयम् ।

अधमोत्तमाभ्यां च शाखात् ।

चकारादेकसमानाभ्यां च । बहुव्रीहित्वात् ह्रस्वत्वम् । एकशाखेषु भवं एकशाखीयम् । एवं समानशाखीयम् । अधमशाखीयम् । उत्तमशाखीयम् ।

पूर्वापराभ्यां च पक्षात् ।

पूर्वपक्षीयम् । अपरपक्षीयम् । अस्याकृतिगणत्वात् सुरपक्षीय इत्यादयपि ।

पृथिवीमध्यस्य मध्यमश्च ।

पृथिवीमध्यभवं मध्यमीयम् ।

एकमुखपार्श्वैर्भ्यस्तसः ।

अव्ययानां भमात्रे टिलोपः ।

एकतो भवं एकतीयम् । मुखतीयम् । पार्श्वतीयम् ।

स्वपरजनदेवानां कृङ् च ।

स्वकीयम् । परकीयम् । जनकीयम् । देवकीयम् । आगमानित्यत्वात् स्वीयमपि । गहादेराकृतिगणत्वात् मतुबर्थे भवं मतुबर्थीयं मत्वर्थीयं चेति हरः ।

वेणुकादिभ्यश्छण्वाच्यः ।

वैणुकीयम् । औत्तरपदकीयम् ।

३१३. प्राचां कटादेः । ४-२-१३९ ॥

कटादेः प्राग्देशशब्दाच्छः । कटसार्वीयम् ।

३१४. राज्ञः क च । ४-२-१४० ॥

राज्ञः छः । नस्य कत्वं च । राजकीयम् ।

३१५. वृद्धाट्टकेकान्तखोपधात् । ४-२-१४१ ॥

अकान्तादिकान्तात् खोपधाच्च वृद्धात् प्राग्देशात् छः । जनपदवुञाद्यपवादः । ब्राह्मणको नाम देशः । ब्राह्मणकीयम् । आश्वत्थिकीयम् । कोटिशिखीयम् । 'एङ् प्राचाम्' (१-१-७५) इति वृद्धता । अकेकान्तादित्यत्र कोपधादिति वाच्यम् । सौमुकीयम् ।

३१६. कन्थापलदनगरग्रामह्रदोत्तरपदात् । ४-२-१४२ ॥

कन्थाद्युत्तरपदाद्वृद्धाद्देशाच्छः । दाक्षिकन्थीयम् । माहुकिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिहदीयम् । वृद्धत्वेऽपि च्छौकिरेषां वाहिकग्रामत्वाद्ढञ्ञिठबाधार्था ।

३१७. पर्वताच्च । ४-२-१४३ ॥

पर्वतभवः पर्वतीयो राजा ।

३१८. विभाषामनुष्ये । ४-२-१४४ ॥

पर्वतादमनुष्ये वाच्ये वा छः । पर्वतीयं पार्वतं वा फलम् , मनुष्ये तु पूर्वेण छ एव ।

३१९. कृकणपर्णाद्भारद्वाजे । ४-२-१४५ ॥

भारद्वाजदेशाभ्यामाभ्यां छः । कृकणीयम् । पर्णीयम् । अन्यदेशे कार्कणम् । पार्णम् ।

इति चतुर्थे द्वितीयः ।

३२०. युष्मदस्मदोरन्यतरस्यां खञ्छ । ४-३-१ ॥

अनयोः शेषे खञ् छश्च वा स्यात् । विकल्पादण् च ।

३२१. तस्मिन्नणि च युष्माकास्माकौ । ४-३-२ ॥

खञ्यणि च परे युष्मदस्मदोरेतावादेशौ स्तः । यस्येति लोपः । खञि यौष्माकीणम् । आस्माकीनम् । अणि यौष्माकम् । आस्माकम् । छे आदेशाभावात् युष्मदीयम् । अस्मदीयम् ।

३२२. तवकममकावेकवचने । ४-३-३ ॥

खञ्यणि च परे एकार्थयोर्युष्मदस्मदोरेतौ स्तः । तावकीनम् । मामकीनम् । तावकम् । मामकम् । छे तु

३२३. प्रत्ययोत्तरपदयोश्च । ७-२-९८ ॥

प्रत्यये उत्तरपदे च परे एकार्थयोर्युष्मदस्मदोर्मकारपर्यन्तस्य भागस्य त्व म इत्यादेशौ स्तः । त्व अद् ईय म अद् ईय । 'अतो गुणे' । (६-१-९७) । त्वदीयम् । मदीयम् । उत्तरपदे परे तु त्वमादेशः । त्वत्प्रिया । मत्प्रिया इति ।

३२४. अर्धाद्यत् । ४-३-४ ॥

अर्धे भवमर्ध्यम् ।

सपूर्वपदाद्ब्वाच्यः ।

राज्यार्धिकम् ।

३२५. परावराधमोत्तमपूर्वाच्च । ४-३-५ ॥

परादिपूर्वादर्धाद्यत् । परार्ध्यं उत्तमार्ध्यं च उत्कृष्टभागभवम् । अवरार्ध्यं अधमार्ध्यं च निकृष्टभवम् । परार्धसंख्यमूल्यसम्बन्धि वा परार्ध्यं रत्नम् । अवरार्धात् स्वार्थेऽपि यदिष्टः । अवरार्धमेवावरार्ध्यम् ।

३२६. दिक्पूर्वपदाट्ठञ्च । ४-३-६ ॥

दिक्पूर्वपदादर्धाट्ठञ् यच्च । पौर्वार्धिकम् । पूर्वार्ध्यम् ।

३२७. ग्रामजनपदैकदेशादञ्ठञौ । ४-३-७ ॥

ग्रामजनपदयोरंशवाचकाद्दिक्पूर्वाधशब्दादञ्ठञौ स्तः । अस्य ग्रामस्य पौर्वार्धा विप्राः । पौर्वार्धिकाः । एवं जनपदेऽपि ।

३२८. मध्यान्मः ॥ ४-३-८ ॥

मध्ये भवो मध्यमः ।

आदेश्च वाच्यम् ।

आदिमः ।

अवोऽधसोरन्त्यलोपश्च ।

अवमम् । अधमम् ।

३२९. अ साम्प्रतिके । ४-३-९ ॥

उत्कृष्टनीचयोर्मध्ये भवः साम्प्रतिको मतः ।
तस्मिन्वाच्ये मध्यशब्दाद स्यान्मध्या वधूरियम् ॥

३३०. द्वीपादनुसमुद्रं यञ् । ४-३-१० ॥

समुद्रसमीपे समुद्रान्तर्वा यो द्वीपः तस्मात् यञ् स्यात् । द्वैप्यो दासः शको वा । अन्यत्र द्वैपो नद्यां वेतसः ।

३३१. कालाट्ठञ् । ४-३-११ ॥

कालवाचिभ्यः शेषे ठञ् स्यात् । मासिकम् । सांवत्सरिकम् । लक्षणया कालवृत्तिभ्योऽपीष्टम् । कदम्बपुष्पमिति लक्षणया प्रावृत् । तत्र भवं कादम्बपुष्पिकम् । एवं शरद्भवं त्रैहिपलालिकम् ।

कार्तिकेयो विवस्वानित्यस्ति कार्तिकमासजे ।
तत्र कालाट्ठञि प्राप्ते ढो मुख्य इति वामनः ॥
शार्वरं तम इत्याद्यप्यसाध्वेवेति सोऽब्रवीत् ।
वस्तुतश्चेत् कार्तिकिको भानुः शार्वरिकं तमः ॥
एवं पार्विक इत्येव पार्वणश्चन्द्र इत्यसत् ।
स्याद्वा चातुर्दशं रक्ष इतिवच्छेष इत्यणि ॥

३३२. श्राद्धे शरदः । ४-३-१२ ॥

अस्माच्छ्राद्धे वाच्ये ठञ् । शारदिकं श्राद्धम् । शारदोऽन्यः ।

३३३. विभाषा रोगातपयोः । ४-३-१३ ॥

शारदिकः शारदो वा रोग आतपश्च ।

३३४. निशाप्रदोषाभ्यां च । ४-३-१४ ॥

वा ठञ् । नैशिकम् । नैशम् । प्रादोषिकम् । प्रादोषम् ।

३३५. श्वसस्तुट् च । ४-३-१५ ॥

श्वश्शब्दात् वा ठञ् । तस्येके कृते तुडागमश्च । श्वस्तिकम् । द्वारादित्त्वादैच् । शौवस्तिकम् । वेत्युक्तेः श्वस्तनम् ।

३३६. सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् । ४-३-१६ ॥

एभ्यः कालत्वाट्ठञि प्राप्तेऽण् । सन्धिवेलासन्ध्यात्रयोदशीचतुर्दशीपञ्चदशीपौर्णमास्यमावास्याप्रतिपद्भ्यः । सन्धिवेलायां भवं सान्धिवेलम् । सान्ध्यम् तुल्यार्थे । प्रातिपदम् । प्रतिपदशब्दात्तु कालाट्ठञि प्रातिपदिकश्चन्द्रः ।

संवत्सरात्फलपर्वणोः ।

सांवत्सरं फलं पर्व वा । ऋतुभ्यस्तु ग्रैष्मम् । शैशिरम् । ग्रीष्मस्य पूर्वो भागः पूर्वग्रीष्मः । तत्राण् ।

३३७. अवयवाद्तोः । ७-३-११ ॥

अवयवात्परस्य ऋतोर्वृद्धिप्राप्तावुत्तरपदवृद्धिः स्यात् । पूर्वग्रैष्मः । अपरग्रैष्मः । नक्षत्रात् तैषम् ।

तिष्यपुष्ययोर्नक्षत्राणि ।

इति यलोपः ।

३३८. प्रावृष एण्यः । ४-३-१७ ॥

प्रावृषेण्यम् ।

३३९. वर्षाभ्यष्ठक् । ४-३-१८ ॥

वार्षिकम् ।

३४०. सर्वत्राण् च तलोपश्च । ४-३-२२ ॥

हेमन्तशब्दाल्लोकवेदयोष्ठञ् च स्यात् । अणि तलोपः । तलोपं विना च स्यात् । हैमनम् ।

३४१. सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्टयुटयुलौ तुट् च । ४-३-२३ ॥

सायमादिभ्यः कालवाच्यव्ययाच्च ट्युटयुलौ स्तः । तयोस्तुट् च । द्वयोः स्वरे भेदः । टो ङीवर्थः । योरने कृते तुट् । सायंतनम् । चिरन्तनम् । प्राह्णेतनम् । प्रगेतनम् । निपातनान्मान्तत्वमेत्वञ्च । अव्ययात् दोषातनम् । श्वस्तनम् । पाक्षनम् । कालार्थस्य प्रागादेरनव्ययत्वे कालाट्ठञेव । प्राचिकम् । पुराशब्दस्य पुरातनम् । पुराणप्रोक्तेष्वित्युक्तेस्तुडभावोऽपि ।

चिरपरुत्परारिभ्यस्त्नो वाच्यः ।

चिरत्नम् । अतीताब्दभवं परुत्नम् । तत्पूर्वाब्दभवं परारित्नम् ।

प्रगस्य लोपश्च ।

प्रातर्भवं प्रत्नम् ।

अग्रपश्चाड्डिमच् ।

अग्रिमम् । पश्चिमम् ।

अन्ताच्च ।

अन्तिमम् ।

३४२. विभाषा पूर्वाह्णापराह्णाभ्याम् । ४-३-२४ ॥

आभ्यां वा ट्युटयुलौ तुट् च । प्राह्णतनम् । अपराह्णतनम् ।

३४३. घकालतनेषु कालनाम्नः । ६-३-१७ ॥

घसंज्ञकयोस्तरप्तमपोः कालशब्दे तने च परे सप्तम्या अलुग्वा स्यात् । तेन पूर्वाह्णेतनम् । अपराह्णेतनं इत्यपि । वेत्युक्तेः कालाट्ठञ् । पौर्वाह्णिकम् । आपराह्णिकम् । एते शौषिका जातादिषु यथार्हं योज्याः ।

३४४. तत्र जातः । ४-३-२५ ॥

अस्मिन्नर्थे प्राग्दीव्यतीया अणादयः शैषिका घादयश्च स्युः । मधुरायां जातो माधुरः । 'उत्सादिभ्योऽञ्' (४-२-८६) औत्सः । स्त्रैणः । शैषिके राष्ट्रिय इत्यादि । प्रोष्ठपदासु जात इत्यत्र नक्षत्रेभ्योऽण् ।

३४५. जे प्रोष्ठपदानाम् । ७-३-१८ ॥

प्रोष्ठपदापर्यायाणां जातार्थे वृद्धिकृत्तद्धिते परे उत्तरपदवृद्धिः स्यात् । प्रोष्ठपादः । भद्रपादः ।

३४६. प्रावृषष्ठप् । ४-३-२६ ॥

प्रावृषि जातः प्रावृषिकः ।

३४७. संज्ञायां शरदो वुञ् । ४-३-२७ ॥

शरदि जाताः शारदका नाम दर्भाः सुह्माश्च । अन्यत्रापि शारदो वीरुदः ।

३४८. पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् । ४-३-२८ ॥

एतेभ्यो जाते वुन् । पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः । अत्र संज्ञाधिकारादन्यत्रापि पूर्वाह्णेतनं इत्यादि स्यादित्येके ।

३४९. पथः पन्थ च । ४-३-२९ ॥

वुन् पन्थादेशश्च । पन्थकः ।

३५०. अमावास्याया वा । ४-३-३० ॥

अस्य वा वुन् । अमावास्यकः । सन्धिवेलाद्यृतु आमावास्यः । एकदेशविकृतस्यानन्यत्वात् अमावस्याया अपि । अमावस्यकः । अमावस्यः ।

३५१. अ च । ४-३-३१ ॥

द्वयोरप्रत्ययश्च । अमावास्यः । अमावस्यः ।

३५२. सिन्ध्वपकराभ्यां कन् । ४-३-३२ ॥

सिन्धौ जातः सिन्धुकः । अपकरकः ।

३५३. अणञौ च । ४-३-३३ ॥

द्वाभ्यां क्रमात्तत्तः । सैन्धवः । आपकरः ।

३५४. श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्त-विशाखाषाढाबहुलाल्लुक् । ४-३-३४ ॥

एभ्यो जाते प्रत्ययस्य लुक् स्यात् ।

३५५. लुक् तद्धितलुकि । १-२-४९ ॥

तद्धितलुकि सति अप्रधानस्य स्त्रीप्रत्ययस्य लुक् स्यात् । श्रविष्ठासु जातः श्रविष्ठः । अत्र जातस्यैव प्राधान्यात् श्रविष्ठाया अप्राधान्यम् । अनूराधः । स्वातिः इत्यादि । बहुलाः कृत्तिकाः । तज्जो बहुलः । स्वातीति ङीषन्तस्य ग्रहादङीषन्तादणो लुङ् न इति माधवः । न य्वाभ्यां (७-३-३) इत्यैच् । स्वातौ जातः सौवातः ।

चित्रारेवतीरोहिणीभ्यः स्त्रियां लुग्वाच्यः ।

ततः स्त्रीप्रत्ययस्य लुकि पुनष्टाप् गौरादिङीष् च । चित्रायां जाता चित्रा । रेवती । रोहिणी । पुनर्जातयोः स्त्रीप्रत्यययोः प्राधान्यान्न लुक् । अस्त्रियां लुग्वा इति भोजः । चित्तः । चैत्रः । रेवतः । रैवतः । रोहिणः । रौहिणः ।

फल्गुन्याषाढाभ्यां स्त्रियां टानौ वाच्यौ ।

यस्येति लोपे फल्गुनः । टित्त्वात् ङीप् । फल्गुनी । अषाढा ।

श्रविष्ठाषाढाभ्यां छण्वाच्यः ।

श्राविष्ठीयः । आषाढीयः । श्राविष्ठः । आषाढः । फल्गुनः इत्यणपि भोजोक्तः ।

३५६. स्थानान्तगोशालखरशालाच्च । ४-३-३५ ॥

एभ्यो जातेऽणः लुक् । अश्वस्थानः । गोष्ठजातो गोशालः । खरशालः ।

३५७. वत्सशालाभिजिदश्वयुक्छतभिषजो वा । ४-३-३६ ॥

एभ्योऽणो वा लुक् । वत्सशालः । वात्सशालः । अभिजित् । आभिजितः । अश्वयुक् । आश्वयुजः । शतभिषक् । शातभिषजः ।

अत्राणो वा ङित्त्वं वाच्यम् ।

शातभिषः ।

३५८. नक्षत्रेभ्यो बहुलम् । ४-३-३७ ॥

नक्षत्रेभ्यः परस्य जातप्रत्ययस्य बहुलं लुक् स्यात् ।

मार्गशीर्षज्यैष्ठचैत्रमाघरैवतरौहिणाः ।
अलुकोऽथापभरणश्रावणो वा परेषु लुक् ॥
इति श्रौतमतं वृत्तौ तूक्तो मृगशिरा अपि ।
आर्द्रायुक्तो वुनादिर्यः स तथैव हि सर्वदा ॥

३५९. कृतलब्धक्रीतकुशलाः । ४-३-३८ ॥

तत्र कृत इत्याद्यर्थेऽणादि स्यात् । मधुरायां कृतं क्रीतं लब्धं वा माधुरम् । खड्गे कुशलः खाड्गः । साङ्गीतः । यौधः । एवं राष्ट्रे कृतं राष्ट्रियमित्यादि ।

३६०. प्रायभवः । ४-३-३९ ॥

तत्र प्रायभवेऽर्थेऽणादि स्यात् । मधुरायां प्रायेण भवतीति माधुरः कृष्णः । अनित्यभवः प्रायभवः । नित्यभवस्तत्र भव इति भेदः ।

३६१. उपजानूपकर्णोपनीवेष्ठक् । ४-३-४० ॥

औपजानुकौ बाहू । औपकर्णिकमीक्षितम् । औपनीविकी काञ्ची ।

३६२. सम्भूते । ४-३-४१ ॥

तत्र सम्भूतमित्यर्थे यथार्हं स्युरणादयः ।
उपपन्नं हि सम्भूतं प्रमाणानतिरेकि च ॥

श्रुतावुपपन्नं श्रौतम् । पञ्चरेऽनतिरिक्तप्रमाणं पाञ्चरं पात्रम् ।

३६३. कोशाड्ढञ् । ४-३-४२ ॥

कृमिकोशोद्भवं वासः कौशेयम् ।

कारणे कार्यसद्भावपक्षात्सम्भूततोच्यते ।

विकारे वाच्यमेण्या ढञ् कोशाच्चेत्याह भाष्यकृत् ॥

३६४. कालात्साधुपुष्प्यत्पच्यमानेषु । ४-३-४३ ॥

कालवाचिभ्यः तत्र साधुरित्यादयर्थेष्वणादि स्यात् । हेमन्ते साधुः हैमनः प्रावारः । वसन्ते पुष्प्यन्तीति वासन्त्यः कुन्दलताः । शरदि पच्यमानाः शारदाः शालयः ।

३६५. उप्ते च । ४-३-४४ ॥

कालात् तत्रोप्तमित्यर्थेऽणादिः । हेमन्ते उप्ताः हैमना यवाः ।

३६६. आश्वयुज्या वुञ् । ४-३-४५ ॥

आश्वयुज्यां पौर्णमास्यामुप्ताः आश्वयुजकाः मुद्गाः ।

३६७. ग्रीष्मवसन्तादन्यतरस्याम् । ४-३-४६ ॥

आभ्यामुप्ते वा वुञ् । ग्रैष्मकाः ग्रैष्माः वा शालयः । वासन्तकाः । वासन्ताः ।

३६८. देयमृणे । ४-३-४७ ॥

कालात्तत्र देयमित्यर्थे ऋणे वाच्येऽणादिः । मासिकं ऋणम् ।

३६९. कलाप्यश्वत्थयवबुसाद्वुन् । ४-३-४८ ॥

यदा मयूराः पिञ्छवन्तः स्युः स कालो लक्षणया कलापी । तत्र देयमृणं कलापकम् । एवं अश्वत्थफलवति काले देयमृणमश्वत्थकम् । यवबुसोत्पत्तिकाले देयमृणं यवबुसकम् ।

३७०. ग्रीष्मावरसमाद्वुञ् । ४-३-४९ ॥

ग्रीष्मे देयमृणं ग्रैष्मकम् । अतीतसमायां देयमद्याप्यदत्तं आवरसमकम् । आगामिनां वत्सराणामाद्ये वत्सरे देयं इति हरः ।

३७१. संवत्सराग्रहायणीभ्यां ठञ् च । ४-३-५० ॥

वुञ् च स्यात् । सांवत्सरिकम् । सांवत्सरकम् । आग्रहायणिकम् । आग्रहायणकं ऋणम् ।

३७२. व्याहरति मृगः । ४-३-५१ ॥

कालात्तत्र व्याहरति रौतीत्यर्थे मृगे वाच्येऽण्यादिः । प्रदोषे रौतीति प्रादोषिकः क्रोष्टा । एवं नैशिकः ।

३७३. तदस्य साढम् । ४-३-५२ ॥

कालात्तदस्य सोढमित्यर्थेऽण्यादिः । निशा सोढा अस्येति नैशिको वटुः । निशायामध्ययनमत्र निशा । तदस्य परिचयात् सोढव्यं ज्ञातमित्यर्थः ।

३७४. तत्र भवः । ४-३-५३ ॥

अस्मिन्नर्थेऽण्यादयः स्युः । माधुरः । राष्ट्रियः । शालियः । सरस्वा अणि सारवैक्ष्वाकेति निपातनात् सारवं जलम् ।

३७५. देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । ७-३-१ ॥

एषामाद्यचो वृद्धिप्रसावात्स्यात् । देविकायां भवं दार्विकं जलम् । शांशपम् । एवं दात्यवाह् अ ।

३७६. वाह ऊठ् । ६-४-१३२ ॥

वाह इत्यन्तस्य भस्य ऊठ् इति सम्प्रसारणं स्यात् । इति वस्य ऊत्वम् । 'सम्प्रसारणाच्च' (६-१-१०८) इति आतः पूर्वरूपत्वम् । दात्यऊह् अ । 'एत्येधत्यूठ्सु' (६-१-८९) इति वृद्धिः । दात्यौहः ।

दित्यवाड् द्विनिवर्षो गौर्दात्यौहं तद्भवादिकम् ।
दस्त्यूह इत्युणादेः स्यादात्यूहः पक्षिवाचकः ॥

दार्घसत्रम् । श्रेयसि भवं श्रायसम् । एवं श्रेयसोऽपत्यं श्रायस इत्याद्यपि । एषां तदादाव्यात्त्वम् । दाविकाकूलाः शालयः । शांशपाशाखं फलम् । व्यल्कशो भवः वैयल्कशः । स्वर्भवः सौवः । द्वारादित्वादैच् । अव्ययत्वाट्टिलोपः । कालाट्ठञि टिलोपः । सायंप्रातिकः । पौनःपुनिकः । अव्ययसमुदायत्वाट्टयुट्युलौ नेष्टौ । अव्ययानां टिलोपस्यानित्व-

त्वात् आराद्भवः आरातीयः । 'वृद्धाच्छः' (४-२-११४) 'येषां च विरोधः शाश्वतिकः' (२-४-९) इति सूत्रोक्त्या शाश्वते प्रतिषेधः इति भाष्योक्त्या च तद्द्वयसिद्धिः । असिहत्यायां भवं आसिहात्यं वैरम् । शतकुम्भे गिरौ भवं शातकौम्भं हेम । अनुशतिकादी । शातकुम्भमित्येवान्ये ।

३७७. प्राचां नगरान्ते । ७-३-२४ ॥

प्राग्देशवाचिनि नगरान्ते शब्दे उभयपदवृद्धिः स्यात् । पुण्ड्रनगरे भवः पौण्ड्रनागरः ।

३७८. जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् । ७-३-२५ ॥

कुरुजङ्गलेषु भवः कौरुजाङ्गलः । कौरुजङ्गलः । वलजं गृहद्वारं क्षेत्रञ्च । गौपुरवालजः । गौपुरवलजः ।

३७९. दिगादिभ्यो यत् । ४-३-५४ ॥

दिग्वर्गपूगगणोखामुखजघनवंशानुवंशदेशकालाकाशपक्षसाक्षिभ्यो यत् । दिशि भवं दिश्यम् । वर्ग्यम् । पूग्यम् । गण्यम् । उरस्यम् । मुख्यम् । जघन्यम् । अत्रोत्तमाधमपक्षौ मुखजघनार्थौ । वंश्यम् । अनुवंश्यम् । अल तदन्तविध्यभावात् राजवंश्यादयः साध्वर्थे यति इति वामनः । देश्यम् । काल्यम् । आकाश्यम् । पक्ष्यम् । साक्ष्यम् ।

आद्यन्तान्तरहःपथ्यलोकयूथन्यायमित्रमेघमेघाघाद्यादिभ्यश्च ।

आद्यम् । अन्त्यम् । अन्तरे भवमन्तर्यम् । रहस्यम् । पथ्यम् । अर्लक्यम् । यूथ्यम् । न्याय्यम् । मित्र्यम् । मेध्यम् । मेधो यज्ञः । मेध्यम् । घाय्या भवं घाय्यम् । अप्सु भवमित्यत्र ।

अपो योनिमन्मतुषु

इति यति परे सप्तम्या अलुक् । 'ओर्गुणः' (६-४-१४६) अप्सव्यम् ।

उदकात्संज्ञायाम् ।

उदक्या रजस्वला । अन्यत्र औदको मत्स्यः । दिगादियदन्येभ्योऽपि दृश्यते इति स्वामी । तेन वने भवं वन्यम् । वीज्यम् ।

३८०. शरीरावयवाच्च । ४-३-५५ ॥

यत्स्यात् । जठर्यम् । दन्त्यम् । मूर्ध्न्यम् ।

३८१. पद्यत्यतदर्थे । ६-३-५३ ॥

तादर्थ्यादन्यत्र यति परे पादस्य पद् स्यात् । पादे भवं पाद्यम् । तादर्थ्ये पादार्थं जलं पाद्यमिति वक्ष्यते ।

३८२. ये च तद्धिते । ६-१-६१ ॥

यादौ तद्धिते परे शिरसः शीर्षन्नादेशः स्यात् । शिरसि भवः शीर्ष्यः स्वरः ।

केशेषु वा वाच्यः ।

शीर्ष्याः शिरस्या वा केशाः । विशदाः केशा एवमुच्यन्ते ।

नस्नासिकाया यत्स्क्षुद्रेषु ।

नासिकायां भवं नस्यम् । नासायास्तु नास्यम् ।

वर्णनगरयोर्नेति वाच्यम् ।

नासिक्यो वर्णः । नासिक्यं नगरम् । जाठरोऽग्निः । लालाटं ज्योतिः इत्यादौ 'सोऽस्य निवासः' (४-३-८९) इत्याद्यण् योज्यः ।

३८३. इतिकुक्षिकलशिबस्त्यस्त्यहेर्ढञ् । ४-३-५६ ॥

इतौ भवं दार्तेयम् । कौक्षेयम् । कलशिमन्थनपात्रमिदन्तः इति स्वामी । तत्र भवं कालशेयं तक्रम् । वास्तेयम् । अस्तीति धनार्थमव्ययं इति रामः । आस्तेयो मदः । आहेयम् ।

३८४. ग्रीवाभ्योऽण् च । ४-३-५७ ॥

ग्रीवाशब्दादण् च ढञ् च । ग्रैवम् । ग्रैवेयम् ।

३८५. गम्भीराञ्ञ्यः । ४-३-५८ ॥

गम्भीरे भवं गाम्भीर्यम् ।

पञ्चजनाच्च वाच्यम् ।

तस्मिन्नसुरे भवः पाञ्चजन्यः शङ्खः ।

चतुर्मासाद्यज्ञे ण्यो वाच्यः ।

चतुर्मासभवः चातुर्मास्यो यज्ञः ।

संज्ञायामण् वाच्यः ।

चातुर्मासीति तिस्रः पौर्णमास्य उच्यन्ते ।

३८६. अव्ययीभावाच्च । ४-३-५९ ॥

अव्ययीभावसमासात् भवार्थे ञ्यः स्यात् ।

परिमुखादेरेवेष्टम् ।

परिमुखपर्योष्ठपरिहनुपर्युल्लखलानां वर्जनार्थेऽव्ययीभावः । निपातनात्सर्वतोभावेऽपि इति रामः । सर्वमुखेषु भवः पारिमुख्यः प्रसादः । पार्योष्ठ्यो रागः । पारिहनव्यः प्रहारः । पार्युल्लखल्यास्तण्डुलाः । वर्जनार्थे पारिमुख्यो निचोलः । पार्योष्ठ्यं तैलमित्याद्यूह्यम् । परेः सप्तम्यर्थेऽव्ययीभावः इति माधवः । तत्र तु ओष्ठे भवं पार्योष्ठ्यमित्यादिः स्व्योऽर्थः ।

उपात्स्थूलाकलापाभ्याम् ।

स्थूला हलिः । तत्समीपे भवः औपस्थूल्यो वृषः । औपकलाप्यो बर्हिपक्षः ।

अनोः पथिपदयूपवंशसीतातिलयवमाषभङ्गागङ्गाशरीरेभ्यः ।

पथि भवा आनुपथ्याः सिकताः । आनुपद्यो भृत्यः । आनुयूप्यः पशुः । आनुवंश्यं वृत्तम् । अनुसीतं भवः आनुसीत्यो बीजवापः । आनुतिल्यं तैलम् । आनुयव्यम् । आनुमाष्यम् । आनुभङ्ग्यम् । भङ्गा कुसुम्भम् । आनुगङ्ग्या वाराणसी । आनुशरीर्यः तापः ।

पर्युपानुभ्यः सीरात् ।

पारिसीर्यम् । औपसीर्यम् । आनुसीर्यम् । प्रतिशाखं भवं प्रातिशाख्यं इति च माधवः । औपकर्णं इति च सुभद्राहरणे ।

३८७. अन्तःपूर्वपदाट्ठञ् । ४-३-६० ॥

अन्तःपूर्वपदादव्ययीभावात् भवे ठञ् । अन्तर्गेहं भवं आन्तर्गेहिकम् ।

अन्तःपुरास्त्रीगणार्थाट्ठञ्वाच्यः ।

आन्तःपुरिका । पुरान्तर्भागे भवं आन्तःपुरिकमेव ।

समानाट्ठञ्वाच्यः ।

समानेषु भवः सामानिकः ।

तदादेश्च ।

सामानग्रामिकः । सामानदेशिकः ।

अध्यात्माधिदैवाधिभूतोर्ध्वदेहोर्ध्वन्दमोर्ध्वमुहूर्ता कस्मादमुष्मिंश्छेषकदाचित्कक्वचिदमुत्रपरत्रादिभ्यश्च ।

आध्यात्मिकम् । आधिदैविकम् । आधिभौतिकम् । द्वावनुशतिकादी । और्ध्वदेहिकं प्रेतकर्म । दमादूर्ध्वं भवं और्ध्वन्दमिकं ज्ञानम् । निपातनान्मान्तत्वं मान्तमव्ययं वा । एवं ऊर्ध्वमौहूर्तिकम् । 'लिङ् चोर्ध्वमौहूर्तिके' (३-३-९) इति निपातनादुत्तरपदवृद्धिः । आकस्मिकम् । अस्य दान्तत्वाश्रयणात् कत्वाभावेऽव्ययत्वाट्टिलोपः इति रामः । अमुष्मिन् लोके भवं आमुष्मिकम् । निपातनादलुक् । नान्तत्वाट्टिलोपः । शैषिकम् । तान्तत्वाट्ठस्य कः । कादाचित्कम् । काचित्कम् । आमुत्रिकम् । पारत्रिकम् । आद्युक्तेराकृतिगणोऽयम् । तेन ऐहिकम् । आन्तरालिकम् । चातुरर्थिकम् । सामूहिकम् । देवेषु भवं दैविकम् । वैदिकमिति चाह माधवः । सौवग्रामिकः । सौवनगरिकः ।

द्वारादिषु स्वशब्दोक्तेस्तदादेरपि चैजयम् ।
स्वाभाविकस्वार्थिकादेरैञ् न भाष्यप्रयोगतः ॥

प्रयोगे भवं प्रायोगिकम् । अतिशये भवं आतिशायिकम् । अनुशतिकादी ।

लोकान्ताट्ठञ्वाच्यः ।

ऐहलौकिकम् । पारलौकिकम् । एतावप्यनुशतिकादी ।

मध्यादीयः ।

मध्यीयः ।

मध्यीयौ च ।

शाखादेर्मध्ये भवो माध्यमः । मध्यमीयः । गहादयुक्त्या पृथिवीमध्यजातादिरेव मध्यमीयः स्यादिति भेदः ।

मध्यशब्दस्य मान्तत्वं स्याद्दिनन्प्रत्ययस्तथा ।
मध्यन्दिनाः प्रगायन्ति सदोमध्यमवा इमे ॥

मध्याह्नार्थस्त्वन्यः समासे वक्ष्यते ।

स्थामाजिनान्तेभ्यो भवप्रत्ययस्य लुम्वाच्यः ।

अश्वत्थाग्नि भवः अश्वत्थामा प्रतापः । कृष्णाजिनेभवः कृष्णाजिनो यष्टा । अग्निष्टोमादिभ्यो मन्त्रे इति भोजः । अग्निष्टोमे भवो मन्त्रोऽग्निष्टोमः । राजसूयः । इति ।

३८८. ग्रामात्पर्यनुपूर्वात् । ४-३-६१ ॥

पर्यनुपूर्वात् ग्रामान्तादव्ययीभावाद्ढञ् । पारिग्रामिकम् । आनुग्रामिकम् ।

३८९. जिह्वामूलाङ्गुलेश्छः । ४-३-६२ ॥

जिह्वामूलीयम् । अङ्गुलीयम् ।

३९०. वर्गान्ताच्च । ४-३-६३ ॥

कवर्गीयो वर्णः ।

३९१. अशब्दे यत्खावन्यतरस्याम् । ४-३-६४ ॥

शब्दादन्यत्र वर्गान्ताद्यत्खौ छ च विकल्पतः ।
अरिवर्ग्योऽरिवर्गीणोऽप्यरिवर्गीय इत्यपि ॥

शब्दे तु छ एवोक्तः ।

३९२. कर्णललाटात्कनलङ्कारे । ४-३-६५ ॥

कर्णभवोऽलङ्कारः कर्णिका । ललाटिका । कर्णभवात्स्त्रीत्वम् । भवार्थमाले तु यत् । कर्ण्यम् । ललाट्यम् । समानकालीनम् । उत्तरकालीन इत्यादि । कालान्तात्खो दृश्यते । न च लक्षणं दृष्टम् ।

३९३. तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः । ४-३-६६ ॥

व्याख्येयग्रन्थादिनामभ्यः तस्य व्याख्यान इत्यर्थे तत्प्रभवे चाणादिः स्यात् । करणे ल्युट् । सुपां व्याख्यानग्रन्थः सौपः । तैङः । कार्तः । सुप्सु भवं च सौपम् ।

३९४. बह्वचोऽन्तोदात्ताट्ठञ् । ४-३-६७ ॥

षत्वणत्वयोर्व्याख्यानो ग्रन्थः षात्वणत्विकः । तत्र भवश्चैवम् ।

३९५. क्रतुयज्ञेभ्यश्च । ४-३-६८ ॥

ठञ् स्यात् । अग्निष्टोमार्थकल्पादीनां व्याख्यानस्तत्प्रभवो वा आग्निष्टोमिकः । यज्ञात्तु पाकयज्ञिकः । क्रतवः सोमयागाः । अन्ये यज्ञाः ।

३९६. अध्यायेष्वेवर्षेः । ४-३-६९ ॥

व्याख्येयग्रन्थपराद्वसिनाम्नः उक्तार्थयोरध्याये वाच्ये एव ठञ् स्यात् । वसिष्ठोक्तग्रन्थस्य व्याख्यानं तत्र भवो वा वासिष्ठिकोऽध्यायः ।

३९७. पौरोडाशपुरोडाशात् ष्ठन् । ४-३-७० ॥

पुरोडाशविधिवाक्यं पुरोडाशः । तत्संस्कारमन्त्राः पौरोडाशाः इति माधवः । ताभ्यां उक्तार्थद्वये ष्ठन् स्यात् । षो ङीषर्थः । पौरोडाशिकः । पुरोडाशिकः ।

३९८. छन्दसो यदणौ । ४-३-७१ ॥

छन्दसो व्याख्यानं तद्भवं छन्दस्यम् । छान्दसम् ।

३९९. द्व्यजृङ्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरण-
नामाख्याताट्ठक् । ४-३-७२ ॥

द्व्यचः शब्दाद्दन्ताच्च ब्राह्मणादेश्च ठन्द्वयोः ।
ऐष्टिकः पाशुको द्व्यज्भ्यश्चातुर्होतृक इत्यृतः ॥

ब्राह्मणिकः । आर्चिकः । प्राथमिकः । आध्वरिकः । पौरश्चरणिकः । नामाख्यातयोस्तु व्यस्तयोः समस्तयोश्च । नामिकः । आख्यातिकः । नामाख्यातिकः ।

४००. अणृगयनादिभ्यः । ४-३-७३ ॥

ऋगयनो नाम ग्रन्थः । तद्व्याख्यानं तत्र भवं वा आर्गयनम् । गकारव्यवधानात् 'पूर्वपदात्संज्ञायाम्' (८-४-३) इति णत्वं न । एवं नैरुक्तम् । नैयायम् । वैयाकरणं इत्यादि । 'बह्वचः' (४-३-६७) इत्यादेरपवादोऽयम् ।

४०१. तत आगतः । ४-३-७४ ॥

अस्मिन्नर्थेऽणादिः । मधुरायां आगतो माधुरः । प्रलयस्य अणि 'केकयमित्रयु' (७-३-२) इति यादेरियः । शरदः प्रलयान्नाशादागतं प्रालेयं हिमम् । तस्य हेमन्तजत्वात् मालेयमिति च दृश्यते । कुतः कुतः आगतः कौतस्कुतः । वीप्सादौ द्वित्वम् । कस्कादिसः ।

४०२. ठगायस्थानेभ्यः । ४-३-७५ ॥

आयः स्वामिग्राह्यो भागः । तत्स्थानेभ्य आगते ठक् । आपणिकं धनम् । शौल्कशालिकम् ।

४०३. शुण्डिकादिभ्योऽण् । ४-३-७६ ॥

आयस्थानठकोऽपवादः । शुण्डिका पानभूः । तत आगतं शौण्डिकम् । औदपानम् । तैर्थम् । तार्णम् ।

४०४. विद्यायोनिसम्बन्धेभ्यो वुञ् । ४-३-७७ ॥

विद्यासम्बन्धवचनाद्योनिसम्बन्धवाचकात् ।
आगते वुञ् छैष्यकोऽर्थः पैतामहक इत्यपि ॥

४०५. ऋतष्ठञ् । ४-३-७८ ॥

विद्यायोनिजसम्बन्धवचनाट्ठञ्ञुदन्ततः ।
हौतृकं होतुरायातं मातृकं स्वासृकं तथा ॥

४०६. पितुर्यच्च । ४-३-७९ ॥

ठञ् च स्यात् । रीङि यस्येति लोपः । पित्र्यम् । ठञि पैतृकम् ।

४०७. गोत्रादङ्कवत् । ४-३-८० ॥

तस्येदमर्थे सङ्घाङ्कलक्षणेष्विति वर्णनात् ।
अङ्कशब्देन तस्येदमर्थ एवात्र लक्ष्यते ॥
तत्र गोत्राद्युञादिः स्यात्तद्वदेवागते भवेत् ।
ततश्चौपगवात्प्राप्तं स्यादौपगवकं धनम् ॥

४०८. हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । ४-३-८१ ॥

हेतोर्नृनाम्नश्चागते वा रूप्यप्रत्ययः स्यात् । ज्ञानाद्धेतुभूतादागतं ज्ञानरूप्यम् । ज्ञानीयम् । एवं नलादागतं नलरूप्यम् । नालम् ।

४०९. मयट् च । ४-३-८२ ॥

हेतुमनुष्येभ्य आगते मयट् च स्यात् । ज्ञानमयम् । नलमयम् । तत्र द्विगोर्लुङ् नेष्टः । त्रिवेदरूप्यः त्रिवेदमयो वा धर्मः ।

४१०. प्रभवति । ४-३-८३ ॥

अतः प्रभवतीत्यर्थेऽण् गङ्गा हैमवती यथा ।
तत्र प्रथमदृष्टत्वं प्रभवो न तु जातता ॥

४११. विडूराज् ज्यः । ४-३-८४ ॥

वैडूर्यो मणिः ।

४१२. तद्गच्छति पथिदूतयोः । ४-३-८५ ॥

तदिति द्वितीयान्तात् गच्छतीत्यर्थे मार्गे दूते च वाच्येऽणादिः । मधुरां गच्छन् माधुरः पन्था दूतश्च । तत्स्थानां गमनात् पन्था गच्छतीत्युक्तिः ।

४१३. अभिनिष्क्रामति द्वारम् । ४-३-८६ ॥

तदभिनिष्क्रामतीत्यर्थे द्वारे वाच्येऽणादिः । औद्यानं द्वारम् । पथो गमनवत् द्वारस्याभिनिष्क्रान्तिः ।

४१४. अधिकृत्य कृते ग्रन्थे । ४-३-८७ ॥

तदधिकृत्य कृतो ग्रन्थ इत्यर्थेऽणादिः । भरतानधिकृत्य कृतं भारतम् । शाकुन्तलम् । ज्योतिषमित्यत्र संज्ञापूर्वकत्वादवृद्धिः । उणादि प्रत्ययसत्वान् घः ।

लुबारव्यायिकासु बहुलम् ।

वासवदत्तामधिकृत्य कृता आरव्यायिका वासवदत्ता । बहुलोक्तेः भैमरथी इति न लुप् । तत एवानारव्यायिकासुपि क्वचिल्लुप् । कुमारसम्भवः ।

४१५. शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः । ४-३-८८ ॥

शिशुक्रन्दयमसभशब्दाभ्यां द्वन्द्वसमासादिन्द्रजननादेश्चोक्तेऽर्थेछः स्यात् । शिशूनां क्रन्दनविषयो ग्रन्थः शिशुक्रन्दीयः । यमसभीयः । द्वन्द्वात् किरातार्जुनीयम् । दैवासुरम् । राक्षोऽसुरमित्यादौ छो नेष्टः । इन्द्रजननीयम् । सीतान्वेषणीयम् । प्रद्युम्नागमनीयमित्यादि । आकृतिगणः ।

४१६. सोऽस्य निवासः । ४-३-८९ ॥

मथुरा निवासोऽस्य माथुरः ।

पृथिवीमध्यादण् स्यान्मध्यमभावश्च तस्य चरणेऽर्थे ।
पृथिवीमध्यनिवासाश्चरणाः केचिद्धि माध्यमा नाम ॥

४१७. अभिजनश्च । ४-३-९० ॥

सोऽस्याभिजन इत्यर्थेऽण् माथुरोऽयमिह स्थितः ।
प्राग्वासभूरभिजनो निवासस्त्वस्य वासभूः ॥

४१८. आयुधजीविभ्यश्छः पर्वते । ४-३-९१ ॥

पर्वतनामभ्यः सोऽस्याभिजन इत्यर्थे आयुधजीविनोऽभिधातुश्छः स्यात् । तेषु वाच्येष्वित्यर्थः । गन्धमादनीयाः यौधाः ।

४१९. शाण्डिकादिभ्यो ञ्यः । ४-३-९२ ॥

एभ्यः सोऽस्याभिजन इत्यर्थे ञ्यः । शाण्डिक्यः । शकदेशाभिजनः शाक्यः इत्यादि ।

४२०. सिन्धुतक्षशिलादिभ्योऽणञौ । ४-३-९३ ॥

अणि सैन्धवः । कैष्किन्धः इत्यादि । अञि ताक्षशिलः । पर्वताभिजना पार्वती इत्यादि ।

४२१. तूदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः । ४-३-९४ ॥

उक्तेऽर्थे क्रमात्स्युः । ढक् । तौदेयः । छण् । सालातुरीयः पाणिनिः । ढञ् । वार्मतेयः । यक् । कौचवार्यः ।

४२२. भक्तिः । ४-३-९५ ॥

कर्मणि क्तिन् । सोऽस्य सेव्य इत्यर्थेऽणादिः । विष्णुभक्तिरस्य वैष्णवः । पाशुपतः । स्तैणः ।

४२३. अचित्तादेशकालाट्ठक् । ४-३-९६ ॥

देशकालवर्जितादचेतनादुक्तार्थे ठक् । अपूपो भक्तिरस्य आपूपिकः । पायसिकः । देशकालाभ्यां तु माधुरः । ग्रैष्मः ।

४२४. महाराजाट्ठञ् । ४-३-९७ ॥

महति राजनि कुबेरे वा भक्तो माहाराजिकः ।

४२५. वासुदेवार्जुनाभ्यां वुन् । ४-३-९८ ॥

वासुदेवकोऽहम् । अर्जुनकः ।

४२६. गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । ४-३-९९ ॥

गोत्रात् क्षत्रियनाम्नश्चोक्तार्थे बहुलं वुञ् । म्लौचुकायनिभक्तो म्लौचुकायनकः । क्षत्रियात् नाकुलकः । साहदेवकः । बहुलोक्तेः पाणिनिभक्तः पाणिनीयः इत्यादौ गोत्रादपि वुञ् न ।

४२७. जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने । ४-३-१०० ॥

बहुवचने जनपदेन समानशब्दा ये जनपदस्वामिनस्तेभ्यो भक्त्यर्थे जनपदवत्सर्वं स्यात् । अङ्गा इति जनपदेन समानशब्दा राजानः । ते भक्तिरस्य इत्यञ्चकः । द्वित्वैकत्वयोरप्येवम् ।

आङ्गयोराङ्गे वा भक्तोऽप्याङ्गकः । 'जनपदतदवध्योश्च' (४-२-१२४) इत्याद्युक्तौ वुञ् । एवं 'मद्रवृज्योः कन्' (४-२-१३१) । मद्रराजभक्तो मद्रकः ।

४२८. तेन प्रोक्तम् । ४-३-१०१ ॥

अस्मिन्नर्थेऽणादिः । पाणिनीयं शास्त्रम् । शौनकीया शिक्षा ।

प्रकर्षेणोक्तमेवात्र प्रोक्तं न कृतमेव तत् ।
शास्त्रञ्च सविशेषोक्तं पाणिन्याद्यैर्न तत्कृतम् ॥

भोज आह । अथर्वणोऽण् वेदे । अथर्वणा प्रोक्तो वेद आथर्वणः । लुक् च वा । अथर्वा वेदः । वसिष्ठादिभ्योऽनुवाकादिषु । एभ्योऽनुवाकादिषु वाच्येषु प्रोक्तप्रत्ययस्य वा लुक् । वसिष्ठेन प्रोक्तोऽनुवाकोऽध्यायो वा वसिष्ठः । वासिष्ठः । विश्वामित्रः । वैश्वामित्रः इति ।

४२९. तित्तिरिवरतन्तुखण्डिकोखाच्छण् । ४-३-१०२ ॥

एभ्यः प्रोक्ते छण् । 'छन्दोब्राह्मणानि च तद्विषयाणि' (३-२-६६) इत्यध्येतृवेदितृभ्यर्थयुक्तस्यैव प्रयोगः । तित्तिरिणा प्रोक्तमधीयानास्तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः । छन्दोब्राह्मणानि च इति चकारादिनः परं छन्दोब्राह्मणेभ्योऽन्यत्राप्यध्येतृवेदितृनियम इष्यते ।

४३०. काश्यपकौशिकाभ्यामृषिभ्यां णिनिः । ४-३-१०३ ॥

आभ्यां ऋषिनामभ्यां प्रोक्ते णिनिः । काश्यपेन प्रोक्तं कल्पमधीयानाः काश्यपिनः । कौशिकिनः ।

४३१. कलापिवैशम्पायनान्तेवासिभ्यश्च । ४-३-१०४ ॥

णिनिः स्यात् । कलापिशिष्येण तुम्बुरुणा प्रोक्तमधीयानाः तौम्बुरविणः । वैशम्पायनशिष्येण कमलेन प्रोक्तमधीयानाः कामलिनः ।

४३२. पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । ४-३-१०५ ॥

पुरातनैर्मुनिभिः प्रोक्तेषु ब्राह्मणेषु कल्पेषु च वाच्येषु णिनिः । ऐतरेयेण प्रोक्तं ब्राह्मणमधीयानाः ऐतरेयिणः । पैङ्गयेन प्रोक्तः कल्पः पैङ्गी । अत्र 'आपत्यस्य' (६-४-१५१) इति

यलोपः। तद्विषयता चास्य नेष्टा। अचिरकालेषु तु न। याज्ञवल्क्येन प्रोक्तानि याज्ञवल्क्यानि ब्राह्मणानि। अत्र 'कण्ड्वादिभ्यो गोत्रे' (४-२-१११) इति, शैषिकोऽण्। प्रतिपदविहितानां छणादीनामेव तद्विषयतेत्यणस्तद्विषयता न।

४३३. शौनकादिभ्यश्छन्दसि । ४-३-१०६ ॥

एभ्यः प्रोक्ते वेदे वाच्ये णिनिः। शौनकेन प्रोक्तं छन्दोऽधीयानाः शौनकिनः। वाजसनेयिनः। शार्ङ्गरविणः। छन्दसोऽन्यत्र शौनकीया शिक्षा।

४३४. कठचरकाल्लुक् । ४-३-१०७ ॥

आभ्यां प्रोक्तप्रत्ययस्य लुक्। कठेन प्रोक्तमधीयानाः कठाः। चरकाः। अच्छन्दस्त्वे तु तद्विषयतामावात् चरकेण प्रोक्तं चरकं शास्त्रमित्यपि माधवः। वृत्तौ तु छन्दसि वाच्ये एव लुगुक्तः। 'काठश्चारको वा श्लोकः।

४३५. कलापिनोऽण् । ४-३-१०८ ॥

अस्माद्वैशम्पायनशिष्यादण्। कलापिना प्रोक्तमधीयानाः कालापाः। सत्रह्मचार्यादित्वाट्टिलोपः। माधुरादेश्छबाधार्थमणिष्टः। माधुरेणप्रोक्ता माधुरी वृत्तिः।

४३६. छगलिनो ढिनुक् । ४-३-१०९ ॥

ढमात्रस्य एय्। छगलिन् एयिना 'नस्तद्धिते' (६-४-१४४) छगलिना प्रोक्तमधीयानाश्छागलेयिनः।

४३७. पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । ४-३-११० ॥

आभ्यां क्रमात् तत्प्रोक्तेभिक्षुसूत्रे नटसूत्रे च वाच्ये णिनिः। पाराशर्येण प्रोक्तं वेदान्तसूत्रं अधीयानाः पाराशरिणः। अत्रापत्ययलोपः। शिलालिना प्रोक्तं नटसूत्रमधीयानाः शैलालिनो नटाः।

४३८. कर्मन्दकृशाश्वादिनिः । ४-३-१११ ॥

भिक्षुनटसूत्रयोरेव। कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयानाः कर्मन्दिनो भिक्षवः। एवं कृशाश्विनो नटाः।

४३९. तेनैकदिक् । ४-३-११२ ॥

अस्मिन्नर्थेऽणादिः । सुदाम्ना तुल्यदिग्भवा सौदामनी विद्युत् । सुदामा श्वेतद्वीप इति टीकासर्वस्वे । कश्चिददृष्टिः इति स्वामी । तस्य स्फटिकात्मकत्वात्तद्दृशि बहु प्रकाशत इत्यर्थः ।

४४०. तसिश्च । ४-३-११३ ॥

उक्तार्थे तसिश्च स्यात् । स च स्वरादित्वादव्ययम् । सेतुतो लङ्का । तद्दृशीत्यर्थः ।

४४१. उरसो यच्च । ४-३-११४ ॥

तसिश्च स्यात् । उरस्यो वर्णः । उरस्तः । वर्णस्यान्तर्भावत्वादुरोभवत्वं नास्तीत्येकदिक्त्वमेव ।

४४२. उपज्ञाते । ४-३-११५ ॥

तेन प्रथमं ज्ञात इत्यर्थेऽणादिः । प्राभाकरः पक्षः । तेनैव स्वयं कल्पित इत्यर्थः ।

४४३. कृते ग्रन्थे । ४-३-११६ ॥

तेन कृतो ग्रन्थ इत्यर्थेऽणादिः । भारवीयं काव्यम् ।

४४४. संज्ञायाम् । ४-३-११७ ॥

नाम्नि तेन कृतमित्येतावत्यर्थेऽणादिः । माक्षिकं मधु । सारघम् ।

४४५. कुलालादिभ्यो वुञ् । ४-३-११८ ॥

एभ्यः कृतेऽर्थे नाम्नि वुञ् । कौलालकमिति घटशरावाद्येव । न तत्कृतमन्यत् । मधुना कृतो माधवकः सुराभेदः । परिषदा कृतं पारिषदकमित्यादि ।

४४६. क्षुद्राभ्रमरवटरपादपादञ् । ४-३-११९ ॥

नाम्न्येव । क्षुद्राभिः कृतं क्षौद्रं मधु । भ्रामरं मधु । वाटरम् । पादपम् ।

४४७. तस्येदम् । ४-३-१२० ॥

तस्य सम्बन्धीत्यर्थेऽणादिः । विष्णोरिदं वैष्णवं चक्रम् । एवं पाशुपतम् । बार्हस्पत्यम् । औत्सम् । स्रौणम् । राष्ट्रियम् । शालीयम् । मासिकमिति ।

४४८. गोत्रेऽलुगचि । ४-१-८९ ॥

'यस्कादिभ्यो गोत्रे' (२-४-६३) इत्यादिबहुवचनोक्तो लुगजादौ प्राग्दीव्यतीये प्रत्यये कर्तव्ये न स्यात् । तेन यस्कानामिदमित्यत्रापि यास्केति प्रकृतिः स्यात् । ततो 'वृद्धाच्छः' (४-२-११४) यास्कीयम् । एवं 'अत्रिभृगुकुत्स' (२-४-६५) इति लुक्प्राप्तौ अत्रीणामिदं आत्रेयीयम् । भृगूणामिदं भार्गवीयम् ।

४४९. यूनि लुक् । ४-१-९० ॥

अजादौ प्राग्दीव्यतीये कर्तव्ये युवप्रत्ययस्य लुक् स्यात् । कपिञ्जलादस्य पुत्रः पौत्रश्च कापिञ्जलादिः । ततो यूनि कुर्वादित्वाण्ण्ये कृते कापिञ्जलाद्यः । कापिञ्जलाद्यस्येदमित्यत्र युवप्रत्ययस्य ण्यस्य लुकि इञन्तमेव प्रकृतिः । ततः 'इञश्च' (४-२-११२) इति शैषिकोऽण् वृद्धाच्छं बाधित्वा स्यात् । कापिञ्जलादं धनम् । एवं पाणिनस्यापत्यं युवा पाणिनिः । ततः 'इञश्च' (४-२-११२) इति अणि प्राप्ते युवप्रत्ययस्य इञो लुकि पाणिनशब्दादेव वृद्धाच्छः । पाणिनीयम् ।

४५०. फक्फिञोरन्यतरस्याम् । ४-१-९१ ॥

युवप्रत्ययथोः फक्फिञोरजादौ प्राग्दीव्यतीये कर्तव्ये वा लुक् स्यात् । यूनि 'यञिञोश्च' (४-१-१०१) इति फक् । 'अणो द्व्यचः' (४-१-१५६) इति फिञ् चोक्तः । तयोः वृद्धाच्छे कर्तव्ये वा लुक् । गार्ग्यायणस्येदं गार्गीयम् । गार्ग्यायणीयं वा । कात्यायनेरिदं कात्रीयं कात्यायणीयं वा इति । सत्रब्रह्मचारिण इदं सात्रब्रह्मचारम् । 'इनणि' (६-४-१६४) इति प्रकृतिभावे प्राप्ते सत्रब्रह्मचार्यादिना टिलोपः । एवं यष्टिपीठेन चरन् पङ्ग्वादिः पीठसर्पी । तस्येदं पैठसर्पम् । कौथुमम् । शैलालम् । शैखण्डम् । सौकरसद्मम् । सौपर्वम् । शुनः सङ्कोचः इति टिलोपः । शौवः सङ्कोचः । अन्यत्र शौवनो रवः । द्वारादित्वादैच् । सौर्यस्येदमागस्त्यस्येदमिति वृद्धाच्छे ।

सूर्यागस्त्ययोश्छे ड्याच्च ।

इति यलोपः । सौर्यम् । आगस्तीयम् । मनुष्यस्येदमित्यणि आपत्यस्येति यलोपः । मानुषं जन्म । मानुषस्य तु वृद्धाच्छे मानुषीयम् । उक्षणः इदं औक्षम् । 'औक्षमनपत्ये'

(६-४-१७१) इति निपातनाद्विलोपः । अन्ये तु औक्षणः इत्युक्तम् । स्वादुमृदुन इदं सौवादुमृदवम् । स्वस्येदं सौवम् । स्वरस्येदं सौवरम् । द्वारादयः ।

४५१. न कर्मव्यतिहारे । ७-३-६ ॥

अस्मिन्नर्थे ऐच् न । व्यत्यासेन भवं व्यतिभवनम् । तत्सम्बन्धी व्यातिभवमानः । एवं कर्मव्यतिहारे णचि व्यावहासीत्यादावप्यैच् न । न णचः इत्येव सिद्धे । श्वादस्य संज्ञापूर्वतया वृद्धाच्छाभावादण् ।

४५२. पदान्तस्यान्यतरस्याम् । ७-३-९ ॥

श्वादेः पदशब्दान्तस्याङ्गस्यैच् वा न स्यात् । श्वापदसम्बन्धि श्वापदं शौवापदं वा । न्यङ्कोर्वेति केचित् इति कौमुदी । न्याङ्कवम् । नैयङ्कवम् । सुहृद इदं सौहार्दम् । क्षैरसैन्धवम् । 'हृद्भग' (७-३-१२) इत्युभयपदवृद्धिः । तत्र नदीनमुद्रजनपदाः सिन्धव उक्ताः । सर्वपुरुषाणामिदं सार्वपौरुषम् । अनुशतिकादिः ।

४५३. नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । ७-३-३० ॥

नञ्पूर्वाणामेषां उत्तरपदवृद्धिः स्यात् । पूर्वस्य तु वा स्यात् । अशुचेरिदमाशौचम् । अशौचम् । आनैश्वरम् । अनैश्वरम् । आक्षैत्रज्ञम् । अक्षैत्रज्ञम् । आकौशलम् । अकौशलम् । आनैपुणम् । अनैपुणम् ।

वृद्धिहेतुषु सर्वेषु समानाः प्रक्रियाक्रमाः ।
अर्थाङ्गस्यात्तु कथिता भवतस्येदमर्थयोः ॥

अणिपरे वहेस्तृचृतनोरिड्वाच्यः ।

संवोढुमिदं सांवहित्रम् । वैवहित्रम् ।

अग्नीधश्शरणेरण् भत्वञ्च ।

पदत्वे धस्य जश्त्वं स्यादिति भत्वमिहोच्यते ।
अग्नीधो गृहमाग्नीध्रं तत्स्थः सोऽपि तथोच्यते ॥

समिधामाधानमन्त्रे षेण्यण् ।

यलोपे णत्वनाशादेन्यण् । सामिवेन्यो मन्त्रः । षित्त्वात् ङीषि 'हलः' (६-४-२) इति यलोपे सामिवेनी ऋक् ।

४५४. रथाद्यत् । ४-३-१२१ ॥

रथस्येदं रथ्यम् । चक्रादिरथाङ्ग एवेष्टम् ।

रथसीताहलेभ्यो यद्विधौ

इति तदन्तविधिना सुपर्णरथस्येदं सुपर्णरथ्यम् ।

४५५. पत्पूर्वादञ् । ४-३-१२२ ॥

वाहनपूर्वाद्रथादञ् । अश्वरथस्येदं आश्वरथं युगादि । औष्ट्ररथम् ।

४५६. पत्ताध्वर्युपरिषदश्च । ४-३-१२३ ॥

वाहनवाचिभ्योऽध्वर्युपरिषद्भ्यां चाञ् ।

पत्ताद्राद्य एव ।

उष्ट्रस्यायं वहनीयः औष्ट्रो भारः । अध्वर्योरिदमाध्वर्यवम् । पारिषदम् । परिषदः पृषोदरादित्त्वादिलोपे पर्षत् । तस्याप्येकदेशविकृतत्वादञ् । पार्षदम् ।

४५७. हलसीराट्ठक् । ४-३-१२४ ॥

हलस्येद हालिकम् । सैरिकम् ।

४५८. द्वन्द्वाद्वुन् वैरमैथुनिकयोः । ४-३-१२५ ॥

अनयोर्वाच्ययोर्द्वन्द्वसमासात् वुन् । स्वभावात् स्त्रीत्वम् । काकोलूकयोर्वैरं काकोलूकिका । मैथुनिका विवाहः । अत्रिभरद्वाजानां विवाहः आत्रिभरद्वाजिका ।

वैरे देवासुरादिभ्यो न ।

दैवासुरम् ।

४५९. गोत्रचरणाद्वुञ् । ४-३-१२६ ॥

आम्नां तस्येदमर्थे वुञ् । औपगवस्येदं औपगवकं धनम् ।

चरणाद्धर्माम्नाययोरेव ।

कठानां धर्मः शास्त्रं वा काठकम् । कालापकम् ।

४६०. सङ्घाङ्कलक्षणेष्वञ्ञ्यञिञामण् । ४-३-१२७ ॥

सङ्घादिसम्बन्धिविशेषेषु वाच्येषु अञ्ञ्यञिञन्तेभ्योऽण् ।

अङ्को नाम स्वसम्बन्धिगवादौ कृतमङ्कनम् ।

स्वस्येवाचारविद्यादि चिह्नं लक्षणमुच्यते ॥

अञन्तात् वैदसम्बन्धी सङ्घो वैदः । एवमङ्को लक्षणञ्च ।

घोषेचेति वाच्यम् ।

वैदो घोषः । यञः गार्गः सङ्घ इत्यादि चतुर्ष्वर्थेषु । इञो दाक्षः सङ्घ इत्यादि ।

४६१. शाकलाद्वा । ४-३-१२८ ॥

अस्माच्चतुर्ष्वर्थेषु वुञण् वा । शाकलकः शाकलो वा सङ्घादिः ।

४६२. छन्दोगौक्थिकयाज्ञिकबह्वृच नटाञ्ञ्यः । ४-३-१२९ ॥

एभ्यश्चरणत्वाद्धर्माम्नाययोर्ञ्यः । छन्दोगानां धर्मो वेदो वा छान्दोग्यम् । एवमौक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् ।

४६३. नदण्डमाणवान्तेवासिषु । ४-३-१३० ॥

दण्डप्रधाना माणवा दण्डमाणवाः । तेषु शिष्येषु च वाच्येषु गोत्राद्युक्तो न स्यात् । दाक्षेरिमे दाक्षाः दण्डमाणवाः शिष्या वा । इञश्चेत्यणेव । विप्राध्यापां ग्रामरक्षाद्यर्थं यष्टि-धारिणो न्यूना द्विजाः दण्डमाणवाः वर्णिनामन्तेवास्यन्तर्भावात् ।

४६४. रैवतिकादिभ्यश्छः । ४-३-१३१ ॥

एभ्यस्तस्येदमर्थे गोत्रवुञ्प्राप्तौ छः । रैवतिकीयम् । औदमेघीयम् ।

४६५. कौपिञ्जलहास्तिपदादण् । ४-३-१३२ ॥

वुञ्प्राप्तावण् । कौपिञ्जलम् । हास्तिपदम् ।

४६६. आथर्वणिकस्येकलोपश्च । ४-३-१३३ ॥

अस्याण् स्यादिकलोपश्च । चरणत्वाद्धर्माम्नाययोरेव । आथर्वणम् । इतः परं शैषिका न सन्ति ।

४६७. तस्य विकारः । ४-३-१३४ ॥

अस्मिन्नर्थे प्राग्दीव्यतीया अणादयः स्युः । मृत्तिकाविकारो मार्त्तिकः । अश्मनो विकारे वा टिलोप इति वृत्तिः । आश्मनः । आश्मः ।

चर्मणः कोशे टिलोपः ।

चार्मः कोशः । अन्यत्र चार्मणं पात्रम् ।

४६८. अवयवे च प्राण्योषधिवृक्षेभ्यः । ४-३-१३५ ॥

एतद्वाचिभ्यो विकारेऽवयवे च वाच्येऽण् । प्राणिभ्योऽग्रे वक्ष्यते । ओषधेः मौर्वं पत्रं इति । अवयवे मौर्वी ज्येति । विकारे खादिरं पत्रम् । खादिरं भस्म ।

प्राण्योषधितरुभ्यस्तु विकारावयवार्थयोः ।
अन्येभ्यस्तु विकारेऽर्थे प्रत्ययाः स्युरतः परम् ॥

४६९. बिल्वादिभ्योऽण् । ४-३-१३६ ॥

एभ्यो विकारावयवयोः वक्ष्यमाणमयडाद्यपवादेऽण् स्यात् । बिल्वव्रीहिमुद्गमसूरगोधूमेक्षुवेणु-कार्पासीपाटलीकुटीरकर्कन्धूभ्यः । बिल्वस्य विकारोऽवयवो वा बैल्वः । वैणवः इत्यादि ।

४७०. कोपधाच्च । ४-३-१३७ ॥

उक्तार्थयोः कोपधादण् दान्दशूकमिदं विषम् ।

४७१. त्रपुजतुनोः षुक् । ४-३-१३८ ॥

आभ्यां विकारेऽण् षुक् च स्यात् त्रापुषं जातुषं तथा ।

४७२. ओरञ् । ४-३-१३९ ॥

उवर्णान्तादुक्तार्थेऽञ् । दैवदारवम् ।

४७३. अनुदात्तादेश्च । ४-३-१४० ॥

अञ् स्यात् । दाधित्थम् । कापित्थम् ।

४७४. पलाशादिभ्यो वा । ४-३-१४१ ॥

अञण् च । स्वरे भेदः । पालाशम् । खादिरम् । वैकङ्कतम् । शांशपं इत्यादि । 'देविक-शिंशपा' (७-३-१) इत्यात्वम् ।

४७५. शम्याः ष्लुञ् । ४-३-१४२ ॥

टित्वान् ङीप् । शामाली समित् ।

४७६. मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । ४-३-१४३ ॥

भक्ष्याच्छादनवर्जितयोर्विकारावयवयोर्वाच्ययोरुपपदस्थले विभाषायां मयट् वा स्यात् । अश्ममयं आश्मं वा पात्रम् । दाण्डिनायुक्तया यलोपेन हिरण्मयं हैरण्यं वा । भक्ष्याच्छादनयोस्तु न मयट् । व्रैहाः सक्तवः । क्षौमं वासः ।

४७७. नित्यं वृद्धशरादिभ्यः । ४-३-१४४ ॥

वृद्धेभ्यश्शरादिभ्यश्च लोके नित्यं मयट् । आम्रमयम् । दारुमयम् । दारवश्छन्दो दुष्प्रयुक्त इति वामनः । शरादिस्तु शरदर्भतृणकुटीसोमाश्वजेभ्य । बल्वजाः काशाः । शरमयम् । दर्भमयं इत्यादि । अत्रापि भक्ष्याच्छादनयोर्न । शाक उपदंशः । दर्भं वासः ।

एकाचो नित्यं मयड्वाच्यः ।

मृन्मयम् । वाङ्मयम् । मयट् तद्रूप इति केचिदिति कौमुदी । विष्णुमयं जगत् । 'तद्धिताः' (४-१-७६) इति बहुवचनसामर्थ्यादनुक्ता अपि प्रत्यया इष्टा इत्यपूशब्दान्मयडर्थे कारणे च यत्रापि स्यादित्याहु । आप्यम् । अम्मयम् । आप्याः परमाणवः ।

४७८. गोश्च पुरीषे । ४-३-१४५ ॥

गोः पुरीषं गोमयम् ।

४७९. पिष्टाच्च । ४-३-१४६ ॥

अस्माद्विकारे नित्यं मयट् । पिष्टमयं हविः । पैष्टी सुरेति तु 'तस्येदम्' (४-३-१२०) इत्यण् ।

४८०. संज्ञायां कन् । ४-३-१४७ ॥

पिष्टान्नाग्नि कन् । पिष्टकोऽपूपः ।

४८१. व्रीहेः पुरोडाशे । ४-३-१४८ ॥

मयट् स्यात् । व्रीहिमयः पुरोडाशः । व्रैहमन्यत् ।

४८२. असंज्ञायां तिलयवाभ्याम् । ४-३-१४९ ॥

तिलमयम् । यवमयम् । नाग्नि तैलम् । यावकम् ।

४८३. तालादिभ्योऽण् । ४-३-१५२ ॥

एभ्यो मयडपवादोऽण् । तालबार्हिणचवचमरपीयुक्षागवेधुकाश्यामाकेभ्यः ।

'तालाद् धनुष्येव'

तालं धनुः । अन्यत्र तालमयो मुसलः । बार्हिणं पिच्छादि । तस्य विकारो बार्हिणं छत्रादि । चपो वंशभेदः । तद्विकाराच्चापम् । चामरम् । पैयुक्षम् ।

४८४. जातरूपेभ्यः परिमाणे । ४-३-१५३ ॥

स्वर्णार्थेभ्यः परिमाणे वाच्येऽण् । हाटकं कार्षापणम् । अन्यत्र हाटकमयो यष्टिः ।

४८५. प्राणिरजतादिभ्योऽञ् । ४-३-१५४ ॥

प्राणिभ्यो रजतादिभ्योऽप्यञ् स्यादुक्तार्थयोर्द्वयोः ।
शौकच्च शौवमस्यैचू स्यादनणत्वाच्च टिलोपिता ॥

एवं राजतम् । हैमम् । काञ्चनी पुरी । सैसम् । लौहम् । औदुम्बरं इत्यादि ।

४८६. ञितश्च तत्प्रत्ययात् । ४-३-१५५ ॥

विकारावयवार्थञित्प्रत्ययान्तात्पुनस्तयोरेवार्थयोरञ् स्यात् । ञि शामीलं दारु । तद्विकारोऽपि शामीलम् । एवं 'एण्या ढञ्' (४-३-१५२) इति ऐणेयं चर्म । तद्विकारोऽप्यैणेयम् ।

४८७. क्रीतवत्परिमाणात् । ४-३-१५६ ॥

परिमाणेभ्यः क्रीतार्थे वक्ष्यमाणष्ठगादि स्यात् । निष्कस्य विकारो नैष्किकः । शतपरिमितस्य विकारः शत्यः । अत्र सङ्ख्यापि परिमाणम् ।

४८८. उष्ट्राद्ध्रञ् । ४-३-१५७ ॥

औष्ट्रकं चर्म ।

४८९. उमोर्णयोर्वा । ४-३-१५८ ॥

औमकम् । औमम् । और्णकम् । और्णम् ।

४९०. एण्या ढञ् । ४-३-१५९ ॥

ऐणेयं चर्म । एणस्य तु ऐणम् ।

४९१. गोपयसोर्यत् । ४-३-१६० ॥

गोविकारो गव्यम् । पयस्यम् ।

४९२. द्रोश्च । ४-३-१६१ ॥

यत् स्यात् । वृक्षविकारो द्रव्यं पात्रम् । द्रव्या खट्वा । गुणाश्रयो द्रव्यमिति पृथिव्यादेः द्रव्यसंज्ञा तु गुणैः द्रूयते प्राप्यत इत्यचो यति साध्या इति हरः ।

४९३. माने वयः । ४-३-१६२ ॥

द्रोर्माने वाच्ये वयः स्यात् । द्रुवयं वृक्षकृतं मानम् ।

४९४. फले लुक् । ४-३-१६३ ॥

फले वाच्ये विकारावयवप्रत्ययस्य लुक् स्यात् । बदर्या विकारः फलं बदरम् । आमलकम् । 'लुक् तद्धितलुकि' (१-२-४९) इति स्त्रीप्रत्ययस्य लुक् ।

४९५. प्लक्षादिभ्योऽण् । ४-३-१६४ ॥

एभ्यः फलेऽण् । न लुक् । प्लाक्षम् । नैयग्रोधम् ।

४९६. न्यग्रोधस्य च केवलस्य । ७-३-५ ॥

केवलस्य न्यग्रोधस्यादिवृद्धिभाताववैच् स्यात् । केवलस्येत्युक्ते न्यग्रोधमूले भवाः न्याग्रोधमूलाः शालयः । पुक्षन्यग्रोधेङ्गुदीवेणुवृहतीशिग्रुभ्यः ।

४९७. जम्ब्वा वा । ४-३-१६५ ॥

जम्ब्वा फलेऽण् वा । जाम्बवं फलम् । ओरञः फलोक्तलुकि नपुंसकह्रस्वत्वे च कृते जम्बु फलम् ।

४९८. लुप् च । ४-३-१६६ ॥

जम्ब्वाः फलेऽञो वा लुप् । लुपि प्रकृतिवल्लिङ्गेन जम्बूः फलम् ।

४९९. हरीतक्यादिभ्यश्च । ४-३-१६७ ॥

एभ्यः फले लुप् । हरीतक्याः फलं हरीतकी ।

एषु लिङ्गं प्रकृतिवद्वचनन्तु विशेष्यवत् ।
एकत्वेऽपि हरीतक्या हरीतक्यः फलान्यतः ॥

हरीतकीपथ्याम्लिकाचिञ्चाद्राक्षामृद्वीकापिप्पलीकणाकोशातकीश्वेतपाक्यादिभ्यः । आद्युक्तेः एला कर्कटी इत्यादि ।

लुपि फलपाकशीर्षिणामुपसङ्ख्यानम् ।

ते च व्रीह्यादयः । व्रीहयः । तिलाः ।

पुष्पमूलेषु वाच्येषु बहुलं लुप् ।

मल्लिकायाः पुष्पं मल्लिका । मालती । विदार्या मूलं विदारी ।

बहुलोक्तेर्वरणपुष्पं वारणम् । पाटलायाः पाटलम् । एरण्डमूलमित्यादौ न लुप् ।

करवीराशोकचम्पककदम्बादिभ्यो लुप् ।

विशेष्यलिङ्गतार्थं लुबुक्तिः । करवीरम् । अशोकम् । आद्युक्तेः कुसुम्भ्याः पुष्पं कुसुम्भम् । कोविदारम् । कर्णिकारम् ।

शिरीषह्रीवेरादिभ्यो लुक् ।

शैरीषं शिरीषं वा पुष्पम् । ह्रैवेरं ह्रीवेरं वा मूलम् ।

५००. कंसीयपरशव्ययोर्यञञौ लुक् च । ४-३-१६८ ॥

कंसप्रकृतित्वात्कंसीयं वर्तलोहः । परशुप्रकृतित्वात्परशव्यमयः । ताभ्यां क्रमाद्यञञौ । तयोः पूर्वमत्ययस्य लुप् च । कंस यञ् । परशु अञ् । वर्तलोहविकारः कांस्यम् । अयोविकारः पारशवम् । इत्यणादिविधिः ॥

---

५०१. प्राग्वहतेष्ठक् । ४-४-१ ॥

ठक् स्यात्पूर्वं वहत्यर्थाद्दीव्यत्यथ खनञ्जयन् ।
जितश्च संस्कृततरश्चरन्तश्चाथ जीवति ॥
हरन्निवृत्तसंसृष्टे उपसिक्तश्च वर्तते ।
यच्छत्युञ्छन्नवन्कुर्वन् हन्ति तिष्ठति धावति ॥
गृह्णाति च चरत्येति समवैति च पश्यति ।
धर्म्यं चावक्रयः पण्यं शिल्पं प्रहरणं मतिः ॥
शीलं वृत्तं हितं भक्षा दीयते च नियोजितः ।
अध्यायी च व्यवहरन् वसतीत्यर्थसङ्ग्रहः ॥

५०२. तेन दीव्यति खनति जयति जितम् । ४-४-२ ॥

तेनेति करणार्थेभ्यो दीव्यतीत्याद्यर्थेषु ठक् स्यात् । अक्षैर्दीव्यत्याक्षिकः । तर्कैर्दीव्यति व्यवहरति इति तार्किकः । एवं प्रामाणिकः । कुद्दालेन खनन् कौद्दालिकः । अक्षैर्जयन् आक्षिकः । अक्षैर्जितमप्याक्षिकं राज्यम् । शत्रुणा जितमित्यत्र करणार्थत्वाभावाच्च । नञ्स्नञोर्भवनावधित्वादिहापि स्तः । स्त्रिया दीव्यन् स्त्रैणः ।

तदाहेति माशब्दादिभ्यष्ठञ्वाच्यः ।

मा शब्द इत्याह माशब्दिकः । नैत्यशब्दिकः । कार्यशब्दिकः । स्वस्तीत्याह सौवस्तिकः । स्वर्गमनमाह सौवर्गमनिकः । द्वारादौ ।

आहार्थे प्रभूतादिभ्यः ।

क्रियाविशेषणादेव । प्रभूतादेरेतत् । प्रभूतमाह प्राभृतिकः । पार्यायिकः ।

पृच्छतौ सुस्नातादिभ्यः ।

सुस्नातं पृच्छन् सौस्नातिकः । सौखरात्रिकः । अनुशतिकादित्वात् सौखशायनिकः । स्वागतिकः । अतैचि प्राप्ते 'स्वागतादीनां च' (७-३-७) इति न ।

गच्छतौ परदारादिभ्यः ।

परदारादि गच्छन् पारदारिकः । पारतल्पिकः । गौरुतल्पिकः । जान्ययात्रिकः ।

५०३. संस्कृतम् । ४-४-३ ॥

करणात्संस्कृते ठक् । शौण्ठिकं जलम् । कर्मभिः संस्कृतः कार्मिको द्विजः । ज्ञानिकः ।

५०४. कुलत्थकोपधादण् । ४-४-४ ॥

कुलत्था मुद्गभेदाः । तैः संस्कृतं कौलत्थम् । कोपधात् जैरकम् ।

५०५. तरति । ४-४-५ ॥

तेन तरतीत्यर्थे ठक् । उडुपेन तरन् औडुपिकः ।

दोषष्ठस्य को वाच्यः नत्विकः ।

दोष्णा तरन् दौष्कः । उणादिसत्वात् षः ।

५०६. गोपुच्छाट्ठञ् । ४-४-६ ॥

भित्त्वात्स्वरे भेदः । गोपुच्छेन तरन् गौपुच्छिकः ।

५०७. नौद्व्यचष्ठन् । ४-४-७ ॥

नावो द्व्यज्भ्यश्च तरत्यर्थे ठन् । नाविकः । प्लविकः । बाहुकः ।

५०८. चरति । ४-४-८ ॥

तेन चरतीत्यर्थे ठक् । गतिर्भक्षणं च गृह्यते । हस्तिना चरन् हास्तिकः । दक्षा भुक्त इति दाक्षिकः । स्वध्वेन चरन् स्वाध्वरिकः । व्यावहारिकः । व्यायामिकः । स्वागतादित्वादेच् न ।

५०९. आकर्षात् ष्ठल् । ४-४-९ ॥

निकषोपलेन चरन् आकर्षिकः । षित्त्वादाकर्षिकी । आकर्षादितिपाठे आकर्षिकः ।

५१०. पर्पादिभ्यष्ठन् । ४-४-१० ॥

अयमपि षित् । पर्पाश्वाश्वत्थरथजालव्यालव्यामेभ्यः । पर्पेः ध्रुवः पङ्गुनां चरणार्थः पीठो वा । तेन चरति पर्पिकः । अश्विकः । षित्त्वात् पर्पिकी ।

पादस्य पच ।

पादेन चरन् पदिकः ।

५११. श्वगणाट्टञ्च । ४-४-११ ॥

चकारात् ष्ठन् । श्वगणेन चरन् श्वागणिकः । श्वगणिकः । अत्र श्वशब्दस्य द्वारादित्वादैचि प्राप्ते श्वादेरितीति वाच्यमितीकारादिप्रत्यये प्रतिषेधोक्त्या न स्यात् ।

५१२. वेतनादिभ्यो जीवति । ४-४-१२ ॥

एभ्यस्तेन जीवतीत्यर्थे ठक् । वेतनवाहार्घवाहपादप्रेषणसुखशय्यावेशशक्तिभ्यः । वैतनिकः । वाहो भारः । परिमाणभेदो वा । तेन जीवन् वाहिकः । आर्घवाहिकः । मूर्घवाहेति वृत्तिपाठः । मौर्घवाहिकः । पादिकः । प्रैषणिकः । सौख्यिकः । शय्याविक्रेता शायिकः । वैशिकः । शाक्तिकः ।

उपाद्देशवेशहस्तस्थानस्थितनिषद्भ्यः ।

औपदेशिको गुरुः । औपवेशिकः सेवकः । औपहस्तिकः । औपस्थानिकः औपस्थितिकश्च सेवकः । औपनिषदिकः ।

व्यस्ताच्च धनुर्दण्डात् ।

धानुर्दण्डिकः । उसन्ताट्टस्य कः । 'सोऽपदादौ' (८-३-३८) 'इणः षः' (८-३-३९) धानुष्कः । दाण्डिकः ।

५१३. वस्नक्रयविक्रयाट्ठन् । ४-४-१३ ॥

वस्नं मूल्यम् । तेन जीवन् वस्निकः । क्रयविक्रयिकः । व्यस्ताच्च । क्रयिकः । विक्रयिकः ।

५१४. आयुधाच्छ च । ४-४-१४ ॥

ठश्च । आयुधेन जीवन् आयुधीयः । आयुधिकः ।

५१५. हरत्युत्सङ्गादिभ्यः । ४-४-१५ ॥

एभ्यस्तेन हरतीत्यर्थे ठक् । उत्सङ्गेन नयति उपादत्ते वा हृत्यौत्सङ्गिकः । औडुपिकः ।

५१६. भस्त्रादिभ्यः ष्ठन् । ४-४-१६ ॥

षिदयम् । भस्त्राभरटभरणशीर्षेभारांसेभारेभ्यः । भस्त्रया हरति भस्त्रिकः । भस्त्रिकी । भरटैः भृत्यैर्हरन् भरटिकः । भरणिकः । शीर्षेभारिकः । अंसेभारिकः । गणे पाठादलुक् । लुक् चास्ति । शीर्षभारिकः । अंसभारिकः ।

५१७. विभाषा विवधवीवधात् । ४-४-१७ ॥

आभ्यां वा ष्ठन् । उभयतो बद्धशिक्यो भारदण्डो द्वयोरर्थः । तेन हरन् विवधिकः । वीवधिकः । वेत्युक्तेष्ठकि वैवधिकः ।

५१८. अण् कुटिलिकायाः । ४-४-१८ ॥

कुटिलगमनं सन्देशो वा कुटिलिका । कुटिलगत्या व्याधं हरन् मृगः कौटिलिकः । कुटिलिकयाङ्गारान् हरन्नपि कौटिलिकः ।

५१९. निर्वृत्तेऽक्षद्यूतादिभ्यः । ४-४-१९ ॥

अक्षद्यूतगतानुगतगतागतयातोपयातपादस्वेदनकण्टकमर्दनेभ्यः । अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् । गतानुगतिकं जाड्यम् । गतागतिकं यातोपयातिकं च धनम् । चरणक्लेशेन जनितं पादस्वेदनिकं धनम् । दुर्देशचरणेन रिपुवधेन वा जनितं काण्टकमर्दनिकम् ।

जङ्घाबाहुमहाराजाभ्याम् ।

जाङ्घाप्राहृतिकं जाङ्घाप्राहारिकं च वैरम् । निर्वृत्त इति विभागादन्येभ्योऽपि । अङ्गेन निर्वृत्तं आङ्गिकम् । वाचिकम् । सत्त्वेन मनसा निर्वृत्तः सात्त्विको विकारः ।

भावप्रत्ययान्तादिमञ्वाच्यः ।

पाकेन निर्वृत्तं पाकिमम् । रागिमम् । सेकिमम् । छेदेन निर्वृत्तं कुट्टिनम् । टीकासर्वस्वे भावोक्तान्तादिमवुक्तेर्नात्र घञन्तनियमः ।

५२०. अपमित्ययाचिताभ्यां कक्कनौ । ४-४-२१ ॥

ककि अपमित्यनिर्वृत्तं आपमित्यकम् । कनि याचितकम् ।

५२१. संसृष्टे । ४-४-२२ ॥

तेन संसृष्टमित्यर्थे ठक् । तिलमिश्राः तैलिकास्तण्डुलाः । मधुयुक्तं माधुकं पात्रम् । उगन्तात्कः ।

५२२. चूर्णादिनिः । ४-४-२३ ॥

चूर्णी ।

५२३. लवणाल्लुक् । ४-४-२४ ॥

ठको लुक् । लवणा यवागूः ।

५२४. मुद्गादण् । ४-४-२५ ॥

मुद्गसंसृष्टं मौद्गम् ।

५२५. व्यञ्जनैरुपसिक्ते । ४-४-२६ ॥

व्यञ्जनेभ्यस्तैरुपसिक्तं इत्यर्थे ठक् । क्षैरिकमन्नम् ।

५२६. ओजःसहोऽम्भसा वर्तते । ४-४-२७ ॥

एभ्यस्तेन वर्तत इत्यर्थे ठक् । ओजसा वृत्तिं कुर्वन् औजसिकः । साहसिकः । आम्भसिको मत्स्यः सजलमेघो वा ।

५२७. तत्प्रत्यनुपूर्वमीपलोमकूलम् । ४-४-२८ ॥

तदिति क्रियाविशेषणार्थोक्तिः । प्रत्यनुपूर्वेभ्यस्तद्वर्तत इत्यर्थे ठक् । प्रतीपं वर्तते प्रातीपिकः । प्रातिलोमिकः । प्रातिकूलिकः । आन्वीपिकः । आनुलोमिकः । आनुकूलिकः ।

५२८. परिमुखञ्च । ४-४-२९ ॥

परिमुखं वर्तत इत्यर्थेऽपि ठक् । परिवर्जने सर्वतोभावे च ।

परिहृत्य मुखं तिष्ठन् स्यात्पारिमुखिकः खलः ।
सर्वत्र मुखतो वर्ती सेवकोऽपि तथोच्यते ॥

चकारात्पारिपार्श्विकः ।

५२९. प्रयच्छति गर्ह्यम् । ४-४-३० ॥

गर्ह्यदेयवाचकात्तत्प्रयच्छतीत्यर्थे ठक् । द्विगुणार्थं द्रव्यं द्विगुणम् । तद्दाता द्वैगुणिकः । त्रैगुणिकः । द्विगुणाद्यर्थं दानस्य निषिद्धत्वात् गर्ह्यत्वम् ।

वृद्धेर्वृधुषिभावश्च वाच्यः ।

वृद्ध्यर्थं द्रव्यं वृद्धिः । तद्दाता वार्धुषिकः ।

५३०. कुसीददशैकादशात् ष्ठन्ष्ठचौ । ४-४-३१ ॥

द्वौ क्रमात् स्तः ।

षो डीषर्थः स्वरे भेदः कुसीदं वृद्धिरुच्यते ।
तदर्थं द्रव्यमत्रोक्तं तत्प्रदाता कुसीदिकः ॥

एकादशार्थं दशकं दशैकादशमुच्यते ।
तादृक् प्रयच्छन् धनिको दशैकादशिको मतः ॥

५३१. उञ्छति । ४-४-३२ ॥

तदुञ्छिनोतीत्यर्थे ठक् । व्रीहीनुञ्छन् व्रैहिकः । श्यामाकिकः ।

५३२. रक्षति । ४-४-३३ ॥

तद्रक्षतीत्यर्थे ठक् । मण्डलं रक्षन् माण्डलिकः ।

५३३. शब्ददर्दुरं करोति । ४-४-३४ ॥

शब्दं संस्करोति शाब्दिकः । दर्दुराख्यपात्रकृद्दार्दुरिकः कुलालः । दर्दुरित्यनुकरणशब्दो वेति हरः ।

५३४. पक्षिमत्स्यमृगान्हन्ति । ४-४-३५ ॥

पक्ष्यादिवाचिभ्यस्तान्हन्तीत्यर्थे ठक् । पक्षिहन्ता पाक्षिकः । शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाफरिकः । मार्गिकः । सौकरिकः । अण्डजानिमिषादेर्गुणार्थत्वेनासंज्ञात्वात् नेति नाथः ।

५३५. परिपन्थञ्च तिष्ठति । ४-४-३६ ॥

परिपथपर्यायः परिपन्थशब्दोऽस्ति । तस्मात्तिष्ठति हन्तीति चार्थे ठक् । प्राग्वत्परिद्वर्थः ।

मार्गं हित्वा तिष्ठतीति चण्डालः पारिपन्थिकः ।
सर्वमार्गेषु तिष्ठन्तो रक्षकाः पारिपन्थिकाः ॥
मार्गादन्यत्र हन्तीति मृगोघः पारिपन्थिकः ।
सर्वमार्गेष्वपि घ्नन्तो दस्यवः पारिपन्थिकाः ॥

परिपथं चैके इति भोजोक्तेः पारिपथिकोऽपि अर्थचतुष्के स्यात् ।

५३६. माथोत्तरपदपदव्यनुपदं धावति । ४-४-३७ ॥

माथोत्तरपदेभ्यः पदव्यनुपदाभ्याञ्च तद्धावतीत्यर्थे ठक् । माथो मार्गः । वनमाथं धावन् वानमाथिकः । पादविकः । आनुपदिकः ।

५३७. आक्रन्दाट्ठञ्च । ४-४-३८ ॥

ठक् च स्यात् ।

आक्रन्द्यतेऽत्रेत्याक्रन्दो रोदवान्देश उच्यते ।
आक्रन्दन्त्येनमित्यार्तत्राताप्याक्रन्द ईरितः ॥
आक्रन्ददेशमाधावन् पार्थ आक्रन्दिकोऽभवत् ।
तं रक्षितारं धावन्त आसन्नाक्रन्दिका द्विजाः ॥

५३८. पदोत्तरपदं गृह्णाति । ४-४-३९ ॥

पदोत्तरपदात्तद्गृह्णातीत्यर्थे ठक् । सन्दिग्धपदं गृह्णन् सान्दिग्धपदिकः ।

५३९. प्रतिकण्ठार्थललामञ्च । ४-४-४० ॥

प्रतिकण्ठं गृह्णन् प्रातिकण्ठिकः । आर्थिकः । लालामिकः । ललाम भूषणम् । नान्तमद-न्तश्चास्ति ।

५४०. धर्मं चरति । ४-४-४१ ॥

धार्मिकः ।

अधर्माच्च वाच्यम् ।

आधर्मिकः ।

५४१. प्रतिपथमेति ठंश्च । ४-४-४२ ॥

सर्वमार्गान् गच्छन् प्रतिपथिकः । प्रातिपथिकः ।

५४२. समवायान्समवैति । ४-४-४३ ॥

एतद्बाचिभ्यस्तमनुप्रविशतीत्यर्थे ठक् । सामवायिकः । सामाजिकः ।

५४३. परिषदो ण्यः । ४-४-४४ ॥

परिषदं समवैति पारिषद्यः । एकदेशविकृतत्वात् पार्षद्योऽपि ।

५४४. सेनाया वा । ४-४-४५ ॥

ण्यः ठक् च । सेनासङ्गतः सैन्यः सैनिको वा ।

५४५. संज्ञायां ललाटकुक्कुट्यौ पश्यति । ४-४-४६ ॥

आभ्यां तत्पश्यतीत्यर्थे नाञि ठक् ।

लालाटिकः सदा राज्ञो ललाटं वीक्ष्य भाववित् ।
कार्यवाञ्छतया दूरात् फालमात्रेक्षकोऽथवा ॥
कुक्कुटीपातमात्रं यो मार्गं शुद्ध्यै निरीक्षते ।
न दूरे वीक्षते शान्तो भिक्षुः कौक्कुटिको हि सः ॥
व्याजेन वा तथा पश्यन् भिक्षुरेव तथोच्यते ।
उपचाराद्व्याजवन्तः सर्वे वाच्या इतीतरे ॥

५४६. तस्य धर्म्यम् । ४-४-४७ ।

तस्याचारप्राप्तमित्यर्थे ठक् । आपणस्य धर्म्यमापणिकम् । मुनेर्धर्म्यं मौनिकम् ।

५४७. अण् महिष्यादिभ्यः । ४-४-४८ ॥

महिषीप्रजापतियजमाननरानुचारकपुरोहितहोतृमणिपालिभ्यः । राजमहिष्या धर्म्यं माहिषम् । प्रजापतिर्ब्रह्मचारी । तद्धर्म्यं प्राजापतम् । याजमानम् । नारम् । आनुचारकम् । पौरोहितम् । हौतम् । माणिपालम् ।

व्यनुप्रेभ्यो लेपिकायाः ।

वैलेपिकम् । आनुलेपिकम् । प्रालेपिकम् ।

५४८. ऋतोऽञ् । ४-४-४९ ॥

पोतृधर्म्यं पौत्रम् । औद्गात्रम् ।

विशसितुरिटो लोपश्च ।

वैशस्त्रम् ।

विभाजयितुर्णिलोपश्च ।

वैभाजित्रम् ।

५४९. अवक्रयः । ४-४-५० ॥

शुल्कशालादिके दातुर्नियतोऽशो ह्यवक्रयः ।
तस्यावक्रय इत्यर्थे ठक् भवेच्छौल्कशालिकः ॥

५५०. तदस्य पण्यम् । ४-४-५१ ॥

पण्यं विक्रेतव्यम् । अपूपाः पण्यमस्येति आपूपिको वणिक् ।

५५१. लवणाट्ठञ्च । ४-४-५२ ॥

ठक् च स्यात् । लवणपण्यवान् लावणिकः ।

५५२. किशरादिभ्यः ष्ठन् । ४-४-५३ ॥

षिदयम् । किशरतगरोशीरहरिद्राहरिद्रुगुग्गुलुस्थगरनलदपर्णीभ्यः । गन्धद्रव्यार्था एते । किशरपण्यवान् किशरिकः । तगरिकः इत्यादि । नलदमुशीरमूलम् ।

५५३. शलालुनोऽन्यतरस्याम् । ४-४-५४ ॥

अस्माद्गन्धार्थाद्वा ष्ठन् । शलालुकः । शालालुकः ।

५५४. शिल्पम् । ४-४-५५ ॥

तदस्य शिल्पमित्यर्थे ठञ् स्यान्मालिकवैणिकौ ।
निर्माणवादनाद्यर्थवृत्तिः शब्द इहेष्यते ॥
कम्बोर्विकार ओरञि वेणो बिल्वादिणि स्थितेऽथ ठकि ।
काम्बविको वैणविकः स्यात् काम्बुकवैणुकौ च शुद्धाभ्याम् ॥

५५५. मद्रुकझार्झराद्यन्यतरस्याम् । ४-४-५६ ॥

मद्रुकवादनं शिल्पमस्य माद्रुकः । ठकि माद्रुकिकः । झार्झरः । झार्झरिकः ।

५५६. प्रहरणम् । ४-४-५७ ॥

तदस्यायुधमित्यर्थे ठक् स्याच्चाक्रिक आसिकः ।

५५७. परश्वधाट्ठञ् च । ४-४-५८ ॥

असात्तु ठक्ठञौ पारश्वधिकोऽस्त्र स्रे भिदा ॥

अण् चैके इति भोजोक्त्या पारश्वधः ।

५५८. शक्तियष्ट्योरीकक् । ४-४-५९ ॥

शाक्तीकः । याष्टीकः ।

५५९. अस्तिनास्तिदिष्टं मतिः । ४-४-६० ॥

एभ्यस्तथामतिरस्यास्तीत्यर्थे ठक् । परलोकोऽस्तीति मतिरस्येति आस्तिकः । स नास्तीति मतिरस्येति नास्तिकः । दैवं शरणमिति मतिरस्य दैष्टिकः ।

५६०. शीलम् । ४-४-६१ ॥

तदस्य शीलमित्यर्थे ठक् । अपूपमक्षणं शीलमस्य आपूपिकः । क्रियान्तभूता ।

५६१. छत्रादिभ्यो णः । ४-४-६२ ॥

छत्रसत्यानृतविशिखाभ्यः ।

छत्रेण तद्धारणादिर्गुरुसेवात्र लक्ष्यते ।
सर्वंसहत्वाद्भ्याया विशिखेति क्षमोच्यते ॥

तस्माद्गुरूपासनशीलश्छात्रः । क्षमाशीलो वैशिखः । सात्यः । आनृतः । अङः स्थः । 'आतश्चोपसर्गे' (३-१-१३६) इत्यङन्तास्थाशब्दाण्णः । आस्थाशील आस्थः । प्रातिष्ठः । शिक्षाभिक्षाभक्षाचुरातपःकर्मकृष्युपस्थानप्ररोहादिभ्यः । शिक्षाशीलः शैक्षः । भैक्षः । भाक्षः । चौरः । तापसः । कार्मः । कार्षः । औपस्थानः । प्रारोहः । छत्रादिणस्याण्कार्यमिष्यते । तेन ङीप् । छात्री । तापसी । कार्म इत्यत्र लुप्तणकार्येण 'अन्' (३-४-१६७) इति प्रकृतिभावे प्राप्ते 'कार्मस्ताच्छील्ये' (३-४-१७२) इति निपातनाद्विलोपः ।

५६२. कर्माध्ययने वृत्तम् । ४-४-६३ ॥

तत्कर्माध्ययने वृत्तमस्येत्यर्थे तु ठम्भवेत् ।
वेदाधीतिपरीक्षायां भ्रंशसंस्यास्वयं विधिः ॥

द्वे अन्यकर्मणी जाते यस्य ह्यध्ययने वटोः ।
सोऽयं द्विरन्यशब्दकर्ता द्वैयन्यिको वटुः ॥

५६३. बह्वच्पूर्वपदाट्ठच् । ४-४-६४ ॥

चतुर्दशान्यिकः ।

५६४. हितं भक्षाः । ४-४-६५ ॥

तदस्मै हितमित्यर्थे भक्ष्येभ्यष्ठक् । सात्तुकः ।

५६५. तदस्मै दीयते नियुक्तम् । ४-४-६६ ॥

तदस्मै निश्चयेन नित्यं वा दीयत इत्यर्थे ठक् । अग्रभोजनमस्मै एव देयमित्याग्रभोजनिको विद्वान् । क्षीरमस्मै नित्यं दीयत इति क्षैरिकः ।

५६६. श्राणामांसौदनाट्टिठन् । ४-४-६७ ॥

टो ङीबर्थः । इकार उक्त्यर्थः । श्राणा अस्मै नियतं दीयत इति श्राणिकः । मांसौदनिकः । व्यस्ताच्च । मांसिकः । ओदनिकः ।

५६७. भक्ताद्अण्यतरस्याम् । ४-४-६८ ॥

भक्तमस्मै नियतं दीयत इति भाक्तः । ठकि भाक्तिकः ।

५६८. तत्र नियुक्तः । ४-४-६९ ॥

अत्र ठक् । द्वारे नियुक्तो दौवारिकः ।

५६९. अगारान्ताट्ठन् । ४-४-७० ॥

देवागारे नियुक्तो देवागारिकः ।

५७०. अध्यायिन्यदेशकालात् । ४-४-७१ ॥

निषिद्धदेशकालेऽस्तत्राध्यायीत्यर्थे ठक् । चतुष्पथे अधीत इति चातुष्पथिकः । आष्टमिकः ।

५७१. कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति । ४-४-७२ ॥

कठिनान्तात् वंशकठिनास्त्यदेशे व्याप्रियमाणो वांशकठिनिकः । व्रीह्यादेः प्रस्तारणे व्याप्तृतः प्रास्तारिकः । प्रतिमादेः संस्थानशिक्षापरः सांस्थानिकः ।

५७२. निकटे वसति । ४-४-७३ ॥

ग्रामात्क्रोशे निवस्तव्यं भिक्षुणेति विधीयते ।
तादृङ्निकटवासेऽयं विधिर्नैकटिको यतिः ॥

निकटश्मशानवृक्षमूलेषु वसति इति भोजः । तद्वृत्तौ निकटवास्येव नैकटिकः । एवं श्माशानिकः । वार्क्षमूलिकः ।

५७३. आवसथात् ष्ठल् । ४-४-७४ ॥

षिदयम् । गृहे वसन्नावसथिकः । इति ठभागः ॥

---

५७४. प्राग्घिताद्यत् । ४-४-७५ ॥

'तस्मै हितम्' (५-१-५) इत्यतः प्राग्यद्विधिः । इह च तत्र साधुरित्येवार्थो बहुविषयः ।

५७५. तद्वहति रथयुगप्रासङ्गम् । ४-४-७६ ॥

एभ्यस्तद्वहतीत्यर्थे यत्स्यात् । रथं वहन् रथ्यः । युग्यः । प्रासङ्ग्यः । वत्सानां दमनकाले स्कन्धासक्तं युगसदृशं काष्ठमत्र प्रासङ्ग इति हरः । बहुवाह्ये शकटादौ युगाद्युगं प्रासङ्ग इत्यन्ये ।

५७६. धुरो यड्ढकञौ । ४-४-७७ ॥

धुर् य । रान्तत्वात् 'हलि च' (८-२-७७) इति उपधादीर्घे प्राप्ते ।

५७७. न भकुर्छुराम् । ८-२-७९ ॥

अत्र छकारमेव हराद्याः पेठुः । रान्तस्य वान्तस्य च भस्य कुर् छुर् इत्यनयोश्चोपधादीर्घो न स्यात् । धुरं वहन् धुर्यः । धौरेयकः । 'यड्ढकौ' इति पाठे धौरेयः ।

५७८. खः सर्वधुरात् । ४-४-७८ ॥

सर्वधुरं वहन् सर्वधुरीणः । ख इति विभागात् धुर एव खः । धुरीणः । उत्तरधुरीणः।

५७९. एकधुराल्लुक् च । ४-४-७९ ॥

अस्मात् खो लुक् च । एकधुरीणः । एकधुरः ।

५८०. शकटादण् । ४-४-८० ॥

शकटं वहन् शाकटः ।

५८१. हलसीराट्ठक् । ४-४-८१ ॥

हलं वहन् हालिकः । सैरिकः । एषु तदन्तविधिरिति रामः । द्वैशकटः । द्वैहलिकः । द्वैसीरिकः । प्राग्दीव्यतीयत्वाभावात् न द्विगोर्लुक् ।

५८२. संज्ञायां जन्याः । ४-४-८२ ॥

जनीशब्दाद्वहत्यर्थे नाञि यत्स्याज्जनी वधूः ।
जन्यस्तच्छिबिकाधारी तां पतिं प्रापयन्नपि ॥
तेन जन्यो वरसुहृत् जन्या चैवं वधूसखी ।

५८३. विध्यत्यधनुषा । ४-४-८३ ॥

यत्स्यात्तद्विध्यतीत्यर्थे धनुस्तत्करणं न चेत् ॥

ऊरू विध्यन्तीति ऊरव्याः कण्टकाः । पद्याः शर्कराः । 'पद्यति' (६-३-५३) इति पद्भावः । अधनुषेत्युक्ते धनुराद्यायुधैर्वेधे चोरं विध्यन् चोर्य इति न स्यात् ।

५८४. धनगणं लब्धा । ४-४-८४ ॥

आभ्यां तल्लब्धेत्यर्थे यत् । धनं लब्धा धन्यः । गण्यः ।

५८५. अन्नाण्णः । ४-४-८५ ॥

अन्नं लब्धा आन्नः ।

५८६. वशं गतः । ४-४-८६ ॥

वशं गतो वश्यः ।

५८७. पदमस्मिन् दृश्यम् । ४-४-८७ ॥

पदमस्मिन् द्रष्टुं शक्यमिति पद्यः कर्दमः ।

५८८. मूलमस्याबर्हि । ४-४-८८ ॥

आबर्हीत्यवश्योत्पाटनीयम् ।

मूलमस्य समुत्पाट्यमिति मूल्यस्तिलोत्करः ।
आमूलं शुष्कफलभृद्द्रुर्ग्रहो लवने त्वसौ ॥

मूलमस्यादृढमित्येवाह भोजः ।

५८९. संज्ञायां धेनुष्या । ४-४-८९ ॥

ऋणप्रत्यर्पणान्तमुत्तमर्णस्य दोहायार्पिता धेनुर्धेनुष्या ।

५९०. गृहपतिना संयुक्ते ञ्यः । ४-४-९० ॥

नाम्न्येव । गृहस्थेन प्रथमं संयुक्ते ञ्यः । गृहस्थेन प्रथमसंयुक्तत्वात् गार्हपत्यः पश्चिमाग्निः । स ह्यन्याग्न्योः प्रकृतिः ।

५९१. नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाभ्यसमसमितसंमितेषु । ४-४-९१ ॥

नावादिभ्यः क्रमात्तार्यादिष्वर्थेषु यत् । नावा तार्यं नाव्यम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यं फलम् । विषेण वध्यो विष्यः । मूलद्रव्येण आनाम्यमापाद्यं मूल्यम् । लाभद्रव्यमित्यर्थः ।

अंशभूतं किलानाम्यमिति वृत्तावुदीरितम् ।
मूलद्रव्याङ्गभूतत्वाल्लाभस्यालापि मूल्यता ॥

मूलशब्दस्य समार्थयोगाय पुनः पाठः । लाभरहितत्वान्मूलेन समो मूल्यः पटः ।

मूल्यशब्दः क्रयधने द्वेधाप्येवं न सिध्यति।

विक्रेतुर्लाभहेतुत्वाल्लक्षणेति हरोऽब्रवीत् ॥

सीता हलाग्रम्। तेन समितं समीकृतं क्षेत्रं सीत्यमिति हरः।

रथसीताहलेभ्यः।

इति तदन्तविधिना द्विसीत्यम् त्रिसीत्यम्। तुल्या समानस्तुल्यः। गवयस्य तुलावत् स्वरूपपरिच्छेदकत्वाद्गवयेन तुल्यो गौः।

५९२. धर्मपथ्यर्थन्यायादनपेते । ४-४-९२ ॥

धर्मादनपेतं धर्म्यं चेष्टितम्। वैद्योक्तात् पथोऽनपेतं पथ्यम्। अर्थ्यम्। न्याय्यम्।

५९३. छन्दसो निर्मिते । ४-४-९३ ॥

इच्छार्थाच्छन्दसो निर्मिते यत्। इच्छया कृतं छन्दस्यम्।

५९४. उरसोऽण् च । ४-४-९४ ॥

आत्मार्थादुरसो निर्मितेऽण् यच्च। औरसः उरस्यो वा पुत्रः।

५९५. हृदयस्य प्रियः । ४-४-९५ ॥

अलार्थे यत्।

५९६. हृदयस्य हृल्लेखयदण्लासेषु । ६-३-५० ॥

लेखशब्दे यदणोर्लासे च परे हृदयस्य हृद् स्यात्। हृदयस्य प्रियं हृद्यम्।

५९७. बन्धने चर्षौ । ४-४-९६ ॥

बन्धनं वशीकरणसाधनम्। ऋषिर्मन्त्रः। तस्मिन्वाच्ये हृदयाद्यत्। हृदयस्य बन्धनो मन्त्रो हृद्यः।

५९८. मतजनहलात्करणजल्पकर्षेषु । ४-४-९७ ॥

कर्माद्यत्। मतं ज्ञानम्। तस्योत्पादनं तत्साधनं वा मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। स च कर्षणम्। कृष्यमाणदेशो वा। तत्र त्रिलिङ्गम्।

रथसीता।

इति तदन्तविधेः द्विहल्यः। परमहल्यः।

५९९. तत्र साधुः । ४-४-९८ ॥

अत्रार्थे यत् । साधुः प्रवीणो योग्यो वा । सामसु साधुः सामन्यः । कर्मण्यः । नान्तत्वेऽपि 'ये चाभावकर्मणोः' (६-४-१६८) इति टिलोपाभावः ।

६००. प्रतिजनादिभ्यः खञ् । ४-४-९९ ॥

प्रतिपञ्चमहासर्वविश्वेभ्यो जनात् । प्रतिजने साधुः प्रातिजनीनः । पञ्चजनाः नराः । तेषु साधुः पाञ्चजनीनः । माहाजनीनः । सार्वजनीनः । वैश्वजनीनः ।

समिदंसमपरेभ्यो युगात् ।

सांयुगीनः । ऐदंयुगीनः । समः सर्वार्थः । सामयुगीनः ।

तद्धिते पूर्वपदस्थनिमित्तादपि णत्वं वाच्यम् ।

पारयुगीणः ।

परस्यामुष्यास्यपरेभ्यः कुलात् ।

पारस्यकुलीनः । आमुष्यकुलीनः । आस्यकुलीनः । एषु निपातनादलुक् । पारकुलीनः ।

६०१. भक्ताण्णः । ४-४-१०० ॥

भक्ते योग्या भाक्तास्तण्डुलाः ।

६०२. परिषदो ण्यः । ४-४-१०१ ॥

पारिषद्यो वाग्मी । परिषद इति विभागात् पारिषदा वाक् । एकदेशविकृतत्वात् पार्षद्यः । पार्षदः ।

६०३. कथादिभ्यष्ठक् । ४-४-१०२ ॥

कथायां निपुणः काथिकः ।

विविश्वपूर्वायाश्च ।

विकथायां साधुर्वैकथिकः । वैश्वकथिकः ।

जनेजनाभ्यां वादात् ।

जानेवादिकः । जानवादिकः ।

वृत्तिसङ्ग्रहगणगुणायुर्वेदवितण्डाभ्यश्च ।

वार्त्तिकः । साङ्ग्रहिकः । गाणिकः । गौणिकः । आयुर्वेदिकः । वैतण्डिकः । विहासे साधुः वैहासिको विदूषक इति च मुरारिपथिका ।

६०४. गुडादिभ्यष्ठञ् । ४-४-१०३ ॥

गुडापूपसक्तुमांसौदनकुल्माषवेणुभ्यः । गुडे साधुर्गौडिक इक्षुः । आपूपिकः । साक्तुकः । मांसौदनिकी पुलिन्दी । कौल्माषिको मुद्गः ।

समो वाह्वघातग्रामेभ्यः ।

सांवाहिकः । साङ्घातिकः । साङ्ग्रामिकः ।

प्रन्युप्येभ्यो वासात् ।

प्रावासिकः । नैवासिकः । औपवासिकः ।

६०५. पथ्यतिथिवसतिस्वपतेर्ढञ् । ४-४-१०४ ॥

पाथेयम् । आतिथेयम् । वसतौ योग्या वासतेयी रात्रिः शाला वा । स्वशब्दस्य द्वारादित्वात् प्राप्त ऐच् स्वागतादित्वान्न । स्वपतिर्धनिकः । तत्र योग्यं स्वापतेयं धनम् ।

६०६. सभाया यः । ४-४-१०५ ॥

सभ्यः ।

६०७. समानतीर्थे वासी । ४-४-१०७ ॥

अत्रार्थे यत् ।

६०८. तीर्थे ये । ६-३-८७ ॥

यकारान्ते तीर्थे परे समानस्य सः स्यात् । समानगुरौ वासी सतीर्थ्यः ।

६०९. समानोदरे शयित ओ चोदात्तः । ४-४-१०८ ॥

अभिव्याप्यर्थे यत् । ओकारस्योदात्तत्वञ्च । समानोदर्यः ।

६१०. सोदराद्यः । ४-४-१०९ ॥

सोदर्यः । अनयोः 'विभाषोदरे' (६-३-८८) इति समानस्य यमत्यये वा समावः ।

६११. भवे छन्दसि । ४-४-११० ॥

इत्यधिकारेऽपि केचिल्लोके दृष्टाः सगर्भसयूथसनुताद्याः । एभ्यस्तत्र भवे यः स्यात् । सगर्भ्यः । समूथ्यः । सनुत्यस्तु लोके न दृष्टः ।

६१२. अग्राद्यत् । ४-४-११६ ॥

अग्रे भवोऽग्र्यः ।

६१३. घच्छौ च । ४-४-११७ ॥

घचि अग्रियः । छे अग्रीयः ।

६१४. समुद्राभ्राद्घः । ४-४-११८ ॥

भवेऽर्थे । समुद्रियम् । अभ्रियम् ।

६१५. मत्वर्थे मासतन्वोः । ४-४-१२८ ॥

अनयोर्वाच्ययोर्मत्वर्थे यत् । तत्र तनौ लोके न दृष्टम् । मासे तु नभांसि मेघाः । तद्वान् मासो नभस्यः । एवं हेमन्ते बलवृद्धिमत्त्वात् सहस्यो मासः । तपनं तपः । शिशिरेऽन्यादि-तपनवत्त्वात्तपस्यः ।

लुगकारेकारेफाश्च वाच्याः ।

तस्य यत एव वा लुक् । नभाः सहाः तपाश्च मासाः । अकारः । इडत्वम् । ऊर्बलम् । तद्वानिषः । ऊर्जः । शरदः । पुष्टिकालत्वात्तथोक्तिः । इकारेफौ । धर्मेण शुक्लत्वात्सीति शुचिः । शुक्रः । 'स्वादिषु' (१-४-१७) इति पदत्वात्कुत्वम् । 'अयस्मयादीनि च्छन्दसि' (१-४-२०) इति मत्वस्यापि भावात् जश्त्वाभावः ।

६१६. मघोर्ञ च । ४-४-१२९ ॥

मघोस्तद्वति मासे वाच्ये ञो यत्र स्यात् । मघवत्त्वात्सीति माघवः । यतस्तु वक्तव्ये न लुक् । मघव्यः ।

६१७. शिवशमरिष्टस्य करे । ४-४-१४३ ॥

एभ्यः करेऽर्थे तातिल् । शिवकरः शिवतातिः । शन्तातिः । अरिष्टतातिः क्षेमकृत् ।

६१८. भावे च । ४-४-१४४ ॥

शिवत्वमेव शिवतातिरित्यादि । इति यङ्लुगः ।

---

६१९. प्राक्क्रीताच्छः । ५-१-१ ॥

'तेन क्रीतम्' (५-१-३७) इत्यतः प्राक् चतुर्थ्यर्थेषु च्छोऽधिकृतः ।

६२०. तस्मै हितम् । ५-१-५ ॥

अस्मिन्नर्थे छः । वत्सेभ्यो हितो वत्सीयः । 'नञ्स्नञौ भवनात्' (४-१-८७) इति स्नोहितं स्नैणम् । पौंस्नम् ।

वृषब्राह्मणराजाचार्येभ्यो हितप्रत्ययो नेष्टः ।

६२१. शरीरावयवाद्यत् । ५-१-६ ॥

चक्षुष्यमञ्जनम् ।

६२२. खलयवमाषतिलवृषब्रह्मणश्च । ५-१-७ ॥

खलाय हितं खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृषाय हितं वृष्यम् । ब्रह्मण्यम् । चकारात् स्थाय हिता स्थ्या विस्तीर्णपद्धतिः । प्राक्क्रीतीयेषु तदन्तविधेरिष्टत्वात् कृष्णतिल्यमित्यादि ।

६२३. अजाविभ्यां थ्यन् । ५-१-८ ॥

अजाय हितं अजथ्यम् । अविथ्यम् । थ्यनि पुंवत्वमिष्टम् । अजायै हितमप्यजथ्यम् ।

६२४. आत्मन्विश्वजनभोगोत्तरपदात्खः । ५-१-९ ॥

आत्मने हितमात्मनीनम् ।

६२५. आत्माध्वानौ खे । ६-४-१६९ ॥

एतौ खे परे प्रकृत्या स्तः । इति नान्तोक्तटिलोपाभावः । विश्वजनीनः ।

पञ्चजनाच्चेष्टम् ।

पञ्चजनीनः ।

सर्वजनाट्ठञ् खञ्च ।

सार्वजनिकः । सर्वजनीनः ।

महाजनाट्ठञ् ।

माहाजनिकः ।

विश्वजनादिभ्यः कर्मधारयेभ्य एवेष्यते । भोगोत्तरपदात्तु राजभोगीनः

तद्धिते पूर्वपदस्थादपि ।

इति णत्वे पितृभोगीणः ।

आचार्यादणत्वं च ।

आचार्यभोगीनः । एषु भोगः शरीरम् । राज्ञे हितमित्यादिरेवार्थे इष्टः ।

६२६. सर्वपुरुषाभ्यां णढञौ । ५-१-१० ॥

सर्वस्मै हितः सार्वः । अस्माच्छोऽपि । सर्वीयः ।

पुरुषाद्धितबधविकारावयवसमूहतेनकृतेषु ढञ्वाच्यः ।

नो पौरुषेयमयमिच्छति पौरुषेये

सक्तो वधे पिशितमत्ति च पौरुषेयम् ।

द्राक् पौरुषेयगलभिन्न च पौरुषेयै-

र्जय्या विनिन्दति च वाचमपौरुषेयीम् ॥

६२७. माणवचरकाभ्यां खञ् । ५-१-११ ॥

माणवेभ्यो हितं माणवीनम् । चारकीणम् । चरका भिषजः ।

६२८. तदर्थं विकृतेः प्रकृतौ । ५-१-१२ ॥

विकृतिवाचिभ्यः तदर्था प्रकृतिरित्यर्थे छः । अङ्गारायैव प्रकृतित्वेन कृतमङ्गारीयं काष्ठम् ।

६२९. छदिरुपधिबलेर्ढञ् । ५-१-१३ ॥

एभ्यः प्रकृतौ ढञ् ।

छादिषेयस्तृणौघोऽयं बालेयास्तण्डुला इमे ।
उपधिश्चौपधेयश्च स्याङ्गं स्वार्थिकोऽस्य ढञ् ॥

६३०. ऋषभोपानहोर्व्यः । ५-१-१४ ॥

ऋषभार्थे प्रकृतिभूतः आर्षभ्यो वत्सः । औपानह्यं चर्म ।

६३१. चर्मणोऽञ् । ५-१-१५ ॥

चर्मविकारेभ्यः प्रकृतावञ् । वरत्रा प्रकृतिः वारत्रं चर्म ।

६३२. तदस्य तदस्मिन् स्यादिति । ५-१-१६ ॥

तदस्य स्यात्तदस्मिन् स्यादिति चार्थे छः । प्राकारोऽस्य स्यादिति प्राकारीयः शिलौचयः । इयता प्राकारो निर्वर्त्यतेत्यर्थः । एवं प्राकारीयं पुरम् । सोऽस्य सम्भवेदित्यर्थः । निधिरस्मिन् स्यादिति निर्धायो देशः ।

६३३. परिखाया ढञ् । ५-१-१७ ॥

परिखास्य सम्भवेदिति पारिखेयं पुरम् ।

६३४. उगवादिभ्यो यत् । ५-१-२ ॥

एषु चतुर्ष्वर्थेषूवर्णान्तात् गवादिभ्यश्च यत्स्यात् । पशुभ्यो हितं पशव्यम् । शङ्कर्थं दारु शङ्क्व्यम् ।

गोहविर्बर्हिरिष्टकामेधास्रुग्युगस्रुवदक्षरासुरस्रुवदरविषाण्वकूपेभ्यः ।

गवे हितं गव्यम् । हविष्यम् । बर्हिष्यम् । इष्टक्या मृत् । मेध्यम् । स्रुच्यम् । युग्यम् । स्रुव्यम् । अक्षर्यम् । असुर्यम् । स्रुर्यम् । दर्यम् । विष्यम् । अघ्न्यम् । 'ये चाभाव' (६-४-१६८) इति प्रकृतिभावः । कूप्यम् । तदन्तविधिना सुगव्यमित्यादि ।

नाभेर्नमध्यादेर्हांशात् ।

रथादेरक्षप्रवेशरन्ध्रं नाभिः । तस्मै हितो नभ्योऽक्षः । देहांशात्तु शरीरावयवाद्यति नाभ्यं तैलम् ।

ऊधसोऽनङ् च ।

ऊधन्यम् ।

शुनः सम्प्रसारणं दीर्घश्च वा ।

शुने हितं शुन्यम् । निर्जनदेशस्य श्वप्रियत्वात् शून्यः ।

६३५. कम्बलाच्च संज्ञायाम् । ५-१-३ ॥

कम्बलार्थत्वात् कम्बल्यमित्यूर्णाशतस्यास्या ।

६३६. विभाषा हविरपूपादिभ्यः । ५-१-४ ॥

हविर्विशेषेभ्योऽपूपादिभ्यश्च हितादौ वा यत् । पुरोडाशार्थास्तण्डुलाः पुरोडाश्याः । पुरोडाशीयाः ।

अपूपयूपदीपाश्वपत्रस्थूणार्गलमुसलकटककर्णवेष्टकसूपौदनपृथुकाभ्यूषावोषतण्डुलकिण्वेभ्यः ।

अपूप्यम् । यूप्यं दारु । दीप्यम् । अश्व्यम् । पत्र्यम् । स्थूण्यम् । अर्गल्यम् । मुसल्यम् । कटक्यं कर्णवेष्टक्यञ्च हेम । सूपौदनयोर्न भेदः । सूप्यम् । ओदन्यम् । पृथुक्यम् । अभ्यूष्यम् । अवोष्यम् । तण्डुल्यम् । किण्व्यम् । विकल्पाच्छः । अपूपीयम् । यूपीयं इत्यादि । तदन्तविधिना प्रदीप्यादि च ।

अन्नविशेषेभ्यश्च ।

विष्टयः विष्टीयो वा तण्डुलः । अन्नविशेषाणामेषां तदन्तविधिर्नास्ति । पठितानां च पूर्वादीनामस्तीति भेदः । गुडापूप्यम् । क्षीरोदन्यं इत्यादि । इति छभागः ।

---

६३७. प्राग्वतेष्ठञ् । ५-१-१८ ॥

ये तेन क्रीतमित्याद्या अर्था वतिविधेः पुरा ।
ठञविक्रियते तेषु ठगादिरहिते स्थले ॥

सप्तत्या क्रीतं साप्ततिकम् । प्रास्थिकम् ।

६३८. आर्हादगोपुच्छसंख्यापरिमाणाट्टक् । ५-१-१९ ॥

तदर्हतीत्येतदन्तं ठगेवाधिकृतो भवेत् ।
गोपुच्छादेस्तु ठञ् नेति तेषु ठञ् परिशिष्यते ॥

मुद्गैः क्रीतं मौद्गिकम् । गोपुच्छादेस्तु ठञ् । गौपुच्छिकम् । साप्ततिकम् । प्रास्थिकम् । स्वरे एव भेदः ।

६३९. असमासे निष्कादिभ्यः । ५-१-२० ॥

एभ्योऽसमासे एव ठक् । निष्कपणपादमाषवाहद्रोणषष्टिभ्यः । निष्कादयः परिमाणभेदा वक्ष्यन्ते । नैष्किकं । पाणिकं इत्यादि । समासे तु ठञ् ।

६४०. परिमाणान्तस्यासंज्ञाशाणयोः । ७-३-१७ ॥

परिमाणान्तस्याङ्गस्य वृद्धिर्कृत्तद्धिते परे उत्तरपदवृद्धिः स्यात् । संज्ञायां शाणस्य च न । उत्तमनैष्किकम् ।

६४१. शताच्च ठन्यतावशते । ५-१-२१ ॥

आर्हीयेषु असमस्ताच्छतशब्दादशते वाच्ये ठन्यतौ स्तः । शतेन क्रीतादि शतिकम् । शत्यम् । यत्र तु तदस्य परिमाणमित्यर्थे शतकं स्तोत्रमित्यादि शतात्मकमेव वस्तु वाच्यं तत्रोत्तरसूत्रतः कन्नेव । तथा समासेऽपि कन् । पणशतेन क्रीतं पणशतकम् ।

आपिशलिकाशकृत्स्नैरन्ये ठन्यताविति स्मरणात् ।
शत्यः शतिको गोगण इति सिध्येदित्यनिच्छयाह हरः ॥

६४२. संख्याया अतिशदन्तायाः कन् । ५-१-२२ ॥

अत्यन्तशदन्तवर्जितायाः सङ्ख्याया आर्हीयेषु कन् स्यात् । पञ्चभिः क्रीतः पञ्चकः । 'बहुगणवतु' (१-१-२३) इति सङ्ख्या । बहुभिः क्रीतो बहुकः । गणकः । डत्यन्तात्कतिकः ।

अर्धपूर्वः पूरणान्तः सङ्ख्यास्थः कन्समासयोः ।
पणैरर्धचतुर्थैर्हि क्रीतमर्धचतुर्थकम् ॥

अर्धं चतुर्थमेषामित्यर्धचतुर्थाः सार्धास्त्रयः ।

६४३. वतोरिड्वा । ५-१-२३ ॥

वत्वन्तात्तु कन इड् वा स्यात् । तावद्भिः क्रीतः तावतिकः । तावत्कः ।

६४४. विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् । ५-१-२४ ॥

आभ्यामनात्रि ड्वुन् ।

६४५. ति विंशतेर्डिति । ६-४-१४२ ॥

अस्य विंशतेर्डिति परे तिलोपः स्यात् । विंश अकः । 'अतो गुणे' (६-१-९७) विंशकः । त्रिंशतष्टिलोपः । त्रिंशकः । संज्ञायां तु विंशतिकः । त्रिंशत्कः । अत्र विंशतित्रिंशद्भ्यामिति विभागात्कन् ।

६४६. कंसाट्टिठन् । ५-१-२५ ॥

कंसपरिमितेन क्रीतं कंसिकम् । टित्त्वात्कंसिकी ।

अर्धाच्च वाच्यम् ।

अर्धिकम् । अर्धं रूपार्धम् ।

कार्षापणाट्टिठन् ।

प्रतिशब्दश्चास्यादेशो वा वाच्यः ।

कार्षापणेन क्रीतं कार्षापणिकम् । प्रतिकम् ।

६४७. शूर्पादञन्यतरस्याम् । ५-१-२६ ॥

द्विद्रोणश्शूर्पः । तेन क्रीतादि शौर्पम् । परिमाणत्वाद्ठञि शौर्पिकम् ।

६४८. शतमानविंशतिकसहस्रवसनादण् । ५-१-२७ ॥

शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ।

६४९. अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् । ५-१-२८ ॥

अध्यर्धपूर्वाच्छब्दात् द्विगोश्च परस्याहीयस्यानाम्नि लुक् । अध्यर्धशूर्पेण क्रीतं अध्यर्धशूर्पम् । द्विगोः द्विशूर्पम् । त्रिशूर्पम् । अर्धचतुर्थादेः समासे सङ्ख्यात्वात्तेषां शूर्पादिभिर्द्विगौ कृते लुक् । अर्धचतुर्थैः शूर्पैः क्रीतोऽर्धचतुर्थशूर्पः । पञ्चभिः गोणीभिः क्रीतः पञ्चगोणिः पटः ।

६५०. इद्गोण्याः । १-२-५० ॥

तद्धितलुकि सति गोण्या इत्स्यात् । इदिति विभागादन्यस्यापि । पञ्चभिः सूचीभिः क्रीतः पञ्चसूचिः । संज्ञायां तु लुङ् न । पञ्चलोहितिकमिति पञ्चगुञ्जापरिमितकनकाख्या । अत्र 'परिमाणान्तस्यासंज्ञा' (७-३-१७) इत्युत्तरपदस्य वृद्ध्यभावः ।

६५१. विभाषा कार्षापणसहस्राभ्याम् । ५-१-२९ ॥

एतदन्तादध्यर्धपूर्वद्विगोर्लुग्वा स्यात् । अध्यर्धकार्षापणम् । द्विकार्षापणम् । अत्र ठिठनो वा लुक् । अलुक्पक्षे प्रत्यादेशो वा । अध्यर्धप्रतिकम् । अध्यर्धकार्षापणिकम् । एवं द्विप्रतिकादि । अध्यर्धसहस्रम् । द्विसहस्रम् । अत्र शतमानाद्यणो वा लुक् । अलुकि

६५२. सङ्ख्यायाः संवत्सरसङ्ख्यस्य । ७-३-१५ ॥

सङ्ख्यायाः परस्य संवत्सरस्य सङ्ख्यावाचिनश्चोत्तरपदस्य वृद्धिः स्यात् । द्विसाहस्रम् । अध्यर्धस्यापि कृत्वसुचः अन्यत्र सङ्ख्यात्वमस्ति इतिः वृत्तिः । अध्यर्धसाहस्रम् ।

सुवर्णशतमानयोश्च वाच्यम् ।

कर्षपरिमितं हेम सुवर्ण इति विस्त इति चोच्यते । ठञो वा लुक् । अध्यर्धसुवर्णम् । अध्यर्धसौवर्णिकम् । अणो वा लुक् । अध्यर्धशतमानम् । अध्यर्धशातमानं इत्यादि ।

६५३ द्वित्रिपूर्वान्निष्कात् । ५-१-३० ॥

लुग्वा स्यात् । द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् ।

बहुपूर्वाच्च ।

बहुनिष्कम् । बहुनैष्किकम् ।

६५४. विस्ताच्च । ५-१-३१ ॥

उक्तपूर्वात् विस्ताद्वा लुक् । द्विविस्तम् । द्विवैस्तिकम् । त्रिविस्तम् । त्रिवैस्तिकम् । बहुविस्तम् । बहुवैस्तिकम् । सर्वत्र परिमाणान्तस्येत्युत्तरवृद्धिः ।

६५५. विंशतिकात्खः । ५-१-३२ ॥

एतदन्तादध्यर्धपूर्वाद्विगोः खः । अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् ।

६५६. खार्याः ईकन् । ५-१-३३ ॥

प्राग्वत् । अध्यर्धखारीकम् । द्विखारीकम् ।

केवलायाश्च वाच्यम् ।

खारीकम् ।

काकण्याश्च ।

अध्यर्धकाकणीकम् । द्विकाकणीकम् । काकणीकम् ।

६५७. पणपादमाषशताद्यत् । ५-१-३४ ॥

अध्यर्धपण्यम् । द्विपण्यम् । प्राण्यङ्गपादस्यैव पद्भावादिह 'पद्यत्यतदर्थे' (६-३-५३) इत्येतन्न । द्विपाद्यम् । द्विमाष्यम् । द्विशत्यम् । एवं अध्यर्धादपि ।

६५८. शाणाद्वा । ५-१-३५ ॥

शाणान्तादध्यर्धपूर्वात् द्विगोर्यद्वा । वेत्युक्तेः परिमाणठञो लुक् । द्विशाण्यम् । द्विशाणम् ।

शताच्च वाच्यम् ।

द्विशत्यम् । द्विशतम् ।

६५९. द्वित्रिपूर्वादण् च । ५-१-३६ ॥

द्वैशाणम् । त्रैशाणम् । चकाराद्यलुकौ च । अत्रासंज्ञाशाणयोरित्युक्तेरुत्तरपदवृद्ध्यभावात् पूर्वस्यैव वृद्धिः । शाण उन्मानभेदः ।

गुरुत्वमानमुन्मानं दैर्घ्यमाने प्रमाणगीः ।
प्रस्थादि परिमाणं स्यात्सङ्ख्या त्रिभ्योऽपि भिद्यते ॥

इह तून्मानस्यापि परिमाणत्वमिष्टम् । तत्र परिमाणान्युच्यन्ते ।

द्वे मुष्टी प्रसृतिस्ते द्वे कुडुबोऽञ्जलिसंमितः ।
चत्वारः कुडुबाः प्रस्थस्तच्चतुष्टयमाढकम् ॥
तदेव कंसः पात्रञ्च द्रोणः स्यात्तच्चतुष्टयम् ।
तौ द्वौ शूर्पः शूर्पयुगं गोणी वाहस्तु तद्द्वयम् ॥
वाहद्वयन्तु खारी तामन्ये हस्तघनां विदुः ॥

अथोन्मानानि ।

आचितं दशभाराः स्युर्भारस्स्याद्विंशतिस्तुलाः ।
तुला पलशतं प्रोक्तं शतमानं पलार्धके ॥
पलाङ्घ्रिरक्षः कर्षश्च कर्षाङ्घ्रिः शाण उच्यते ।
शाणाङ्घ्रिर्माष इत्युक्तः पञ्चांशस्तस्य कृष्णलः ॥
हेम्नः कर्षस्तु विस्तश्च सुवर्ण इति चोच्यते ।
माषश्शाणस्तलं मुष्टिः कुडुबश्च चतुर्गुणाः ॥
इत्युक्तेः परिमाणेऽपि शाणमाषौ मताविमौ ।
वराटकाख्यमूल्यानां विंशतिः काकणी भवेत् ॥
कार्षापणः पणो निष्को रूपकश्च समा इमे ।
तदर्धेऽर्धं च भागश्च पादस्तच्चतुरंशके ॥

इति ।

६६०. तेन क्रीतम् । ५-१-३७ ॥

अस्मिन्नर्थे ठञाद्यास्त्रयोदश यथोक्तं स्युः । साप्ततिकम् । मौद्गिकम् । नैष्किकम् । शत्यम् । शतिकं इत्यादि ।

मूल्यादेवेष्टम् ।

तेन वणिजा क्रीतमित्यादौ न । अर्धद्रोणेन क्रीतमिति परिमाणत्वाट्ठञ् ।

६६१. अर्धात्परिमाणस्य पूर्वस्य तु वा । ७-३-२६ ॥

अर्धात्परस्य परिमाणस्योत्तरपदस्य वृद्धिः स्यात् । पूर्वपदस्य तु वा स्यात् । आर्धद्रौणिकम् । अर्धद्रौणिकम् । अर्धप्रस्थेन क्रीतमित्यत्र

६६२. नातः परस्य । ७-३-२७ ॥

अर्धात्परस्य परिमाणगताकारस्य वृद्धिर्न । पूर्वपदस्य तु वा स्यात् । अर्धप्रस्थिकम् । आर्ध-प्रस्थिकम् ।

६६३. तस्य निमित्तं संयोगोत्पातौ । ५-१-३८ ॥

तस्य निमित्तभूतः संयोगः उत्पात इति वार्थे उक्ताः स्युः । ठक् । सङ्ग्रामनिमित्तः साङ्ग्रा-मिको योगः । शत्यो राजसंयोगः । शुभाशुभसूचक उत्पातः । शत्योऽग्निस्पन्दः ।

वातपित्तश्लेष्मसन्निपातेभ्यः शमनकोपनयोष्ठम्वाच्यः ।

वातस्य शमनं कोपनं वा वातिकमौषधं इत्यादि ।

६६४. गोद्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत् । ५-१-३९ ॥

गोशब्दात्संख्यादिवर्जितेभ्यो द्व्यच्भ्यश्चोक्तार्थयोर्यत्स्यात् । गव्यः संयोग उत्पातो वा । सुख्यः । ओजस्यं कर्म । क्रियापि सम्बन्धरूपा इत्याहुः । संख्यादेस्तु न यत् । पञ्चकः । अष्टकः । प्रास्थिकः । अर्धगणवसूर्णोमाभङ्गावर्षाश्मभ्योऽपि न । आश्विकः । गाणिकः । वासुकः । और्णिकः । औमिकः । भाङ्गिकः । वार्षिकः । आश्मिकः ।

ब्रह्मवर्चसाद्यद्वाच्यः ।

ब्रह्मवर्चस्यं कर्म ।

६६५. पुत्राच्छ च । ५-१-४० ॥

अस्मादुक्तार्थयोश्छो यच्च । पुत्रीयः पुत्र्यो वा योगः ।

६६६. सर्वभूमिपृथिवीभ्यामणञौ । ५-१-४१ ॥

क्रमात्स्तः । सर्वभूमेः निमित्तं संयोग उत्पातो वा अनुशतिकादित्वात् सार्वभौमः । पार्थिवः ।

६६७. तस्येश्वरः । ५-१-४२ ॥

६६८. तत्र विदित इति च । ५-१-४३ ॥

अनयोरर्थयोश्च सर्वभूमिपृथिवीभ्यामणञौ । सर्वभूमेरीश्वरः तत्र विदितो वा सार्वभौमः । एवं पार्थिवः ।

६६९. लोकसर्वलोकाभ्यां ठञ् । ५-१-४४ ॥

आभ्यां तत्र विदिते ठञ् । लौकिकः । अनुशतिकादित्वात् सार्वलौकिकः ।

६७०. तस्य वापः । ५-१-४५ ॥

तस्य वापस्थानमित्यर्थे ठञादिः । द्रोणस्य वापः क्षेत्रं द्रौणिकम् ।

६७१. पात्रात् घन् । ५-१-४६ ॥

पात्रमाढकम् । तद्वापः पात्रिकी भूः । षित्त्वात् ङीष् ।

६७२. तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते । ५-१-४७ ॥

तद्द्रव्यं वृद्ध्यादीनामन्यतमत्वेन दीयतेऽस्मिन्नित्यर्थे ठञादिः । पञ्चपणा वृद्धित्वेन स्वामिभागत्वेन लाभत्वेन राजभागत्वेनोत्कोचत्वेन वा यस्मिन् दीयन्ते स देशः पुरुषो वा धनसञ्चयो वा पञ्चकः । एवं शत्यशतिकादि ।

६७३. पूरणार्धाड्डन् । ५-१-४८ ॥

पूरणप्रत्ययान्तादर्धाच्च तदस्मिन् वृद्ध्यादि दीयत इत्यर्थे ठन् । द्वितीयोंऽशो वृद्ध्यादिरस्मिन् दीयत इति द्वितीयिकः । पञ्चमिकः । अर्धिकः ।

६७४. भागाद्यच्च । ५-१-४९ ॥

ठंश्च स्यात् । भागो रूपार्थम् । सोऽस्मिन् वृद्ध्यादित्वेन दीयत इति भाग्यः । भागिकः ।

६७५. तद्धरति वहत्यावहति भारादंशादिभ्यः । ५-१-५० ॥

वंशकुटजवल्वजमूलसेतुवास्थूणाशुल्कशाक्षशमेक्षुभ्यः । एभ्यः पराद्धरशब्दात्तद्धरतीत्यार्थे ठक् ।

देशान्तरप्रापणं वा मोषो वा हरणं भवेत् ।
वहनं स्यादुद्धरणमन्यतस्तूत्पादनं भवेत् ॥

वंशभारं नयति मुष्णात्युद्धरत्युत्पादयति वा वांशभारिकः । कौटजभारिकः । शाल्मलभारिकः । ऐक्षुभारिकः । भारभूतेभ्यो वंशादिभ्य इति च सूत्रार्थः । भारभूतवंशं हरतीत्यादौ वांशिकः । कौटजिकः । ऐक्षुकः ।

६७६. वस्नद्रव्याभ्यां ठन्कनौ । ५-१-५१ ॥

आभ्यां चतुर्थ्यर्थेषु क्रमात् ठन्कनौ । वस्नं मूल्यम् । वस्निकः । द्रव्यकः ।

६७७. सम्भवत्यवहरतिपचति । ५-१-५२ ॥

तत्सम्भवतीत्यार्थे ठञादिः ।

स्थाल्यादिना हि शाल्यादेस्तुल्यमानस्य धारणम् ।
सम्भवो न्यूनमानस्य धृतिस्त्ववहृतिर्भवेत् ॥

प्रस्थं सम्भवत्यवहरति वा प्रास्थिकी स्थाली । प्रस्थं पचति प्रास्थिकी स्थाली नारी वा ।

प्रस्थेन सम्यक् सम्पूर्यं प्रस्थाद्वा लेशतोऽधिका ।
पाकार्हजलयुक् प्रस्थपूर्या वा प्रास्थिकी ततः ॥

पचत्यर्थे द्रोणादण् च ।

द्रौणम् । द्रौणिकं वा पात्रम् ।

६७८. आढकाचितपात्रात्खोऽन्यतरस्याम् । ५-१-५३ ॥

परिमाणेभ्य एभ्यः संभवत्यार्थे वा खः । आढकीनः । आचितीनः । पात्रीणः । विकल्पाट्ठञि आढकिकादिः ।

६७९. द्विगोः ष्ठंश्च । ५-१-५४ ॥

द्विगोराढकाद्यन्तात् ष्ठन् खश्च वा स्यात् । विकल्पात् 'अध्यर्धपूर्व' (५-१-१८) इति ठञो लुक् च । द्व्याढकिकः । षित्त्वात् द्व्याढकिकी । द्व्याढकीनः । लुकि द्व्याढकः । एवमाचितपात्रयोः ।

६८०. कुलिजाल्लुक्खौ च । ५-१-५५ ॥

कुलिजान्तात् द्विगोः सम्भवत्यार्थे ठञो वा लुक् । खश्च ष्ठं श्च स्यात् । तेन चतुर्धा । ठञि द्वैकुलिजिकम् । लुकि द्विकुलिजिकम् । खे द्विकुलिजीनम् । ष्ठनि द्विकुलिजिकम् । द्वैकुलिजिकमित्यत्र 'परिमाणान्तस्य' (७-३-१७) इत्युत्तरपदवृद्धिप्राप्तौ

कुलिजस्य च नेति वाच्यम् ।

६८१. सोऽस्यांशवस्नभृतयः । ५-१-५६ ॥

सोऽस्यांशो मूल्यं भृतिरिति वार्थे ठञादिः । पञ्च देयांशोऽस्येति पञ्चकं धनम् । पञ्च मूल्यमस्येति पञ्चकः पटः । पञ्च भृतिरस्येति पञ्चको भृत्यो मासो वा ।

क्रयात्प्रागपि मूल्योक्त्यै सोऽस्य वस्न इतीरितम् ।
अयोग्यमूल्यक्रीतेऽपि प्रयोक्तुं क्रीतवर्णनम् ॥

६८२. तदस्य परिमाणम् । ५-१-५७ ॥

अस्मिन्नर्थे ठञ्ठगाद्याः स्युः । अत्र संख्यापि परिमाणम् । प्रास्थिको व्रीहिः । वार्षशतिकः कालः । अत्र क्वचित् द्विगोर्ढञ् न । तेन द्विषष्टिर्जीवितपरिमाणमस्येति ठञ् । 'संख्यायाः संवत्सर' (७-३-१५) इत्युत्तरपदवृद्धिः । द्विषाष्टिकः पुरुषः । एवं दशसहस्रपरिमितो दशसाहस्रः सङ्घः । शतमानाद्यण् ।

६८३. सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेषु । ५-१-५८ ॥

संज्ञायां सङ्घादिषु च वाच्येषु परिमाणार्थे संख्याया उक्तप्रत्ययाः स्युः । तत्र

संज्ञायां स्वार्थे ।

पञ्चैव पञ्चकाः शकुनयः । सङ्घे पञ्चकः सङ्घः । सङ्घशब्दाप्रयोगे तु क्लीबे पुंसि वा । तेषां पञ्चकम् । द्विकम् । षट्कम् । सूत्रे अष्टाध्यायाः परिमाणमस्येत्यष्टकं पाणिनीयम् । अध्ययने पञ्चकः पाठः । पञ्चवारपरिमित इत्यर्थः ।

६८४. पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्यष्टिसप्तत्यशीति-
नवतिशतम् । ५-१-५९ ॥

द्विगुणाः पञ्च परिमाणमस्या इति पङ्क्तिर्दशसंख्या । द्विदशकपरिमाणा विंशतिरित्यादि ।

६८५. पञ्चद्दशतौ वर्गे वा । ५-१-६० ॥

एतौ वर्गे वाच्ये वा स्तः । पञ्चपरिमितः समूहः पञ्चत् । दशत् । पञ्चकः । दशकः ।

६८६. त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् । ५-१-६२ ॥

आभ्यां ब्राह्मणनाम्नि डण् । त्रिंशदध्यायपरिमितं ब्राह्मणं त्रैंशद् । चात्वारिंशम् ।

६८७. तदर्हति । ५-१-६३ ॥

अस्मिन्नर्थे ठञ्ठगाद्याः स्युः । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः । अभिगममर्हत्यनुशति-
कादित्वादाभिगामिकः । शत्यः । शतिकः । 'नञ्स्नञौ भवनात्' (४-१-८७) स्त्रियमर्हन्
स्त्रैणो युवा ।

६८८. छेदादिभ्यो नित्यम् । ५-१-६४ ॥

एभ्यो नित्यमर्हतीत्यर्थे ठक् । छेदमेदद्रोहदोहनर्तकर्षसम्प्रयोगविप्रयोगविप्रकर्षप्रेषणसम्प्रश्नेभ्यः ।
छेदं सर्वदार्हन्ति च्छैदिका दस्यवः । भैदिकाः । द्रौहिकाः । दौहिकाः । नर्तो नर्तनम् ।
नार्तिका नटाः । कार्षिकः । साम्प्रयोगिकः । वैप्रयोगिकः । वैप्रकर्षिकः । प्रैषणिकः ।
साम्प्रश्निकः ।

विरागस्य विरञ्जादेशश्च ।

विरागं नित्यमर्हन्ति वैरञ्जिका विषयाः ।

६८९. शीर्षच्छेदाद्यच्च । ५-१-६५ ॥

तन्नित्यमर्हन् शीर्षच्छेद्यः । चाटुकि शैर्षच्छेदिकः ।

६९०. दण्डादिभ्यो यः । ५-१-६६ ॥

एभ्योऽर्हत्यर्थे यः स्यात् ।

दण्डमुसलमेघवधमधुपर्कार्घमेघोदकेभकशायुगेभ्यः ॥

दण्डघातं मुसलघातमर्हन् दण्ड्यः मुसल्यः । मेध्यः । वध्यः । मधुपर्क्यः । अर्घ्यो द्विजः । मेध्यः उदक्यश्च कालः । रजस्वलार्थे तु उदक्या प्रयुक्ता । इभ्यः । कश्योऽश्वः । युग्यः । स्तवार्हः स्तव्यः इति च माधवः ।

६९१. पात्राद्यश्च । ५-१-६८ ॥

यश्च स्यात् । अनीचजातित्वात्स्थालादिपात्रभोजनमर्हन् पात्रियः । पात्र्यः ।

६९२. कडङ्करदक्षिणाच्छ च । ५-१-६९ ॥

यश्च । कडङ्करो बुसम् । तदर्हन् कडङ्करीयः कडङ्कर्यो वा गौः । दक्षिणार्हो दक्षिणीयो दक्षिण्यः ।

६९३. स्थालीबिलात् । ५-१-७० ॥

अस्माच्छयौ । स्थालीबिलार्हाः स्थालीबिलीयाः स्थालीबिल्या वा शोधिततण्डुलाः ।

६९४. यज्ञर्त्विग्भ्यां घखञौ । ५-१-७१ ॥

यज्ञार्हं यज्ञियम् । ऋत्विगर्हः आर्त्विजीनो यष्टा । ऋत्विग्भावार्होऽप्यार्त्विजीनो द्विजः । आर्हीया गताः । अतः परं ठञेव निर्भयमास्ते ॥

६९५. पारायणतुरायणचान्द्रायणं वर्तयति । ५-१-७२ ॥

एभ्यस्तद्वर्तयतीत्यर्थे ठञ् स्यात् । कृत्स्नवेदजपं निर्वर्तयन् पारायणिकः । तुरायणाख्यं यज्ञं निर्वर्तयन् तौरायणिकः । चान्द्रायणिकः । प्राग्वर्तीयेषु संख्यापूर्वाणामपीष्टम् । द्वैपारायणिकः ।

६९६. संशयमापन्नः । ५-१-७३ ॥

संशयं प्राप्तः सांशयिकोऽर्थः ।

६९७. योजनं गच्छति । ५-१-७४ ॥

यौजनिकः ।

क्रोशशतयोजनशतयोश्च वाच्यम् ।

क्रौशशतिको योजनशतिकश्च तद्वन्ता ।

आभ्यां ततोऽभिगमनमर्हतीत्यर्थेऽपीष्टम् ।

क्रोशशतादभिगमनमर्हति क्रोशशतिको भिक्षुः । योजनशतिकः ।

६९८. पथः ष्कन् । ५-१-७५ ॥

पथिन्शब्दात् तद्वच्छतीत्यर्थे ष्कन् । पन्थानं गच्छन् पथिकः । पथिकी ।

६९९. पन्थो ण नित्यम् । ५-१-७६ ॥

नित्यं गच्छतीत्यर्थे पथः पन्थादेशो णश्च । पन्थानं नित्यं गच्छन् पान्थः ।

७००. उत्तरपथेनाहृतञ्च । ५-१-७७ ॥

अस्मात्तेनाहृतं तेन गच्छतीति चार्थे ठञ् । औत्तरपथिको भारोऽध्वगो वा ।

अजशङ्कुवारिजाङ्गलस्थलकान्तारपूर्वाच्च पथाद्व्यभिष्टः ।

अजपथेनाहृतमाजपथिकम् । तेन गच्छन्नप्येवम् । शाङ्कुपथिकम् । वारिपथिकम् । जाङ्गल-पथिकं इत्यादि । जङ्गलो मरुः । अजपथशङ्कुपथयोराहृतार्थ एव इति माधवः ।

स्थलपथान्मधुकमरिचयोरर्थयोराहृतेऽण्वाच्यः ।

स्थलपथेनाहृतं स्थालपथं मधुकं मरिचं वा । मधुकं मधुयष्टिः ।

७०१. कालात् । ५-१-७८ ॥

अतः परं व्युष्टादिभ्योऽण् (५-१-९७) इत्यन्तं कालात्यत्ययाः ।

७०२. तेन निर्वृत्तम् । ५-१-७९ ॥

कालेभ्योऽस्मिन्नर्थे ठञ् । मासेन निष्पादितं मासिकम् । 'अल्लोपोऽनः' (६-४-१३४) आह्निकम् ।

७०३. तमधीष्टो भृतो भूतो भावी । ५-१-८० ॥

अत्यन्तसंयोगद्वितीयान्तात्कालादधीष्टाद्यर्थे ठञ् । सत्कृत्य व्यापारितोऽधीष्टः । मासमधीष्टो

मासिको गुरुः । मासं भूतो मासिको दासः । मासं भूता मासिकी वृष्टिः । मासं भावी मासिक उत्सवः । एवं सांवत्सरिकादि ।

७०४. मासाद्वयसि यत्खञौ । ५-१-८१ ॥

वयसि द्योत्ये भूतार्थे एव सम्भवति मास्यो मासीनो वा बालः ।

७०५. द्विगोर्यप् । ५-१-८२ ॥

मासान्तात् द्विगोर्वयसि द्योत्ये यप् । द्वौ मासौ भूतो द्विमास्यः । दशमास्यः ।

७०६. षण्मासाण्ण्यच्च । ५-१-८३ ॥

अस्माद्वयसि ण्यट् यप् ठञ्च । षाण्मास्यः षण्मास्यः षाण्मासिको वा बालः ।

७०७. अवयसि ठंश्च । ५-१-८४ ॥

षण्मासाद्वयोद्योतनाभावे निर्वृत्ताद्यर्थपञ्चके ठन् ण्यट् च स्यात् । षण्मासिकः षाण्मास्यो वा ग्रन्थः ।

७०८. समायाः खः । ५-१-८५ ॥

समया निर्वृत्तादिः समीनः ।

७०९. द्विगोर्वा । ५-१-८६ ॥

समान्तात् द्विगोर्निर्वृत्तादौ वा खः । द्विसमीनो द्वैसमिको वा ग्रन्थः ।

७१०. रात्र्यहःसंवत्सराच्च । ५-१-८७ ॥

एतदन्तात् द्विगोर्निर्वृत्तादौ वा खः । द्विरात्रीणः । द्वैरात्रिकः । अहः खे टिलोपः । द्व्यहीनः । ठञ्यलोपः । द्वैयह्निकः । द्विसंवत्सरीणः । 'संख्यायाः संवत्सर' (७-३-१५) इत्युत्तरवृद्धिः । द्विसांवत्सरिकः ।

७११. वर्षाल्लुक् च । ५-१-८८ ॥

वर्षान्तात् द्विगोर्निर्वृत्तादौ खठञ् लुक् च । द्विवर्षीणः । द्विवर्षः । ठञि तु

७१२. वर्षस्याभविष्यति । ७-३-१६ ॥

भावीत्यर्थादन्यत्र संख्यायाः परस्य वर्षस्य वृद्धिः स्यात् । द्विवार्षिकं निवृत्तादि । द्वे वर्षे भावी तु द्वैवर्षिकः ।

७१३. चित्तवति नित्यम् । ५-१-८९ ॥

चेतने वाच्ये वर्षान्तात् द्विगोर्नित्यं लुक् ।

भूतार्थ एवेष्टम् ।

द्वे वर्षे भूतो द्विवर्षो गौः । अचित्ते तु द्विवर्षीणो व्याधिरित्यादि लेधा ।

७१४. षष्टिकाः षष्टिरात्रेण पच्यन्ते । ५-१-९० ॥

इत्यर्थे कश्चिद्व्रीहिः षष्टिको नाम ।

७१५. तेन परिजय्यलभ्यकार्यसुकरम् । ५-१-९३ ॥

कालात्तेन परिजय्यमित्याद्यर्थे ठञ् । मासेन परिजेतुं त्यक्तुं शक्यो मासिको व्याधिः । मासेन लभ्यं मासिकं धनम् । कार्यं मासिकं व्रतम् । सुकरं मासिकोऽयं प्रबन्धः ।

७१६. तदस्य ब्रह्मचर्यम् । ५-१-९४ ॥

तदित्युक्त्या प्राग्वत् द्वितीयान्तात्कालात् ब्रह्मचर्यमस्येत्यर्थे ठञ् । मासं ब्रह्मचर्यमस्येति मासिको व्रती । स कालोऽस्य ब्रह्मचर्यस्येत्यर्थेऽपि ठञ् । मासः कालोऽस्येति मासिकं ब्रह्मचर्यम् ।

महानाम्न्यादेस्तस्य ब्रह्मचर्यमिति ठञ्वाच्यः ।

महानाम्न्या व्रतं माहानामिकम् ।

भस्याढे

इति पुंवत्त्वात् माहानामन् इति स्थिते टिलोपः । एवमादित्यव्रतिकम् । गौदानिकम् ।

महानाम्न्यादेस्तच्चरत्यपि ठञ्वाच्यः ।

महानाम्न्या व्रतं चरन् माहानामिक इत्यादि । व्रताथोंऽन्तर्भूतः ।

अवान्तरदीक्षादिभ्यश्चरत्यर्थे डिनिर्वाच्यः ।

डित्त्वमुत्तरार्थम् । अवान्तरदीक्षी । तिलव्रती । देवव्रती । महाव्रती ।

अष्टाचत्वारिंशतो डुंश्च ।

चकाराड्डिनिः । अष्टाचत्वारिंशद्वर्षाणि व्रतं चरन्नष्टाचत्वारिंशकः । अष्टाचत्वारिंशी ।

चातुर्मास्याद्बलोपो ड्वुन् डिनिश्च ।

चातुर्मास्ययज्ञस्य व्रतं चरन् चातुर्मासकः । चातुर्मासी ।

७१७. तस्य च दक्षिणा यज्ञारव्येभ्यः । ५-१-९५ ॥

यज्ञनामभ्यस्तस्य दक्षिणेत्यर्थे ठञ् । वाजपेयस्य दक्षिणा वाजपेयिकी । राजसूयिकी ।

७१८. तत्र च दीयते कार्यं भववत् । ५-१-९६ ॥

कालेभ्यः तत्र देयं तत्र कार्यमित्यर्थयोर्भववत् कालात् ठञादयः स्युः । मासे देयं कार्यं वा मासिकम् । हैमनम् । सान्ध्यं इत्यादि ।

तत्र दीयत इत्यस्य यज्ञारव्यैरपि चान्वयात् ।

वाजपेये दीयमानमन्नाद्यं वाजपेयिकम् ॥

७१९. व्युष्टादिभ्योऽण् । ५-१-९७ ॥

व्युष्टनित्यनिष्क्रमणप्रवेशनतीर्थसंग्रामसंघाताग्निपदपीलुमूलादिभ्यः । व्युष्टं प्रभातम् । तत्र देयं कार्यं वा वैयुष्टम् । नैत्यम् । नैष्क्रमणम् । प्रावेशनम् । तैर्थम् । सांग्रामम् । साङ्घातम् । आग्निपदम् । पैलुमूलम् । आद्युक्तेः प्रावासम् । औपवासम् । पार्वणम् । श्राद्धम् ।

७२०. तेन यथाकथाचहस्ताभ्यां णयतौ । ५-१-९८ ॥

आभ्यां तेन दीयते कार्यमिति वार्थे क्रमाण्णयतौ स्तः । यथाकथाचेत्यनादरेऽव्ययसमुदायः । अनादरेण दीयते कार्यं वा याथाकथाचम् । हस्तेन देयं कार्यं वा हस्त्यम् ।

७२१. सम्पादिनि । ५-१-९९ ॥

तेन सम्पादीत्यर्थे ठञ् । शोभाविशेषः सम्पत्तिः । चन्दनेन विशेषतः शोभि चान्दनिकमुरः ।

७२२. कर्मवेषाद्यत् । ५-१-१०० ॥

कर्म व्यायामः । तेन सम्पाद्यौ कर्मण्यः । वेष्यः ।

७२३. तस्मै प्रभवति सन्तापादिभ्यः । ५-१-१०१ ॥

एभ्योऽस्मिन्नर्थे ठञ् ।

समस्तापनाहग्रामयोगवेशपेषघातपरायमोदनेभ्यः ।

सन्तापाय शक्तः सान्तापिकः । सान्नाहिकः । साङ्ग्रामिकः । सांयोगिकः । सांवेशिकः । साम्पेषिकः । साङ्घातिकः । सम्परायो युद्धम् । साम्परायिकः । साम्मोदनिकः ।

निरः पेषघोषाभ्याम् ।

नैष्पेषिकः । नैर्घोषिकः ।

निव्युपेभ्यः सर्गात् ।

नैसर्गिकः । वैसर्गिकः । उपसर्ग उपद्रवः । औपसर्गिकः ।

प्रोपाभ्यां वासात् ।

प्रावासिकः । औपवासिकः ।

सक्तुमांसौदनमांसौदनेभ्यश्च ।

साक्तुकः । मांसिकः । औदनिकः । मांसौदनिकः ।

७२४. योगाद्यच्च । ५-१-१०२ ॥

योगाय शक्तो योग्यो मुनिः । यौगिकः ।

७२५. कर्मण उकञ् । ५-१-१०३ ॥

कर्मणे शक्तं कार्मुकम् । धनुष्येव ।

७२६. समयस्तदस्य प्राप्तम् । ५-१-१०४ ॥

समयात्तदस्य प्राप्तमित्यर्थे ठञ् । समयोऽस्य प्राप्त इति सामयिकं कार्यम् ।

७२७. ऋतोरण् । ५-१-१०५ ॥

ऋतुरस्य प्राप्त इत्यार्तवं पुष्पम् । स्वयोग्यर्तौ प्राप्ते जातमित्यर्थः ।

उपवस्त्रादिभ्योऽप्यण्वाच्यः ।

उपवस्ता प्राप्तोऽस्येति औपवस्त्रं उपवासार्हः कालः । उपवास एव औपवस्त्रमित्यन्ये। प्राशिता प्राप्तोऽस्येति प्राशित्रं प्राशनार्थो हविर्भागः ।

७२८. कालाद्यत् । ५-१-१०७ ॥

कालः प्राप्तोऽस्येति काल्यं कर्म ।

७२९. प्रकृष्टे ठञ् । ५-१-१०८ ॥

प्रकृष्टो दीर्घः कालोऽस्येत्यर्थे ठञ् । कालिकं वैरम् ।

७३०. प्रयोजनम् । ५-१-१०९ ॥

तदस्य प्रयोजनमित्यर्थे ठञ् । तच्च फलं हेतुर्वा इति रामः । पौष्टिकं कर्म । मोक्षार्थी मौक्षिको नरः । हेतौ वैवाहिक उत्सवः ।

७३१. विशाखाषढादण् मन्थदण्डयोः । ५-१-११० ॥

विशिष्टा शाखा विशाखा । सा कारणमस्येति वैशाखो मन्थारव्या । आषाढः पलाशदण्डः ।

चूडादेरण्वाच्यः ।

चूडा प्रयोजनमस्येति चौळं कर्म । केळिः फलम् । कैळो देशः । श्रद्धाहेतुकं श्राद्धं कर्म ।

७३२. अनुप्रवचनादिभ्यश्छः । ५-१-१११ ॥

गायत्र्याद्युपदेशः प्रयोजनमस्येत्यनुप्रवचनीयो होमः । अत्र भोजः । उदुपाभ्यां स्थापेर-नान्ताच्छः । उत्थापनीयम् । उपस्थापनीयम् ।

अनोर्वाचिवासिविशिभ्यः ।

अनुवाचनीयम् । अनुवासनीयम् । अनुवेशनीयम् ।

रुहेः प्राङ्भ्यां च ।

वादनोश्च । प्ररोहणीयम् । आरोहणीयम् । अनुरोहणीयम् ।

समाङो विशिरभिभ्याम् ।

समावेशनीयम् । समारम्भणीयम् ।

विशिपूरिपदिरुहिभ्यः सपूर्वपदेभ्यः ।

अनान्तादिति सर्वत्र योज्यम् । गृहप्रवेशनीयम् । कलशपूरणीयम् । अश्वप्रपदनीयम् । प्रासादारोहणीयम् ।

पुण्याहस्वस्तिशान्तिभ्यो वाचनालुक् ।

प्रयोजनठञो लुक् । पुण्याहवाचनं प्रयोजननस्य पुण्याहवाचनम् । स्वस्तिवाचनम् । शान्तिवाचनम् ।

स्वर्गधनायुर्यशस्कामेभ्यो यत् ।

स्वर्गफलं स्वर्ग्यम् । धन्यम् । आयुष्यम् । यशस्यम् । काम्यम् ।

७३३. समापनात्सपूर्वपदात् । ५-१-११२ ॥

उक्तार्थे छः स्यात् । व्रतसमापनीयनन्नदानम् ।

७३४. ऐकागारिकट् चौरे । ५-१-११३ ॥

एष चोरेऽर्थे टित्निपात्यः । सजनं मोषितुनशक्यत्वादनन्यहार्यं गृहं प्रयोजनमस्येति ऐकागारिकश्चोरः । आत्मीयैकगृहपूरणार्थित्वाद्वा ।

७३५. आकालिकडाद्यन्तवचने । ५-१-११४ ॥

आदिरेवान्तकालोऽपि यस्य क्षणिकवस्तुनः ।
तस्मिन्निपातितोऽसौ टित्तस्मादाकालिकी तटित् ॥
अन्ये तु पूर्वेऽह्नयारब्धं यस्मिन् काले ज्वराधिकम् ।
उत्तरेऽह्नयपि तत्काले नष्टमाकालिकं विदुः ॥

आकालाट्ठञपि वाच्यः ।

छेदभावो भेदः । आकालिको तटित् । इति ठञ्भागः ॥

---

७३६. तेन तुल्यं क्रियाचेद्वतिः । ५-१-११५ ॥

तेन तुल्यमित्यर्थे क्रियायास्तुल्यत्वे वतिः स्यात् । वतेः स्वरादिपाठेनाव्ययत्वात्सुब्लुक् । रामवद्वर्तते । वसूनि तोयं घनवद्व्यकारीत् । तेनेति तच्छब्देन कर्मादेरपि ग्रहात् तृणवद्रिपुं छिनत्ति । क्षौमवद्वल्कलेन वस्ते इत्यादि । क्रिया चेदित्युक्तेः गुणतुल्यत्वे न । पित्रा तुल्यः स्थूलः । तत्रापि वर्तत इत्यादि क्रियाध्याहारे पितृवत्स्थूल इति स्यात् ।

७३७. तत्र तस्येव । ५-१-११६ ॥

तत्रेति तस्येवेति चार्थे गुणादितुल्यत्वेऽपि वतिः स्यात् । मथुरावत् द्वारवत्यां गृहम् । कृष्णवत् रामस्य वीर्यम् ।

७३८. तदर्हम् । ५-१-११७ ॥

तस्यार्हमित्यर्थे क्रियाया अर्हत्वे वतिः । राजवद्धर्मजश्चेष्टते । राज्ञो योग्यमित्यर्थः । स्त्रीवन्मा भूमेति भाष्योक्तेः 'स्त्रीपुंवच्च' (१-२-६६) इति सूत्रोक्तेश्च वतिना नञ्स्नञोर्बाधः ।

७३९. तस्य भावस्त्वतलौ । ५-१-११९ ॥

शब्दस्य प्रवृत्तिनिमित्तं भावः । तस्य भाव इत्यर्थे त्वतलौ स्तः । स्वभावात् क्लीबत्वस्त्रीत्वे । साधोर्भावः साधुत्वम् । साधुता ।

त्वतलोर्गुणवचनस्य पुंवत्त्वं वाच्यम् ।

सुन्दर्या भावः सुन्दरत्वम् । सुन्दरता । 'ह्रस्वात्तादौ' (८-३-१०१) इति षत्वम् । यजुष्ट्वम् । यजुष्टा । दीर्घात्तु गीस्त्वम् ।

७४०. आ च त्वात् । ५-१-१२० ॥

'ब्राह्मणस्त्वः' (५-१-१३६) इत्यतः प्राग्बाधकस्थलेऽपि त्वतलौ स्तः । पृथुत्वम् । पृथुता इत्यादि । नञ्स्नञ्भ्यामप्यनयोर्योगात्तलैव । स्त्रीत्वम् । स्त्रीता । पौंस्नम् । पुंस्त्वम् । पुंस्ता ।

७४१. पृथ्वादिभ्य इमनिज्वा । ५-१-१२२ ॥

एभ्यो भाव इमनिज्वा स्यात् ।

७४२. टेः । ६-४-१५५ ।

इष्टेमेयस्सु परेषु भस्य टेर्लोपः स्यात् ।

७४३. र ऋतो हलादेर्लघोः । ६-४-१५६ ॥

इष्टेमेयस्सु परेषु हलादेरङ्गस्य लघोः ऋकारस्य रः स्यात् । पृथोर्भावः प्रथिना । प्रदिमा । वेत्युक्तेर्वक्ष्यमाणोऽण् च । पार्थवम् । मार्दवम् । अहलादित्वाद्इमेय्यत्र रो न । अल्घुत्वात् कृष्णिमादौ न । किं बहुना ।

पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वनिष्टि ।

पृथुमृदुपटुपाण्डुखण्डचण्डस्वादुसाधुबहुमहद्गुरुतनुलघ्वर्थशुल्बघ्न्यः ।

प्रथिमा । प्रदिमा । पटिमा । पाण्डिमा । खण्डिमा । चण्डिमा । स्वादिमा । साधिमा ।

७४४. बहोर्लोपो भू च बहोः । ६-४-१५८ ॥

बहोः परयोरिमेयसोरादिलोपः स्यात् । बहोश्च भूभावः । भूमा । महिमा । अणिमा तनिमा । लघिमा । घ्रसिमा । लघिमा ।

होडवत्सपाकाकिञ्चनर्जुवक्रकालहस्तिक्षिप्रक्षुद्रप्रियोस्रुस्रुद्धतृप्तेभ्यश्च ।

आद्यास्त्रयो बालार्थाः । होडिमा । वत्सिमा । पाकिमा । अकिञ्चनिमा । ऋजिमा । वक्रिमा । कालिमा ।

७४५. स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः । ६-४-१५६ ॥

एषामिष्ठेमेयस्सु परेषु यणादिपरं लुप्यते । पूर्वस्येको गुणश्च स्यात् । द्रविमा । द्रेको गुणः । क्षेपिमा । क्षोदिमा ।

७४६. प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्तप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बर्हिगर्वर्षिवृन्दाघिवृन्दाः । ६-४-१५७ ॥

इष्टेमेयस्सु परेषु प्रियादीनां क्रमात् प्रादयः स्युः । प्रियस्य प्र । प्र इमन् । टिलोपे प्राद्ये

७४७. प्रकृत्यैकाच् । ६-४-१६३ ॥

इष्ठादिषु परेष्वेकाच् प्रकृत्या स्यात् । 'आद्गुणः' (६-१-८७) प्रेमा । इमनिजन्ताः पुंस्येव । क्लीबे तु प्रेमशब्दः प्रीञ औणादिकमनिनन्तः । उरोर्वर् । गुरोर्गर् । वृद्धस्य वर्षि । तृप्रस्य त्रप् । वरिमा । गरिमा । वर्षिमा । त्रपिमा । तृप्रं दुःखकरम् । सुखिमा प्रौढिमेत्यादिषु इमनिच् मृग्य इति वामनः ।

राकार्थे पूर्णिमाशब्दे भावे क्तान्तादि मप् किल ।
चन्द्रस्य पूरणं पूर्णं तन्निर्वृत्ता हि पूर्णिमा ॥

७४८. वर्णदृढादिभ्यः ष्यञ् च । ५-१-१२३ ॥

वर्णवाचिभ्यो दृढादिभ्यश्च भावे ष्यञ् इमनिच् स्यात् । शौक्ल्यम् । शुक्लिमा । काष्ण्यम् । कृष्णिमा । ष्यञः षित्करणादीकारो बहुलमिति वामनः । तेन ङीष् । 'हलः' (६-४-२) इति यलोपः । शौक्लीत्यादि । बहुलोक्तेः ब्राह्मण्यमित्यादौ न ङीष् । 'आ च त्वात्' (५-१-१२०) इत्युक्तेः शुक्लत्वम् । शुक्लता ।

दृढपरिवृढक्रशभृशाम्लचुक्रलवणमधुरशीतोष्णजडेभ्यः ।

दार्ढ्यम् । दृढत्वम् दृढिमा । पारिवृढ्यम् । परिवृढिमा । कार्श्यम् । क्रशिमा । भार्श्यम् । भ्रशिमा । आम्ल्यम् । अम्लिमा । चुक्रोऽम्लार्थः । चौक्र्यम् । चुक्रिमा । लावण्यम् । लवणिमा । माधुर्यम् । मधुरिमा । शैत्यम् । शीतिमा । औष्ण्यम् । उष्णिमा । जाड्यम् । जडिमा ।

बालतरुणमन्दमूकमूलकालमूर्खपण्डितबधिरस्थिरबहुलदीर्घेभ्यश्च ।

बाल्यम् । बालिमा । तारुण्यम् । तरुणिमा । मान्द्यम् । मन्दिमा । मौक्यम् । मूकिमा । मौल्यम् । मूलिमा । काल्यम् । कालिमा । मौर्ख्यम् । मूर्खिमा । पाण्डित्यम् । पण्डितिमा । बाधिर्यम् । बधिरिमा । स्थिरादीनां स्थैर्यम् । बाहुल्यम् । दैर्घ्यम् । इमनिचि प्रथ्यादिना स्वबंहिद्राघादेशाः । स्थेमा । बंहिमा । द्राघिमा ।

वेर्यातलातशारदेभ्यः ;

वैयात्यम् । वियातिमा । विलातो बालः । वैलात्यम् । विलातिमा । वैशारद्यम् । विशारदिमा ।

समश्च मतिमनोभ्याम् ।

चकाराद्वेश्च । सांमत्यम् । संमतिमा । वैमत्यम् । विमतिमा । सांमनस्यम् । वैमनस्यम् । टिलोपः । संमनिमा । विमनिमा । विमतिसम्मत्योरणपीति रामः । वैमतम् । सांमतम् ।

७४९. गुणवचनब्राह्मणादिभ्यः कर्मणि च । ५-१-१२४ ॥

क्रिया क्रियमाणश्च वस्तु कर्म । गुणवचनेभ्यो ब्राह्मणादिभ्यश्च भावे कर्मणि च ष्यञ् स्यात् । मूढस्य भावः कर्म वा मौढ्यम् । प्रागल्भ्यम् । कविना क्रियमाणं काव्यम् । 'आ च त्वात्' (५-१-१२९) इत्युक्तेरेषां कर्मण्यपि त्वतलौ । मूढस्य भावः कर्म वा मूढत्वम् । मूढता । एवं ब्राह्मणादेरपि ।

ब्राह्मणमाणवकबडधूर्तचोरचपलकुशलनिपुणमुहितपिशुनबालिशालसेभ्यः ।

ब्राह्मण्यम् । माणव्यम् । बाडव्यं इत्यादि । मुहितस्तृप्तः ।

गाडुलदीनदायादनिदग्धोचितसमग्रशीलतत्पेन्दंपरयथातथयथापुरपुन पुनरभीक्ष्णतरत - मप्रकामयथाकामेभ्यश्च ।

गाडुल्यम् । दैन्यम् । दायाद्यम् । दायादे दीयमानमपि दायाद्यं धनम् । वैदग्ध्यम् । वैदग्धी । औचित्यम् । औचिती । सामग्र्यम् । सामग्री । शीलस्य भावः शैली । तात्पर्यम् । ऐदम्पर्यम् । यथातथमित्यस्य भावो याथातथ्यम् । एवं यथापुर्यम । पुन.पुनर्जातस्य भावः पौनःपुन्यम् । आभीक्ष्ण्यम् । तरतमशब्दौ प्रत्ययानुकरणवशादरूपप्रकर्षवति बहुप्रकर्षवति चार्थे वर्तेते । तेन तरतमानां भावः तारतम्यमतिशयविशेषः । प्रकामभित्यस्य प्राकाम्यम् । याथाकाम्यम् । याथाकामी ।

एकद्वित्रिस्वान्येभ्यो भावात् ।

एषां पञ्चानां स्वार्थे ष्यञिति हरः । एकभावः एकत्वम् । तदेव ऐकभाव्यम् । द्वैभाव्यम् । त्रैभाव्यम् । स्वाभाव्यम् । आन्यभाव्यम् ।

तत्त्वसमविषमपरममध्येभ्यः स्यात् ।

तात्स्थ्यम् । स्वास्थ्यम् । सामस्थ्यम् । वैषमस्थ्यम् । पारमस्थ्यम् । माध्यस्थ्यम् । नञ्-पूर्वादपि । आस्वस्थ्यम् । आसमस्थ्यम् ।

निर्दुर्भ्यो कुलात् ।

नैष्कुल्यम् । दौष्कुल्यम् ।

दुष्कराजभ्यः पुरुषात् ।

दौष्पुरुष्यम् । कापुरुष्यम् । राजपुरुषात् ष्यञिति अनुशतिकादिपाठात् राजपौरुष्यम् ।

सुदुर्भ्यो भगात् ।

सौभाग्यम् । दौर्भाग्यम् । 'हृद्भग'(६-३-१९.) इति द्विवृद्धिः ।

व्याङुपेभ्यो रावयात् ।

वैरावव्यम् । आरावव्यम् । औपरावव्यम् । विरावयादयो जनपदतुल्यक्षत्रियापत्यानि ।

गणाधिभ्यां पत्युः ।

गाणपत्यम् । आधिपत्यम् ।

वेश्शायशस्तिभ्याम् ।

विशायस्य कर्म वैशाय्यम् । वैशस्त्यम् ।

स्वधिस्वर्जनयुवभ्यो राज्ञः ।

सौराज्यम् । आधिराज्यम् । स्वाराज्यम् । जानराज्यम् । यौवराज्यम् ।

अर्हतो नुम् च ।

आर्हन्त्यम् । आर्हन्ती ।

समो वदिविशिभ्यां णिनिः ।

सम्पूर्वाभ्यां णिन्यन्ताभ्यामाभ्यां ष्यञ् । संवादिनो भावः सांवाद्यम् । सांवेश्यम् ।

सम्पादीति माधवपाठः । साम्पाद्यं शोभावत्त्वम् ।

वहोश्च भाषः ।

समो वहोश्च पराणिन्यन्तात् भाषे ष्यञ् । बाहुभाष्यम् । साम्भाष्यम् ।

शीर्षनिर्विभ्यो हनः ।

णिन्यन्तादेव । शैर्षघात्यम् । नैर्घात्यम् । वैघात्यम् ।

नञः क्षेत्रज्ञेश्वरविदूरपिशुनानृशंसयथातथयथापुरेभ्यः ।

'नञः शुचीश्वर' (७-३-३०) इत्युत्तरवृद्धिः । पूर्वस्य वा । आश्वैत्रेयम् । अश्वैत्रेयम् । आनैश्वर्यम् । अनैश्वर्यम् । आविदूर्यम् । आपिशुन्यम् । आनृशंस्यम् ।

७५०. यथातथयथापुरयोः पर्यायेण । ७-३-३१ ॥

नञ्पूर्वयोरेतयोः पूर्वपदस्योत्तरपदस्य वा पर्यायेण वृद्धिः स्यात् । आयथातथ्यम् । अयाथातथ्यम् । आयथापुर्यम् । अयाथापुर्यम् ।

सधर्मानुकूलपरिमण्डलविश्वरूपत्विगुदासीन्यश्वपतिभूसाक्षिमानुषान्तिकनास्तिकैतिह्ययुगपत्पूर्वापरोत्तराधरादिभ्यश्च ।

साधर्म्यम् । आनुकूल्यम् । पारिमाण्डल्यम् । अनुगतिकादिः । वैश्वरूप्यम् । आर्त्विज्यम् । औदासीन्यम् । ऐश्वर्यम् । प्रातिभाव्यम् । अनुशतिकादिः । साक्ष्यम् । मानुष्यम् । आस्तिक्यम् । नास्तिक्यम् । ऐतिह्यम् । यौगपद्यम् । पौर्वापर्यम् । औत्तराधर्यम् । आवृक्तेः पारिशेष्यम् । वैधर्म्यम् । ऐकैकश्यम् । एकैकश इत्यव्ययस्त्वाद्विलोपः । औगह्यम् । धाधातोः क्यनिपि धीवा । धैर्यम् । द्वयोर्दण्डिनाद्युक्त्या नस्य तत्वम् ।

चातुर्वर्ण्यचातुराश्रम्यचातुर्वैद्यत्रैवर्ण्यत्रैलोक्यत्रैकाल्यत्रैरूप्यत्रैबन्ध्यपाङ्गुण्यसैन्यसान्निध्यसामीप्यौपम्यसौल्यसार्ववैद्यादीनां स्वार्थे ।

चत्वारो वर्णा एव चातुर्वर्ण्यम् । चतस्रो विद्याश्चातुर्वैद्यम् । सर्वे वेदा एव सार्ववैद्यम् । अनुशतिकादी । माधवस्तु चतुर्वेदः सर्ववेदश्च तदध्येता । स एव चातुर्वैद्य सार्ववैद्यश्चेत्याह । सेनैव सैन्यम् । उपमैवौपम्यम् । आवृक्तेः मणिक एव मार्णिक्यम् । अलस एव आलस्यः । विडेव वैश्यः । करुणैव कारुण्यम् । समानः साधारणः । स एव सामान्यः । तदर्थ एव तादर्थ्यः । कविः शुक्रः । स एव काव्यः । परम्परेति रूढिसिद्धा । सैव पारम्पर्यमिति हरः । इति पादावधिर्भावकर्माधिकारः ॥

७५१. स्तेनाद्यन्नलोपश्च । ५-१-१२५ ॥

स्तेयम् । स्तेनादिति विभज्य ष्यञि कृते स्तैन्यम् ।

७५२. सख्युर्यः । ५-१-१२६ ॥

सख्यम् । वीरवीर्यौ च इति स्वरसूत्रोक्तेर्वै वीर्यमपीति स्वामी ।

दूतवणिग्भ्यां च वाच्यम् ।

दूत्यम् । वणिज्यम् । स्वभावात् स्त्रीत्वेन वणिज्येति माधवः । आभ्यां ष्यञ्चेति भोजः । दौत्यम् । वाणिज्यम् ।

७५३. कपिज्ञात्योर्ढक् । ५-१-१२७ ॥

कापेयम् । ज्ञातेयम् ।

७५४. पत्यन्तपुरोहितादिभ्यो यक् । ५-१-१२८ ॥

सैनापत्यम् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापीति सपत्नीशब्दस्यापि ग्रहे भस्याढ इति पुंवत्त्वात् सापत्यम् । न्यासमते पुंवत्त्वाभावात् सापत्न्यम् ।

पुरोहितसूचकराजन्यसराजसारथ्यादिभ्यः ।

पौरोहित्यम् । सौचक्यम् । राज्यम् । साराज्यम् । सारथ्यम् । राज्यं ब्राह्मणादिष्यञीति केचिदिति माधवः ।

७५५. प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । ५-१-१२९ ॥

प्राणिजातेः आश्वम् । औष्ट्रम् । मनुष्यस्यापत्ययलोपः । मानुषम् । मानुष्यन्तु मानुषात् ष्यञ्युक्तम् । वयोवचनात् कौमारम् । कैशोरम् ।

उद्गातृप्रतिहर्तृकर्तृहोतृप्रशास्तृध्वर्युवधूसुष्ठुदुष्ठुरथगणकपत्तिगणकेभ्यः ।

औद्गात्रम् । औन्नेत्रम् । प्रातिहर्त्रम् । कार्त्रम् । हौत्रम् । प्राशास्त्रम् । आध्वर्यवम् । बाधवम् । सौष्ठवम् । दौष्ठवम् । राथगणकम् । पात्तिगणकम् । भर्तृत्वं भार्त्रमित्यपि माधवः ।

७५६. हायनान्तयुवादिभ्योऽण् । ५-१-१३० ॥

द्विहायनत्वं द्वैहायनम् ।

युवस्थविरभ्रातृभ्रजमानमिथुनपिशुननिपुणकुशलचपलकुलीनानृशंसेभ्यः ।

यौवनम् । स्थाविरम् । भ्रात्रम् । कौलीनम् । आनृशंसम् ।

सहस्रश्रावणकुतुपकुतूहलवृषलकन्दुककमण्डलुकितवपोतुक्षेत्रज्ञपरिव्राजकसब्रह्मचारिभ्यश्च ।

सहसः कर्म साहसम् । श्रावणम् । कौतुकम् । कौतूहलम् । वार्षलम् । कान्दुकम् । गण्डुकेति पाठे गाण्डुकम् । गण्डुकः कन्दुक एव । कामण्डलवम् । कैतवम् । पोतुः पविता । पोतवम् । क्षैत्रज्ञम् । पारिव्राजकम् । सब्रह्मचारिगष्ठिलोपः । साब्रह्मचारम् ।

सुदुर्भ्यां हृदः ।

सौहार्दम् । दौर्हार्दम् । 'हृद्भग' (७-३-१२) इति द्विवृद्धिः । मित्रशत्रुपर्याययोस्त्वुत्तरवृद्धिर्न । सौहृदम् । दौर्हृदम् ।

भ्रातुश्च ।

सुदुर्भ्यामेव । सौभ्रात्रम् । दौर्भ्रात्रम् ।

कोश्च स्त्रियाः ।

चात्सुदुर्भ्याञ्च । कौख्यम् । सौख्यम् । दौःख्यम् ।

पुरुषहृदयाभ्यामसमासे ।

पौरुषम् । 'हृदयस्य हृल्लेख' (६-३-५०) इति हृदादेशः । हृदयस्य कर्म हार्दं स्नेहः ।

श्रोत्रियस्य यलोपश्च ।

श्रोत्रियत्वं श्रौत्रम् ।

७५७. इगन्ताच्च लघुपूर्वात् । ५-१-१३१ ॥

इगन्तादुपान्तलघुकाच्छब्दाद्भावकर्मणोरण् । शुचेर्भावः शौचम् । मौनम् । मार्दवम् । सौरभ्योऽस्त्रियामित्युक्तेस्तन्पुंस्यपि । गुरुलघ्वादेरुत्तरपदवृद्धिमाह भोजः । दोषस्य गुरुलाघवम् । कवेः ष्यञेवेष्टः । काव्यम् ।

७५८. योपधाद्गुरूपोत्तमाद्वुञ् । ५-१-१३२ ॥

रामणीयकम् । आचार्यकम् ।

सहायाद्वेति वाच्यम् ।

साहायकम् । साहाय्यम् । ख्याञो यस्य श्रवद्भावात्सुपस्त्यान् ष्यञेव । सौप्रख्यम् ।

७५९. द्वन्द्वमनोज्ञादिभ्यश्च । ५-१-१३३ ॥

वुञ् स्यात् । द्वन्द्वात् शिष्योपाध्याययोर्भावः शैष्योपाध्यायिका । स्वभावात्स्त्रीत्वम् ।

मनोज्ञप्रियरूपकल्याणाढ्यमेधाविब्रह्मचारिछान्दसश्रोत्रियचोरधूर्तविश्वदेवयुववृद्धामुष्यकुलावश्यबहुलेभ्यः ।

मनोज्ञस्य भावो मानोज्ञकम् । प्रैयरूपकम् । कालयाणकम् । आढ्यकम् । मैधावकम् । ब्रह्मचारकम् । छान्दसकम् । श्रौत्रियकम् । चौरकम् । चौरिकेयमपि इष्टम् । धौर्तकम् । वैश्वदेवकम् । यौवनिका । अत्र 'नस्तद्धिते' (६-४-१४४) इति टिलोपः ।

प्रकृत्याकः ।

इति प्रकृतिभावान्न । वार्धकम् । आमुष्यकुलिका । आवश्यकम् । बाहुलकम् ।

कुलामुष्यरसेभ्यः पुत्रात् ।

कौलपुत्रकम् । आमुष्यपुत्रिका । रासपुत्रकम् ।

ग्रामात्कुमारषण्डाभ्यां च ।

चात्पुत्राच्च । ग्रामकुमारस्य कर्म ग्रामकुमारकम् । ग्रामषण्डकम् । ग्रामपुत्रकम् । कौलकमित्यपि माधवः । सत्कुलत्वञ्च तत् ।

७६०. गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । ५-१-१३४ ॥

गोत्राचरणाच्च श्लाघादौ विवक्षिते भावकर्मणोः वुञ् । अत्याकारोऽधिक्षेपः । तदवेत इति तत्प्राप्तस्तदवगतवान्वा । गोत्रात् गार्गिकया श्लाघते गार्गिकयाधिक्षिपति गार्गिकां प्राप्तः गार्गिकामवगतवान् । एवं मित्रयुगोत्रेण श्लाघते मैत्रेयिकया श्लाघते । 'केकयमित्रयु (७-३-२) इति यादेरियः । चरणो विद्याकृतं नाम । काठिकया श्लाघते । वैयाकरणिकयाधिक्षिपतीत्यादि ।

७६१. होताध्यर्छः । ५-१-१३५ ॥

होता इति ऋत्विग्भेदाः । अच्छावाकीयम् । मैत्रावरुणीयम् ।

७६२. ब्रह्मणस्त्वः । ५-१-१२६ ॥

ब्रह्मन्यस्य ऋत्विजो भावो ब्रह्मत्वम् । छतलोर्वाधार्थं त्वविधिः ।

७६३. न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवट्वुधकतरसल-सेभ्यः । ५-१-१२१ ॥

नञ्पूर्वात्तत्पुरुषादिसनिजादयो भावप्रत्यया न स्युः । तस्मात् अपतित्वमपतिनेत्यत्र पत्यन्ताद्यड् न । चतुरसङ्गतादेस्तु नञि यथार्हं स्यादेव । तेन प्यञ् । आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आवुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् । तत्पुरुषादित्युक्तेः बहुव्रीहौ प्यञादि स्यात् । आनृण्यमिति ।

भोजोक्तोऽनुशतिकादिरत्रोच्यते । अनोरशतिकहोडसंवरणहस्तसंवत्सरागाम् । शतेन क्रीतं शतिकं वस्त्रादि । तेनानुगतोऽनुशतिकः । तस्येदमानुशतिकम् । अनुहोडेन चरत्यानुहोडिकः । अनुसंवरणं देयमानुसांवरणीयकम् । एवमानुसांवत्सरिकम् । कुरोः कतपञ्चालयोः । कुरुकतस्य पौत्रः कौरुकात्यः । गर्गादिः । कुरुपञ्चालेषु भवः कौरुयाञ्चालः । अधेर्दैवभूतयोः । इहपराभ्यां लोकस्य । सर्वाङ्भूमिपुरुषयोश्च । चकारालोकस्य च । अस्याद्धत्यहेत्योः । अस्यहत्यशब्दवानध्यायः आस्यहात्यः । विद्युक्तादिः । अस्यहेतिः प्रयोजनमस्येत्यास्यहैतिकः । निपातनादलुक् ।

बध्योगप्रयोगाभिगमाङ्गारवेणुपरखापुष्करसदुदकशुद्धसूत्रनडचतुर्विद्यासिहत्याशतकुम्भनुखशयनार्दीनाञ्च । बध्योगपौत्रो बाध्योगः । विदादिः । अपत्यादि आङ्गारवैणवः । अत इञि औदकशौद्धिः । सौत्रनाडिश्च । आद्युक्तेः पुरोमाजानशात्रवी इति माघोक्तावनुशतिकादित्वव्याख्या । राजपुरुषपरिमण्डलप्रतिभूसर्वेदादीनां प्यञ् । इति ।

द्वासदिस्तु—

श्रियं सौवीं सौवीमिव वहसि सौवादुहृदवीम्
गतिं धत्से च त्वं वचसि विपरत्सौवरगुणे ।

द्विजान्नित्यं सौवस्तिकयसि च शौवस्तिकपरः
सति त्वय्यन्येषां नृवर चरितं शौवनमिव ॥

इति ।

७६४. धान्यानां भवने क्षेत्रे खञ् । ५-२-१ ॥

धान्येभ्यस्तस्य भवनं क्षेत्रमित्यर्थे खञ् स्यात् । उद्भवत्यस्मिन्निति भवनम् । मौद्गीनं क्षेत्रम् ।

७६५. व्रीहिशाल्योर्ढक् । ५-२-२ ॥

व्रैहेयं क्षेत्रम् । शालेयम् ।

७६६. यवयवकषष्टिकाद्यत् । ५-२-३ ॥

यव एव यवकः । अजमोदेत्यन्ये । यव्यं क्षेत्रम् । यवक्यम् । षष्टिक्यम् ।

७६७. विभाषा तिलमाषोमाभङ्गाणुभ्यः । ५-२-४ ॥

एभ्यो वा यत् । तिल्यम् । खञि तैलीनम् । माष्यम् । माषीणम् । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । अणव्यम् । आणवीनम् ।

७६८. सर्वचर्मणः कृतः खखञौ । ५-२-५ ॥

अस्मात्तेन कृते खखञौ स्तः । सर्वचर्मणा कृतः सर्वचर्मीणः कुम्भः । सार्वचर्मीणः ।

७६९. यथामुखसम्मुखस्य दर्शनः खः । ५-२-६ ॥

आभ्यां तस्य दर्शनाश्रय इत्यर्थे खः । मुखसदृशं दृश्यतेऽस्मिन्निति यथामुखीन आदर्शः । सम्यङ्मुखं दृश्यतेऽस्मिन्निति सम्मुखीनोऽभिमुखः । यथास्थितं मुखं दृश्यतेऽस्मिन्निति यथामुखीनोऽपि अभिमुख इति भट्टिः । मानेन तल्पेप्वयथामुखीनात् इति ।

७७०. तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति । ५-२-७ ॥

सर्वादिभ्य एभ्यस्तद्व्याप्नोतीत्यर्थे खः । सर्वपथं व्याप्नोतीति सर्वपथीना सेना । सर्वाङ्गीणस्तापः । सर्वकर्मीणा शिक्षा । सर्वपत्रीणः सारथिः शरः अन्नं वा । सर्वपात्रीणमन्नं दानं वा ।

७७१. आप्रपदं प्राप्नोति । ५-२-८ ॥

अत्रार्थे खः । अभिविधावाङ् । आप्रपदीनं वासः । सर्वाङ्गाच्छादनक्षममित्युच्यते ।

७७२. अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । ५-२-९ ॥

अनुपदादेः क्रमात् बद्ध इत्याद्यर्थे खः । अनुपदं बद्धा अनुपदीना उपानत् । पदायामानुगुण्यं योजनेत्यर्थः । सर्वविधमन्नं भक्षयन् सर्वान्नीनोऽभिधीः । अयनवो नाम शकटानां गतिभेदः । तत्रेतव्यः अयानयोनः शारः । प्रथमसन्निवेशित इत्यर्थः ।

७७३. परोवरपरम्परपुत्रपौत्रमनुभवति । ५-२-१० ॥

परानवरांश्चानुभवन्ती परोवरीणा स्त्री । ओत्वं निपात्यम् । परान् परतरांश्चानुभवन् परम्परीणो मन्त्री । परम्परभावो निपात्यः । पुत्रपौत्रीणो वृद्धः ।

७७४. अवारपारात्यन्तानुकामं गामी । ५-२-११ ॥

एभ्यस्तद्गामीति खः । अर्वाक्तीरपरतीरं गमिष्यन् अवारपारीणः ।

व्यस्ताद्विपर्यस्तादपि ।

अवारीणः । पारीणः । पारावारीणः । अत्यन्तं गामी अत्यन्तीनः । यथेष्टं गन्ता अनुकामीनः ।

७७५. समां समां विजायते । ५-२-१२ ॥

समायां समायामिति शब्दस्य यलोपो निपात्यः । तन्मात्रमूत इत्यर्थे खः । समांसमीना गौः । अत्र पूर्वपदस्यालुग्वाच्यः । तेन समामिति विभक्त्यंशश्रुतिः ।

७७६. अद्यश्वीनावष्टब्धे । ५-२-१३ ॥

अवष्टब्धमासन्नम् । आसन्ने विजनने द्योत्ये अद्यश्वीनः गौः । आसन्नमात्रेऽपि अद्यश्वीनः सङ्गमः ।

७७७. आगवीनः । ५-२-१४ ॥

आगोमात्पर्याप्तात्कर्मकुर्वन् भृत्य आगवीनः । गोदोहनमस्य वेतनमित्यर्थः ।

७७८. अनुग्वलं गामी । ५-२-१५ ॥

अनुगुशब्दादमिमन्नर्थे खः । गोः पश्चादत्यन्तं गच्छन् अनुगवीनः ।

७७९. अध्वनो यत्खौ । ५-२-१६ ॥

अध्वानमलं गच्छन् अध्वन्यः । अध्वनीनः । 'ये चाभावकर्मणोः' (६-४-१६८) 'आत्माध्वानौ खे' (६-४-१६९) इति द्वयोः प्रकृतिभावः ।

७८०. अभ्यमित्राच्छ च । ५-२-१७ ॥

अभ्यमित्रमलंगामीत्यर्थे यत्खौ छ च स्मृताः ।
अभ्यमित्र्योऽभ्यमित्रीणोऽभ्यमित्रीय इत्यपि ॥

७८१. गोष्ठात् खञ् भूतपूर्वे । ५-२-१८ ॥

गोष्ठत्वेन भूतपूर्वो देशो गौष्ठीनः ।

७८२. अश्वस्यैकाहगमः । ५-२-१९ ॥

अत्र खञ् । अश्वस्यैकाहेन गम्य आश्वीनः पन्थाः ।

७८३. शालीनकौपीने अधृष्टाकार्ययोः । ५-२-२० ॥

शालां प्रवेष्टुमर्हःशालीनो लज्जितः । प्रच्छाद्यं हि वस्तु कूपपक्षेपमर्हतीत्यकृत्यं प्रच्छादयत्वात्कौपीनम् । प्रच्छादयत्वसाम्यालिङ्गेऽपि । तदाच्छादने च लक्षणया ।

७८४. व्रातेन जीवति । ५-२-२१ ॥

अत्र खञ् ।

भाराद्यैर्जीवतां सङ्घो व्रातस्तत्कर्म खल्विह ।
व्रातं स्यात्तेन जीवन्तो व्रातीना वाहकादयः ॥

७८५. सासपदीनं सख्यम् । ५-२-२२ ॥

सप्तभिः पदन्यासैः वचनैर्वा प्राप्यं सासपदीनं सख्यम् । सासपदीनः सखा इत्यपि लक्षणया ।

७८६. हैयङ्गवीनं संज्ञायाम् । ५-२-२३ ॥

खो गोदोहजन्यस्य नवनीतस्याख्या ।

७८७. तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणञ्जाहचौ । ५-२-२४ ॥

क्रमाद्योज्यम् । न चुञ्चुचणचरजाहटीटपञ्चवक्राभ्येषु इति जाहचो अभ्येत्वं न । पीलोः पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम् ।

पीलुकर्कन्धूशमीकरीरकुवललवलाश्वत्थखदिरेभ्यः ।
कर्णाक्षिनखमुखकेशादगुल्फभ्रूशृङ्गदन्तोष्ठपुष्पेभ्यः ।

७८८. पक्षात्तिः । ५-२-२५ ॥

पक्षान्मूले तिः । पक्षतिः प्रतिपत् गरुन्मूलं वा ।

७८९. तेन विक्तश्चुञ्चुप्चणपौ । ५-२-२६ ॥

तेन प्रसिद्ध इत्यर्थे एतौ स्तः । विद्यःचुञ्चुः । विद्याचणः ।

७९०. विनञ्भ्यां नानाञौ न सह । ५-२-२७ ॥

न सहेत्यर्थवाचिभ्यां विनञ्भ्यां स्वार्थिकौ क्रमात् ।
नानाञौ स्तो नात्रि वृद्धिर्विना नानेति सिध्यति ॥

सङ्ख्यादिहीननिपातार्थवृत्तित्वादनयोः सामान्योक्ता सुविभक्तिरेव ।

७९१. तद्धितश्चासर्वविभक्तिः । १-१-३८ ॥

सर्वविभक्तिरहितस्तद्धितान्तोऽव्ययसंज्ञः । इति लुक् । विना । नाना ।

७९२. वेः शालच्छङ्कटचौ । ५-२-२८ ॥

विस्तृतार्थाद्विः स्वार्थे एतौ स्तः । विशालम् । विशङ्कटम् ।

७९३. सम्प्रोदश्च कटच् । ५-२-२९ ॥

सम्बाधप्रकाशाधिकार्थेभ्यश्च सम्प्रोद्भ्यो वेश्च स्वार्थे कटच् स्यात् । सङ्कटम् । प्रकटम् । उत्कटम् । विकटम् । नेः समीप इति भोजः । निकटम् ।

अलाबूतिलोमाभङ्गादिभ्यो रजसीष्टम् ।

अलाबूनां रजः अलाबूकटमित्यादि ।

पशुनामभ्यः स्थाने गोष्ठद्वाच्यः ।

गोगोष्ठम् । महिषीगोष्ठम् ।

अवेः सङ्घाते कटच् ।

विस्तारे पटच् ।

अवीनां सङ्घातः अविकटः । तेषां विस्तारेण स्थितिरविपटः ।

द्वित्वे गोर्युगप् ।

षट्त्वे षड्गवच् ।

द्वयं पशुनामभ्य एव । उक्षगोयुगम् । हस्तिषड्गवम् ।

स्नेहे तैलच् ।

इङ्गुदीतैलम् । तिलतैलम् ।

भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ।

इक्षुशाकटम् । इक्षुशाकिनम् । एवं मूलकजीरकशाल्यादिभ्यः । स्वामी तु भवने क्षेत्रे सर्वेभ्य एतौ मन्यते ।

७९४. अवात्कुटारच्च । ५-२-३० ॥

चकारात्कटच् । अवकुटारम् । अवकटम् । एतावनते प्रसिद्धाविति हरः ।

७९५. नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः । ५-२-३१ ॥

नासिकानमने वाच्ये नाम्न्यवादेते स्युः । अवटीटम् । अवनाटम् । अवभ्रटं च नासिकानमनम् । तद्योगादवटीटा नासिका । अवटीटः पुरुषः । एवं अपकृष्टवस्तुनि दृष्टे मुखनमनात् तदप्यवटीटादि वाच्यमिति नाथः ।

७९६. नेर्बिडञ्बिरीसचौ । ५-२-३२ ॥

नेर्नीरन्ध्रार्थ एतौ स्तः । निबिडम् । निबिरीसम् ।

७९७. इनच्पिटच् चिकचि च । ५-२-३३ ॥

नेर्नते वाच्ये इनच् पिटच् प्रत्ययौ क्रमात् चिकचि इत्यादेशौ च स्तः । चिकिनम् चिपिटम् ।

कप्रत्ययश्चिग्भावश्च वाच्यः ।

चिक्कः ।

एतत्सूत्रद्वयं वृत्तौ व्याख्यातं नासिकानते ।
मया भोजानुसाराच्च प्रयोगाच्चैवमीरितम् ॥

क्लिन्ने चक्षुषि वाच्ये ल स्याच्चिल्पिल्चुलोऽस्य चादेशाः ।
स्यात्क्लिन्नमक्षि चिल्लं पिल्लं चुल्लं तथैव तद्वांश्च ॥

७९८. उपाधिभ्यां त्यकन्नासन्नारूढयोः । ५-२-३४ ॥

अधऊर्ध्वभागयोः वाच्ययोराभ्यां त्यकन् । उपत्यका अधित्यका च गिरेः । स्त्रियां ङीप् । त्यकनश्च निषेधः इति कात्पूर्वस्येत्त्वाभावः । समुद्रोपत्यका लङ्का इत्यासन्नभूमावेऽप्याह भट्टिः ।

७९९. कर्मणि घटोऽठच् । ५-२-३५ ॥

कर्मणि घटमान इत्यर्थे अठच् स्यात् । कर्मठः ।

८००. तदस्य सञ्जातं तारकादिभ्य इतच् । ५-२-३६ ॥

तारकितं नभः । पुष्पिताः केशाः ।

तारकापुष्पमञ्जरीमुकुलकुड्मलकुसुमकोरकाङ्कुरहस्तकलबकपल्लवकिसलयेभ्य इतच् ।
कण्टकपुलकरोमाञ्चहर्षोत्कर्षगर्वोत्कण्ठाकल्लोलतरङ्गाङ्गारकशृङ्गारान्धकारेभ्यः ।
कन्दलशैवलकुवलयकुतूहलकलङ्ककज्जलकर्दमसीमन्ताभ्रारागवेगवर्षेभ्यः ।

क्षुत्तृड्वुभुक्षापिपासानिद्रातन्द्राज्वरगरव्याधिव्रणसुखदुःखेभ्यः ।

मूलपुरीषद्रोहदोहशाखपण्डासुण्डसुकुरमुद्गार्धफलतिलकचन्द्रकादिभ्यश्च ।

पण्डा ज्ञानम् । गर्धो लोभः । आयुक्तेः मूर्च्छितलज्जितप्रतिबिम्बितभरितादि ।

गर्भादप्राणिनि ।

गर्भितो व्रीहिः । प्राणिनि तु गर्भिणी गौः ।

८०१. प्रमाणे द्वयसज्दघ्नञ्मात्रचः । ५-२-३७ ॥

तदस्य प्रमाणमित्यर्थे एते स्युः ।

ऊर्ध्वतो मान एवाद्यौ द्वौ नाभिद्वयसं जलम् ।
सौघदघ्नस्तुर्मात्रच् सर्वमानेष्वपीष्यते ॥

उरोमात्रं जलं व्रीहिः प्रस्थमात्र इतीदृशम् ।
स्वतः प्रमाणभूतेभ्यो मात्रचो वा लुगिष्यते ॥

व्यरलिमात्रश्चारलिः पटो हस्तादिषूह्यताम् ।
द्विगोर्द्वयसजादीनां नित्यमेव लुगिष्यते ॥

तेन द्विपुरुषं तोयं व्यरलिः पट इत्यपि ।
प्रमाणपरिमाणाभ्यां सङ्ख्यायाश्चापि संशये ॥

मात्रज्वक्तव्य इत्युक्तेर्हस्तमात्रो ध्रुवं पटः ।
प्रस्थमात्रो यवो नूनं दशमाला इमे नराः ॥

वत्वन्ताद्बहुलं स्वार्थे द्वयसञ्मात्रचौ मतौ ।
तावन्मात्रं तथा तावद्द्वयसं तावदेव हि ॥

स्तोमे डो डट् च वा वाच्यः ।

पञ्चदश मन्त्राः प्रमाणमस्येति पञ्चदशः स्तोमः । पञ्चदशा स्तुतिः । डटि पञ्चदशी ।

शन्शदन्ताद्विंशतेश्च डिनिर्वाच्यः ।

पञ्चदशतिथिप्रमिताः पञ्चदशिनः पक्षाः । शदन्तात् त्रिंशिनो मासाः । विंशतिसर्गप्रमितं विंशि माघकाव्यम् । विंशतेस्तिलोपे कृते पुनर्थस्येति लोपः ।

आस्तामित्याडलोपार्थं असो रदिति तग्रहात् ।
आभासिद्धेरनित्यत्वं तेनाभीयावुभाविह ॥

८०२. पुरुषहस्तिभ्यामण् च । ५-२-३८ ॥

आभ्यां प्रमाणेऽण् । पूर्वोक्ताश्च स्युः । पौरुषम् । हास्तिनम् । 'इनणि' (६-४-१६४) इति प्रकृतिभावः । पुरुषद्वयसमित्याद्यपि ।

८०३. यत्तदेतेभ्यः परिमाणे वतुप् । ५-२-३९ ॥

एभ्यस्तदस्य परिमाणमित्यर्थे वतुप् स्यात् । 'दृग्दृशवतुषु' (६-३-८१) इत्यात्वम् । यावान् । तावान् । एतावान् ।

८०४. किमिदंभ्यां वो घः । ५-२-४० ॥

आभ्यां वतुप् । वतुपो वकारमात्रस्य घकारश्च स्यात् । घस्येय् । किम् इयत् । इदम् इयत् । इदंकिमोरीश्की (६-३-९०) की इयत् । ई इयत् । यस्येति लोपः । कियत् । इयत् । पदकार्यम् । कियान् । इयान् ।

८०५. किमः संख्यापरिमाणे डति च । ५-२-४१ ॥

संख्येयतापरिच्छेदे किमो डतिः । पूर्वोक्तश्च स्यात् । डतिर्बहुत्व एवेष्टः । डित्त्वाट्टिलोपः । कति बालाः । कियन्तः । यत्तदभ्यां च डतीति कौमुदी । यति । तति ।

८०६. संख्याया अवयवे तयप् । ५-२-४२ ॥

सोऽस्यावयव इत्यर्थे संख्यायास्तयप् स्यात् । चतुरवयवा चतुष्टयी रज्जुः । गवां चतुष्टयमित्यादौ चतुरवयवः सङ्घोऽर्थः ।

८०७. द्वित्रिभ्यां तयस्यायज्वा । ५-२-४३ ॥

आभ्यां तयपोऽयजादेशो वा स्यात् । द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ।

८०८. उभादुदात्तो नित्यम् । ५-२-४४ ॥

उभशब्दात्संख्यार्थाज्जातस्य तयप आद्युदात्तो नित्यमयच् स्यात् । उभयम् ।

८०९. तदस्मिन्नधिकमिति दशान्ताड्डः । ५-२-४५ ॥

डित्त्वाट्टिलोपः । द्वादशाधिका अस्मिन्निति द्वादशं शतं सहस्रं वा ।

शतसहस्रयोरेवेष्टम् ।

८१०. शदन्तविंशतेश्च । ५-२-४६ ॥

शदन्तेभ्यो विंशतेश्चोक्तार्थे डः । त्रिंशदधिका अस्मिन्निति त्रिंशं शतम् । टिलोपः । विंशं शतम् ।

सङ्ख्यापूर्वाच्चेष्टम् ।

द्वात्रिंशं द्वाविंशं वा शतम् ।

८११. संख्याया गुणस्य निमाने मयट् । ५-२-४७ ॥

गुणो भागः । निमानं मूल्यं क्रेयं वा । एकस्य भागस्य मूल्ये क्रेये वा वर्तमानायाः द्व्यादिसंख्यायाः तदस्येत्यर्थे मयट् स्यात् ।

यद्भागस्य यवानां द्वौ भागौ मूल्यतया स्थितौ ।
तत्स्याद्यवानां द्विमयं तक्रं क्रेये त्वथोच्यते ॥
यद्भागस्य हि तक्रांशौ द्वौ क्रेतव्यतया स्थितौ ।
तक्रस्य द्विमयास्तेऽमी यवा इति विपर्ययः ॥

पूर्वत्रैकप्रस्थस्य तक्रभागस्य द्वौ यवप्रस्थौ मूल्यमित्यर्थः । परत्रैकप्रस्थस्य यवभागस्य द्वौ तक्रप्रस्थौ क्रेतव्यावित्यर्थः ।

८१२. तस्य पूरणे डट् । ५-२-४८ ॥

अत्रार्थे डः । विंशतेः पूरको विंशः । त्रिंशः ।

८१३. नान्तादसंख्यादेर्मट् । ५-२-४९ ॥

असंख्यादेर्नान्तसंख्यायाः परस्य डटो मडागमः स्यात् । पञ्चमः । दशमः । संख्यादेस्तु एकादशः ।

८१४. षट्कतिकतिपयचतुरां थुक् । ५-२-५१ ॥

एषां डटि परे थुगागमः स्यात् । षष् थ् अ । ष्टुत्वम् । षष्ठः । कतिथः । कतिपयथः स्वल्पसंख्यापूरकः । चतुर्थः ।

चतुरश्छयतावाद्यक्षरलोपश्च ।

तुरीयः । तुर्यः ।

८१५. बहुपूगगणसङ्घस्य तिथुक् । ५-२-५२ ॥

एषां डटि परे तिथुक् स्यात् । बहुतिथः । पूगतिथः । गणतिथः । सङ्घतिथः । पूगादेरसंख्यात्वेऽप्यागमोक्त्यैव डट् कल्प्यः ।

८१६. वतोरिथुक् । ५-२-५३ ॥

वत्वन्तस्य डटीथुक् । तावतिथः ।

८१७. द्वेस्तीयः । ५-२-५४ ॥

द्वितीयः ।

८१८. त्रेः संप्रसारणं च । ५-२-५५ ॥

तृतीयः । 'द्वितीयतृतीय' (२-२-३) इति सूत्रोक्तेः 'हलः' (३-४-२) इति संप्रसारणदीर्घौ न ।

८१९. विंशत्यादिभ्यस्तमडन्यतरस्याम् । ५-२-५६ ॥

एभ्यः परस्य डटः तमडागमो वा स्यात् । विंशतितमः । विंशः ।

८२०. नित्यं शतादिमासार्धमाससंवत्सराच्च । ५-२-५७ ॥

शतादिसङ्ख्याभ्यो मासादिभ्यश्च डटो नित्यं तमट् । शततमः । सहस्रतमः । मासतमः । अर्धमासतमः । संवत्सरतमः । तदन्त्यो दिवस इत्यर्थः ।

८२१. षष्ट्यादेश्चासंख्यादेः । ५-२-५८ ॥

असंख्यापूर्वात् षष्ट्यादेः डटो नित्यं तमट् । षष्टितमः । सप्ततितमः । संख्यादेस्तु एकषष्टः । एकषष्टितमः इति विंशत्याद्युक्तो विकल्पः ।

८२२. मतौ छः सूक्तसाम्नोः । ५-२-५९ ॥

तयोर्वाच्ययोर्मत्वर्थे छः । कयाशुभीयं सूक्तम् । यज्ञायज्ञीयं साम । अनयोर्वेदशब्दानुकरणरूपत्वेन ततोऽन्यत्वाच्छूद्रादिभिरश्राव्यत्वं नेति हरः । अनुकरणत्वादेव पदांशोक्तावपि नापशब्दत्वम् । अस्यवामीयं सूक्तम् ।

८२३. अध्यायानुवाकयोर्लुक् । ५-२-६० ॥

अनयोर्वाच्ययोर्मत्वर्थे छः । तस्य लुक्च स्यात् । लुग्वा वाच्यः । तत्राध्यायो लौकिकग्रन्थगतोऽप्युक्त इति हरः । दोषविज्ञानीयो बाहटशास्त्रेऽध्यायः । दोषविज्ञानो वा ।

दोषविज्ञानशब्दे हि साक्षात्तस्मिन्नसत्यपि ।
अर्थात्तद्वर्णनाध्याये तदस्तित्वात्तदाख्यता ॥

अनुवाके तु यूयंपातशब्दवन्तो यूयंपातीया अनुवाकाः । यूयंपाताः ।

८२४. विमुक्तादिभ्योऽण् । ५-२-६१ ॥

विमुक्तशब्दवानध्यायोऽनुवाको वा वैमुक्तः । और्वशो भारतेऽध्यायः ।

८२५. गोषदादिभ्यो वुन् । ५-२-६२ ॥

गोषच्छब्दवानध्यायोऽनुवाको वा गोषदकः । इषेत्वकः ।

८२६. तत्र कुशलः पथः । ५-२-६३ ॥

पथोऽस्मिन्नर्थे वुन् । नान्तत्वाट्टिलोपः । पथकः ।

८२७. आकर्षादिभ्यः कन् । ५-२-६४ ॥

आकर्षे कुशल आकर्षकः । रेफपाठे आकर्षकः ।

आकर्षत्सरुपिशाचपिचण्डनिचयाश्मशनिशकुनिजपत्पङ्गादह्लादपादेभ्यः ।

सरुपभूतौ तद्विषयक्रियायां कुशलत्वमूह्यम् ।

८२८. धनहिरण्यात्कामे । ५-२-६५ ॥

आभ्यां तत्र काम इत्यर्थे कन् । धने कामोऽस्य धनकः । हिरण्यकः ।

८२९. स्वाङ्गेभ्यः प्रसिते । ५-२-६६ ॥

एभ्यस्तत्रासक्ते कन् । केशशिक्षापरः केशकः । दन्तकः । दन्तोष्ठकः ।

८३०. उदराट्ठगाद्यूने । ५-२-६७ ॥

तस्मात्तत्रासक्तेऽर्थे निरुद्योगे वाच्ये ठक् । उदरपूरणेऽत्यन्तासक्त्या निरुद्योग औदरिकः । तथापि सोद्योगश्चेत् उदरकः ।

८३१. सस्येन परिजातः । ५-२-६८ ॥

गुणार्थात्सस्यशब्दात् तेन परिवृतो जात इत्यर्थे कन् । जन्मन्येव सर्वगुणैर्वृतः सस्यकः पुत्रः । सस्यको मणिः । शस्येनेति हरपाठेऽपि प्राग्वदर्थः ।

८३२. अंशं हारी । ५-२-६९ ॥

अंशात्तं हारीत्यर्थे कन् । अवश्यं हर्ता हारी । अंशकोऽयं पुत्रः ।

८३३. तन्त्रादचिरापहृते । ५-२-७० ॥

कन् स्यात् । तन्तुवानार्था शलाका तन्त्रम् । तस्मादचिरापहृतः तन्त्रको नवपटः ।

८३४. ब्राह्मणकोष्णिके संज्ञायाम् । ५-२-७१ ॥

यस्मिन्देशे ब्राह्मणास्तु भवन्त्यायुधजीविनः ।
सोऽयं ब्राह्मणकोऽल्पान्ना यवागूरुष्णिकोच्यते ॥

८३५. शीतोष्णाभ्यां कारिणि । ५-२-७२ ॥

क्रियाविशेषणाभ्यां मान्द्यपाटवपराभ्यामाभ्यां कारिण्यर्थे कन् । शीतं कुर्वन् शीतको मन्दः। उष्णकः पटुः ।

८३६. अधिकम् । ५-२-७३ ॥

कनन्तोऽयम् ।

८३७. अनुकाभिकाभीकः कमिता । ५-२-७४ ॥

एते कामुकार्थाः ।

८३८. पार्श्वेनान्विच्छति । ५-२-७५ ॥

पार्श्वास्थिवत्कुटिल उपायः पार्श्वम् । तेनार्थानन्विच्छन् पार्श्वको मन्त्री ।

८३९. अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । ५-२-७६ ॥

क्रमात् स्तः । तीक्ष्णोपायोऽयःशूलम् । तेनान्विच्छन् आयश्शूलिकः । दण्डाजिनं दम्भः । तेनान्विच्छन् दाण्डाजिनिकः ।

८४०. तावतिथं ग्रहणमिति लुग्वा । ५-२-७७ ॥

पूरणान्तात्तावत्संख्यापूरणे ग्रहणसाधनमित्यर्थे कन् । पूरणप्रत्ययस्य च वा लुक् स्यात् ।

अन्यग्रहण एवेष्टम् ।

पञ्चमं ग्रहणसाधनं पञ्चकम् । पञ्चमकं वा । पाठे पञ्चममावर्तनमित्यर्थः । तावतिथेन गृह्णातीत्यर्थे कन् ।

पूरणस्य च नित्यं लुग्वाच्यः ।

पञ्चमेनावर्तनेन गृह्णन् पञ्चकः । द्विकः ।

८४१. स एषां ग्रामणीः । ५-२-७८ ॥

स एषां नाथ इत्यर्थे कन् । कृष्णका यदवः । मन्नाथं मत्कम् । त्वत्कम् । प्रायेण तु तस्येदमित्यर्थमात्रे प्रयुज्यते इति हरः । मत्का वाक् ।

८४२. शृङ्खलमस्य बन्धनं करभे । ५-२-७९ ॥

उभयतो रज्जुमद्दारुमयं पादबन्धनं शृङ्खलम् । तत् बन्धनसाधनमस्येत्यर्थे वालोष्ट्रे वाच्ये कन् । शृङ्खलकः करभः ।

८४३. उत्क उन्मनाः । ५-२-८० ॥

८४४. कालप्रयोजनाद्रोगे । ५-२-८१ ॥

कालात् प्रयोजनाच्च रोगे वाच्ये कन् । द्वितीयेऽह्नि भवो द्वितीयको ज्वरः । चतुर्थकः । साक्षात्कालार्थान्मासादेर्नेष्टम् । कारणं कार्यञ्च प्रयोजनम् । पित्तेन जातः पित्तको ज्वरः । शीतः कार्यमस्येति शीतको ज्वरः । उष्णकः ।

८४५. तदस्मिन्नन्नं प्राये संज्ञायाम् । ५-२-८२ ॥

तदन्नमस्मिन्नित्यर्थे प्राये बोत्ये नाम्नि कन् । गुडापूपाः प्रायेणान्नमस्यामिति गुडापूपिका पौर्णमासी ।

वटकादिनिर्वाच्यः ।

वटकाख्यापूपाः प्रायेणान्नमस्यामिति वटकिनी तिथिः ।

८४६. कुल्माषादञ् । ५-२-८३ ॥

कुल्माषो माष इति रामः । मुद्ग इति हरः । तत्प्रायान्ना कौल्माषी तिथिः ।

८४७. श्रोत्रियंश्छन्दोऽधीते । ५-२-८४ ॥

छन्दोऽध्येतरि श्रोत्रियन्निति निपात्यते । नित्त्वं स्वरार्थम् । श्रोत्रियः । 'तदधीते' (४-२-५९) इत्यणि छान्दस इत्यपीष्टम् ।

८४८. श्राद्धमनेन भुक्तमिनिठनौ । ५-२-८५ ॥

श्राद्धी । श्राद्धिकः । तद्दिनभुक्तश्राद्धे एवैतौ ।

८४९. पूर्वादिनिः । ५-२-८६ ॥

अस्मादनेनेत्यर्थे इनिः । प्रकरणात् क्रियासम्बन्धः । क्रियाविशेषणं प्रकल्प्य क्रियाविशेषणानां कर्मत्वात् द्वितीयान्तात्पूर्वादिनिः कार्यः । पूर्वं भुक्तं गतं वानेनेति पूर्वी ।

८५०. सपूर्वाच्च । ५-२-८७ ॥

सपूर्वपदाच्च पूर्वादिनिः । भावे कर्मसामान्ये वा क्तं कृत्वा भुक्तं पूर्वमनेनेति विगृह्य सुप्सुपा इति भुक्तपूर्वशब्दस्य समासे कृते इनिः । भुक्तपूर्वी खल्वयम् । अत्र कर्मविशेषस्यानभिहितत्वात्पुनस्तद्विवक्षास्ति चेत् भुक्तपूर्वी सक्तूनित्याद्यपि ।

८५१. इष्टादिभ्यश्च । ५-२-८८ ॥

एभ्योऽनेनेत्यर्थे इनिः स्यात् । इष्टी मखे ।

क्तस्येनुविषयस्य कर्मण्युपसंख्यानम्

इति कर्मणि सप्तमी ।

इष्टी सर्वमखे श्रुती श्रुतिशते तत्त्वे गृहीत्यर्चिती
गोविन्दे पठिती तथानुपठिती शास्त्रेषु सर्वेष्वपि ॥
शत्रौ व्याकुलिती तथा खलजने दूरं निराकृत्यसौ
मित्रेषूपकृती विभाति नृपतिर्दीनेषु संरक्षिती ॥
आम्नाती निगमे ग्रहेषु गणिती धर्मेऽवधारित्यसा-
वाचारे परिरक्षिती निकथिती श्रेयस्सु नित्यं नृणाम् ॥
न्यायेष्वप्यवकल्पिती परिकल्पित्युच्चैः कलाकौशले
वेदे सङ्कलिती विराजति सुधीरासेविती केशवे ॥

अधीती वेद इत्यादि चास्ति ।

८५२. छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि । ५-२-८९ ॥

इत्यत्र परिपन्थी लोकेऽपीष्टः ।

८५३. अनुपद्यन्वेष्टा । ५-२-९० ॥

पदचिह्नं दृष्ट्वान्वेष्टा अनुपदी । तेन हिरण्यान्वेष्टरि न । स्वामी स्वन्वेष्टानुपदी समौ इत्याह ।

८५४. साक्षाद्द्रष्टरि संज्ञायाम् । ५-२-९१ ॥

साक्षाद्दृष्टा साक्षी । अव्ययत्वाद्विलोपः ।

८५५. क्षेत्रियच् परक्षेत्रे चिकित्स्यः । ५-२-९२ ॥

अस्मिन्नर्थे चिदेष निपात्यः ।

अन्यजन्मभवे देहे चिकित्स्यः क्षेत्रियो गदः ।
देहान्तरे सङ्क्रमय्य चिकित्स्यं क्षेत्रियं विषम् ॥
अन्यसस्यस्य केदारे विनाश्यं क्षेत्रियं तृणम् ।
परदारेषु गमनाद्धन्तव्यः क्षेत्रियः खलः ॥

८५६. इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्त-मिति वा । ५-२-९३ ॥

यजन्तमिन्द्रियपदमर्थेष्वेषु निपात्यते ।
इन्द्र आत्मा तस्य चिह्नं चक्षुरादिकमिन्द्रियम् ॥
तेनानुमानैर्दृष्टं वा सृष्टं वा स्वशुभाशुभैः ।
ज्ञानार्थं तेन जुष्टं वा विषयेभ्योऽथवार्पितम् ॥
इन्द्रदुर्जयमित्याद्यप्यूह्यतामितिशब्दतः ।
व्युत्पत्तिर्बहुधास्त्येवं रूढिष्वित्यपि सूच्यते ॥

इति ठञादिभागः ।

८५७. तदस्यास्त्यस्मिन्निति मतुप् । ५-२-९४ ॥

तदस्यास्तीति तदस्मिन्नस्तीति चार्थे मतुप् स्यात् । गावोऽस्य सन्तीति गोमान् कृष्णः । श्रीवत्सोऽस्मिन्नस्तीति श्रीवत्सवान् । रमावान् । 'मादुपधायाश्च' (८-२-९) इत्यवर्णान्तान्मस्य वत्वम् । मान्तात् वत्वम् । शम्वान् । मोपधात् शमीवान् । अवर्णोपधात् यशस्वान् । भास्वान् । अत्र 'स्वादिषु' (१-४-१७) इति पदत्वेन सस्य रुत्वे प्राप्ते

८५८. तसौ मत्वर्थे । १-४-१९ ॥

मत्वर्थे प्रत्यये परे तान्तसान्तौ भसंज्ञाविति भत्वादपदत्वम् । अयवादिभ्य इत्युक्तेः यवमानित्यादि ।

यवोर्मिदलमयो भूमिर्द्राक्षा ग्राक्षा तिमिः कृमिः ।
हरिद्रुरुत्ककुद्मासः कुम्वेत्याद्या यवादयः ॥

दलिमः शङ्कुः । 'झयः' (८-२-१०) इति वत्वम् । दृषद्वान् । विद्युत्वान् । अस्य तान्तत्वेनापदत्वाज्जश्त्वं न । मधुलिण्मान् वृक्षः इत्यत्र ढत्वादेरसिद्धत्वान्न वत्वम् । 'संज्ञायाम्' (८-२-११) इति वत्वम् । हरिवान् इन्द्रः ।

८५९. आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । ८-२-१२ ॥

एषु मतुपो नाज्ञि वत्वं प्रकृत्यादेशश्च निपात्यते । आसनवत्त्वादासन्दीवान्नाम ग्रामः । अस्थिमत्त्वादष्ठीवाञ्जानूरुसन्धिः । चक्रवत्त्वाच्चक्रीवान्नाम नृपः । चक्रं सैन्यम् । कक्ष्यावानिति प्राप्ते कक्षीवान्नामर्षिः । लवणवत्तया रुमण्वान् गिरिः । रन्तिदेवकृतगवालम्भजनितचर्मवत्त्वाच्चर्मण्वती नाम नदी ।

८६०. उदन्वानुदधौ च । ८-२-१३ ॥

चकारात्कस्यचिद्दृषेर्नाज्ञि च ।

८६१. राजन्वान् सौराज्ये । ८-२-१४ ॥

सुराजत्वे वाच्ये राजन्वान् देशः । अन्यत्र राजवान् । विद्वस् मत् । 'तसौ मत्वर्थे' (१-४-१९) इति भत्वे

८६२. वसोः सम्प्रसारणम् । ६-४-१३१ ॥

मस्य वसोः सम्प्रसारणं स्यात् । आदेशसत्वात् षत्वम् । विदुष्मान् ग्रामः । 'मतौ बह्वचः' (६-३-११९) इति नाज्ञि दीर्घादमरावती ।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः ॥

भूमार्थे गुणवान् राजा निन्दार्थे गन्धवाञ्छकः ।

प्रशंसायां रूपवती नित्यत्वे क्षीरवान् द्रुमः ॥

विद्यावानित्यतिशये संसर्गे कुण्डली नरः ।

अस्तित्वे भूर्गन्धवती तत्सत्त्वैव विवक्ष्यते ॥

न कर्मधारयान्मत्वर्थीयो बहुव्रीहेर्लाघवात् ।

फुल्लपङ्कजा नदी । भूमावर्थव्यक्तये तु फुल्लपङ्कजवतीत्यपि स्यात् । अकृच्छ्रीकृणोति कर्मधारयादिन्युक्तेर्लाघवमनादृत्यमेव इति हरः ।

गुणवचनेभ्यो मतुपो लुग्वाच्यः ।

शुक्लो गुणोऽस्यास्तीति शुक्लः पटः ।

८६३. रसादिभ्यश्च । ५-२-९५ ॥

एभ्यो मतुबेव । न त्विनिठनादयः । रसवान् । रूपवान् । स्पर्शवानित्यादि । उर्वशी रूपिणी स्पर्शिको वायुरिति दर्शनात् सूत्रं दूष्यमेवेति भाष्यम् ।

८६४. प्राणिस्थादातो लजन्यतरस्याम् । ५-२-९६ ॥

प्राणिस्थादादन्तालञ्वा । चूडालः । चूडावान् । अप्राणिस्थे तु चूडावान् स्तम्भः ।

प्राण्यङ्गादेवेष्टम् ।

तेन शोभावान् इच्छावान् नर इत्यादौ न । छायालतनुवल्लरी । चूडालं शशिलेखया इत्यादौ छायां लात्यादत्ते इति 'आतोऽनुपसर्गे' (३-२-३) कः । केसरालं इत्यलेरणि इति वामनः । केसराण्यलति भूषणीकरोतीति कर्मण्यण् केसरालं नलिनम् ।

८६५. सिध्मादिभ्यश्च । ५-२-९७ ॥

एभ्यो लच् मतुप् च स्यात् । न त्विनिठनादि ।

सिध्मगडुमणिकर्णपर्णपांसुमांसनाभिपशुप्रज्ञासक्थिहनूदकबीजस्नेहेभ्यः ।

सिध्मोऽस्यास्तीति सिध्मलः । सिध्मवान् । गडुलः । मणिलः । कर्णलः । पर्णलः । पांसुलः । मांसलः । नाभिलः । पशुलः । प्रज्ञालः । सक्थिलः । हनुलः । उदकलः । बीजलः । स्नेहलः ।

शीतश्यामकृष्णपिङ्गपेशपक्ष्मपृथुमृदुमञ्जुपत्रपुष्कनिष्पावचटुकपिकण्डूभ्यः ।

शीतगुणवान् शीतलः । एवं श्यामलः । कृष्णलः । पिङ्गलः । पत्रलः पत्रवान् हरितवर्ण-वान्वा । पुष्कलः । निष्पावः केशो धान्यभेदः । निष्पावलः । कपिर्वर्णभेदः । कपिलः । कण्डूलः । सक्तुल इति च माधवः ।

पार्ष्णिधमन्योर्दीर्घश्च ।

पार्ष्णीलः । धमनीलः ।

क्षुद्रजन्तूपतापेभ्यश्च ।

आनकुलाल्क्षुद्रजन्तवः । तेभ्यो रोगेभ्योऽपि आदन्तेभ्यो लच् । यूकालः । मक्षिकालः । विचर्चिकालः । मूर्च्छालः । अनादन्तेभ्योऽपीति रामाद्याः । पित्तलः । श्लेष्मलः ।

वातदन्तबलगललललाटनासूड् च ।

एभ्यो लच् स्यात् । लच ऊड् च । 'यस्येति च' (६-४-१४८) इत्यलोपः । वातूलः । दन्तूलः । बलूलः । गलूलः । ललाटूलः ।

८६६. वत्सांसाभ्यां कामबले । ५-२-९८ ॥

आभ्यां कामवति बलवति च वाच्ये लच् । वत्सलः प्रेमवान् । अंसलो बलवान् ।

८६७. फेनादिलच्च । ५-२-९९ ॥

फेनिलः । फेनलः । फेनवान् ।

८६८. लोमादिपामादिपिच्छादिभ्यः शनेलचः । ५-२-१०० ॥

लोमशरोमबभ्रुबभ्लुभुरुरुहरिकपिकर्केभ्यश्शः ।

लोमशः । रोमशः । बभ्रुवर्णवान् बभ्रुशः । स एव बभ्लुशः । भुरुशः । रुरुशः । हरिशः । कपिशः । कर्कशः ।

पामवामहेमश्यामश्लेष्मोष्मदद्रुकृमिवलिभ्यो नः ।

पामनः । वामनः । हेमनः । श्यामनः । श्लेष्मणः । ऊष्मणः । दद्रुणः । कृमिणः । वलिनः । दद्रूः उदन्तत्वपक्षे दद्रू इत्यपि माधवः । दद्रुणः । कुष्ठभेदो दद्रूरित्यः ।

शाकीपलालीकद्रूणां ह्रस्वश्च ।

महच्छाकं शाकसमूहो वा शाकी । महत्पलालं तच्चूर्णं वा पलाली । नागमाता गृहगोधा वा कद्रूः । शाकिनम् । पलालिनम् । कद्रुणम् ।

विष्वचोऽकृतसन्धेरुत्तरपदलोपश्च ।

विषु अच् इत्यलाच्छब्दलोपः । विष्वञ्चो जना अस्य सन्तीति विषुणः । विष्वगमनवानपीति हरः ।

अज्ञात्कल्याणे ।

कल्याणाज्ञवत्यज्ञना ।

लक्ष्म्या अच् ।

ईकारस्यात्वम् । लक्ष्मीवान् लक्ष्मणः ।

पिच्छोरःपर्णोदकध्रुवकाध्रुवकाप्रज्ञाभ्य इलच् ।

पिच्छा स्निग्धांशोऽस्यास्तीति पिच्छिलं दधि । उरसा बलं लक्ष्यते । उरसिलः । पर्णिलः । उदकिलः । ध्रुवकिलः । ध्रुवकिलः । ध्रुवकाध्रुवके पात्रभेदौ । प्रज्ञिलः ।

पङ्ककाकमहगुहाभ्यश्च ।

पङ्किलः । काकिलः । आमहवान् प्रहिलः । गुहिलः ।

जटाघटाकलाभ्यः क्षेपे ।

सिध्मादौ पिच्छादौ चैवमेव हरोक्तम् । जटालः । घटालः । कलालः । जटिलः । घटिलः । कलिलः । अक्षेपे तु जटावान् मुनिः । घटावान् नृपः । कलावान् विटः ।

८६९. प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः । ५-२-१०१ ॥

प्राज्ञः । श्राद्धः । आर्चः । वार्तः । स्त्रियां प्राज्ञा । श्राद्धा । सर्वत्र मतुप् चोह्यः ।

८७०. तपःसहस्राभ्यां विनीनी । ५-२-१०२ ॥

तपस्वी । सहस्री ।

८७१. अण् च । ५-२-१०३ ॥

तापसः । साहस्रः ।

ज्योत्स्नादिभ्योऽण् वाच्यः ।

ज्योत्स्नातमिस्राकुण्डलकुतुपविसर्पविषादिकाभ्यः । ज्योत्स्नावान् ज्यौत्स्नः पक्षः । तामिस्रः । कुण्डलवत्त्वार्हः कौण्डलः । तद्योगे तु कुण्डल्येवेति रामः । कुतुपः पात्रभेदः । तद्वान् कौतुपः । वैसर्पः । वैषादिकः । आकृतिगणत्वात् विजननवान् वैजननो मासः । शिलावत्त्वाच्छैलः । सौधः ।

८७२. सिकताशर्कराभ्यां च । ५-२-१०४ ॥

अण् स्यात् । सैकतं वार्करं च पात्रम् । शर्कराशब्दो माधुर्यार्थ इति हरः । शार्करं क्षीरम् ।

८७३. देशे लुबिलचौ च । ५-२-१०५ ॥

आभ्यां देशे वाच्ये लुबिलचावण् मतुप् च स्युः । लुपि प्रकृतिवत् । सिकता अयं देशः । सिकतिलः । सैकतः । सिकतावान् । एवं शर्करेत्यादि ।

८७४. दन्त उन्नत उरच् । ५-२-१०६ ॥

उन्नतादन्तादुरच् स्यात् । दन्तुर उन्नतदन्तः ।

८७५. ऊषसुषिमुष्कमधो रः । ५-२-१०७ ॥

ऊषरो देशः । रन्ध्रे सुषिः । तद्युक्तं वेण्वादि सुषिरम् । रन्ध्रमात्रे च लक्षणया ।

सुषिः शुषिरमित्यादि स्वाम्याद्या प्राङ्मते जगुः ।
प्राग्देशे हि सकारस्य शकारः पठ्यते क्वचित् ॥

मुष्करो वृषः । स्थूले च लक्षणया । माधुर्यार्थान्मधोः मधुरम् । तेन मधुमत् कुसुममित्यल न ।

खमुखकुञ्जेभ्यश्च ।

खं गलरन्ध्रं महदस्येति खरः । मुखेन बाह्यलक्ष्यते । तद्भूमवान् मुखरः । कुञ्जौ कुम्भाधोगर्तौ दंष्ट्रे वा । तद्वान् कुञ्जरः ।

नगपांसुपाण्डुभ्यश्च ।

नगाः प्रासादाः सन्त्यत्रेति नगरम् । पांसुरम् । पाण्डुरम् । पाण्डरशब्दस्त्वव्युत्पन्न इति हरः । बन्धुसिन्धुभ्यां च भोजः । बन्धुरः । सिन्धुरः ।

कच्छा ह्रस्वश्च ।

विचर्चिकावान् कच्छुरः । शिखाया ह्रस्वश्च इति स्वामी शिखरम् ।

८७६. द्युद्रुभ्यां मः । ५-२-१०८ ॥

द्युमः । द्रुमः । द्रुरत्र तरुस्कन्धः ।

८७७. केशाद्वोऽन्यतरस्याम् । ५-२-१०९ ॥

केशवः । विकल्पादिनिठन्मतुपः । केशी । केशिकः । केशवान् ।

वोऽन्येभ्योऽपि वाच्यः ।

मणिवो नामाहिः । हिरण्यवो निधिभेदः । राजो दलपङ्क्तिरस्यास्तीति राजीवम् । सचिः सेवा । सचिवः ।

अर्णसो लोपश्च ।

अर्णवः ।

मेधारथाभ्यामिरन्निरचौ ।

क्रमात् स्तः । मेधिरः । रथिरः । इरन्निरचावित्यपि पाठो दृष्टः ।

८७८. गाण्ड्यजगात्संज्ञायाम् । ५-२-११० ॥

गाण्डि गाण्डः अजग इत्येतेभ्यः संज्ञायां वः । गाण्डिः पर्वास्यास्ति गाण्डिवं धनुः । गाण्डीवः । सन्धिसाम्यात् द्वयोर्ग्रहः । अजगवम् ।

८७९. काण्डाण्डादीरन्नीरचौ । ५-२-१११ ॥

क्रमात् स्तः । काण्डीरः शरवान् दण्डवान्वा । आण्डीरः । आण्डीर इति केचित् । आण्डमण्डमेव ।

८८०. रजःकृष्यासुतिपरिषदो वलच् । ५-२-११२ ॥

रजस्वला ।

८८१. वले । ६-३-११८ ॥

वले परे पूर्वस्याणो दीर्घः स्यात् । कृषीवलः । आसुतीवलो यज्वा शौण्डिकश्च । परिषद्वलो नृपः । एकदेशविकृतत्वात् पर्षद्वलः ।

वलजन्येभ्योऽपि वाच्यः ।

मद्रावलः । भ्रातृवलः । पुत्रावलः । उत्सङ्गावलः । हरस्तु शत्रुवलः उत्सङ्गवल इति च वदन् वले इत्यत्र संज्ञाधिकारादद्दीर्घमाह । तन्मते पुत्रावलादावनाङि 'अन्येषामपि दृश्यते' (६-३-१३७) इति दीर्घः ।

८८२. दन्तशिखात्संज्ञायाम् । ५-२-११३ ॥

दन्तावलः । शिखावलः ।

८८३. ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिन-मलीमसाः । ५-२-११४ ॥

ज्योतिष्मत्त्वात् ज्योत्स्ना । तमिस्रा । तमिस्रा तामसी रात्रिः । स्त्रीत्वमतन्त्रम् । तमिस्रं नभः । तमःसमूहोऽपि तमस्त्वत्वात् तमिस्रम् । शृङ्गवान्शृङ्गिणः । ऊर्जस्वी ऊर्जस्वलश्च बलवान् । गोमिन् पूज्य इति भोजोक्त्या पूज्यो गोमान् गोमी ।

८८४. अत इनिठनौ । ५-२-११५ ॥

अदन्तान्मत्वर्थे एतौ स्तः । दण्डी । दण्डिकः । दण्डवान् । एवं कञ्चुकी । कञ्चुकीय इति क्यर्चीति वामनः । इच्छार्थक्यचि पचाद्यजयम् । न मत्वर्थीयः । तदिच्छया तद्धारित्वं लक्ष्यते ।

एकाक्षरात् कृतो जातेः ससम्याच्च न तौ स्मृतौ ।

एभ्य इनिठनौ न । स्ववान् । कारकवान् । सिंहवान् । तदस्मिन्नित्यर्थेऽपि न । दण्डवती शाला । कूदादेः क्वचिदस्ति । कृतः कार्यी पाकी इत्यादि । जातेस्तण्डुली इत्यादि । द्रव्यादिभ्यश्च न इति भोजः । द्रव्यवान् ।

मत्वर्थीयात्सरूपो मत्वर्थीयो नेष्टः ।

तेन ठनन्तात्पुनर्न ठन् । दण्डिकवान् ।

८८५. व्रीह्यादिभ्यश्च । ५-२-११६ ॥

एभ्य इनिठनौ स्तः । तत्र

व्रीहिशालिशार्षमायाभ्य इनिठनौ ।

व्रीही । व्रीहिकः । शाली । शालिकः । शार्षी । शार्षिकः । मायः । मायिकः । व्रीहिमानित्यादि मतुवपि ।

शिखाशाखाकेकामालामेखलावलाकापनाकाष्टकाचूडावडवावृणवीणाजरागदासंज्ञासूनामनीषादंष्ट्राजटाकर्मचर्मवर्मधन्वजन्मभ्य इनिरेव ।

शिखी । शाखी । केकी । माली । तदन्ताच्चेष्टम् । वनमाली । मेखली । बलाकी । पताकी । अष्टकी । चूडी । वडवी । वृणी । वीणी । जरी । गदी । मंज्ञी । सूनी । मनीषी । दंष्ट्री । जटी । कर्मी । चर्मी । वर्मी । धन्वी । जन्मी । मतुवपि शिखावानित्यादि ।

यवखदानौसभाकुमारीकरणेभ्यष्ठनेव ।

यवखदा यवस्य सारः । तद्वान् यवखदिकः । यविकः खदिक इत्यन्ये । नाविकः । सभिकः । कुमारिकः । करणिकः ।

८८६. तुन्दादिभ्य इलच् च । ५-२-११७ ॥

चकारादिनिठन्मतुपः । तुन्दोदरपिचण्डयवव्रीहिभ्यः । तुन्दिलः । उदरिलः । पिचण्डिलः । त्रयस्तुल्यार्थाः । यविलः । व्रीहीत्यर्थग्रहणमिति वृत्तौ । व्रीहिलः । शालिलः । तुन्दी । तुन्दिकः । तुन्दवानित्यादि ।

स्वाङ्गेभ्यो वृद्धौ ।

वृद्धः पादोऽस्यास्तीति पादिलः । कर्णिलः ।

८८७. एकगोपूर्वाट्ठञ् नित्यम् । ५-२-११८ ॥

एकगोपूर्वादवन्नान्नित्यं ठञ् । न मनुष्यादि । ऐकशतिकः । गौणसिक । गोना गोसमूहः । तद्वान् गौसिकः इत्यदन्तत्वमनाश्रित्य माधवोक्तिश्चिन्त्या ।

८८८. शतसहस्रान्ताच्च निष्कात् । ५-२-११९ ॥

नित्यं ठञ् । नैष्कशतिकः । नैष्कसहस्रिकः ।

८८९. रूपादाहतप्रशंसयोर्यप् । ५-२-१२० ॥

आहतत्वप्रशस्तत्वविशिष्टाद्रूपाद्यप् । आहतरूपवान् रूप्यः पणः । प्रशस्तरूपवान् रूप्यो युवा ।

अन्येभ्योऽपि दृश्यत्वाच्यः ।

हिम्यः । गुण्यः ।

८९०. अस्मायामेधास्रजो विनिः । ५-२-१२१ ॥

असन्ताद्यशस्वी । मायावी । मेधावी । पदत्वात् कुत्वम् । स्रग्वी ।

आमयस्य दीर्घश्च ।

आमयावी । एभ्यो मतुप् च । यशस्वान् मायावानित्यादि ।

शृङ्गवृन्दाभ्यामारकन् वाच्यः ।

शृङ्गारकः तरुः । प्रशस्तं वृन्दं रूपमेषामिति वृन्दारका इति टीकासर्वस्वे ।

फलवर्हाभ्यामिनज्वाच्यः ।

फलिनः । बर्हिणः । फली बर्हीत्यपीष्टम् । रथाच्चेति कौमुदी । रथिनः ।

हृदयाच्चालुर्वा ।

चः स्वरार्थः । हृदयालुः । हृदयी ।

शीतोष्णतृषिभ्यस्तन्न सहत इति चालुर्वाच्यः ।

शीतालुः । उष्णालुः । तृषालुः । तृषं दुःखम् ।

हिमाच्चेलुः ।

चः प्राग्वत् । हिमं न सहते हिमेलुः ।

वस्त्रादूलच् ।

बलं न सहते बल्लूलः ।

वातात्समूहे तत्र सहत इति च । वातूलः । हिमेलुबलूलवातूलांस्तत्र सहत इत्यर्थे आह भोजः ।

पर्वमरुद्भ्यां तप् ।

पर्वत उत्सववान् । शैले त्वौणादिकः । मरुतोऽस्य यज्ञे परिवेष्टृत्वेन मन्त्रीति मरुतो राजा

८९१. ऊर्णाया युस् । ५-२-१२३ ॥

सित्त्वेनाभत्वात् 'यस्य' (६-४-१४८) इति लोपाभावः । ऊर्णायुः ।

८९२. वाचो ग्मिनिः । ५-२-१२४ ॥

कुत्वजश्त्वे । वाग्मी ।

८९३. आलजाटचौ बहुभाषिणि । ५-२-१२५ ॥

वाचालः । वाचाटः ।

कुत्सित इति वाच्यम् ।

सम्यग्भाषी वाग्म्येव ।

८९४. स्वामिन्नैश्वर्ये । ५-२-१२६ ॥

ऐश्वर्यवान् स्वामी ।

८९५. अर्शआदिभ्योऽच् । ५-२-१२७ ॥

अर्शसुरश्वतुरतुन्दपलिताभ्राम्ललवणादिभ्यः । अर्शोऽस्यास्तीति अर्शसः । शोभनोरस्क उरसः । चतुरः । तुन्दवांस्तुन्दः । पलितः । अभ्रयुक्तमभ्रं नभः । अम्लः । लवणः । आद्युक्तेर्बलवान् बलो नरः । पद्मवती पद्मा श्रीः । कमला । घिषणावान् घिषणो गुरुः । पृषत् बिन्दुः । तद्वान् पृषतो मृगः । जलौकस इत्यदन्तो जलूकायेः इति टीकासर्वस्वे । कर्मधारयादच् । उच्चैर्भावोऽस्यास्तीत्युच्चः । नीचः । अव्ययत्वाद्विलोपः ।

स्वाङ्गाद्धीनात् ।

काणश्चक्षुरस्येति काणः । खञ्जः पादोऽस्यास्तीति खञ्जः ।

वर्णाच्च ।

शुक्लः । कृष्णः । पूर्वं लुगुत्तरयैव सिद्धे स्वरभेदार्थमुक्तिः ।

८९६. द्वन्द्वोपतापगार्ह्यात्प्राणिस्थादिनिः । ५-२-१२८ ॥

प्राणिस्थेभ्योऽन्नेभ्यो द्वन्द्वादिभ्य इनिरेव । न ठनादि । द्वन्द्वात् कटकवलयी । प्राण्यङ्गान्नेष्टम् । पाणिपादवान् । उपतापो रोगः । कुष्ठी । गर्ह्यं दुर्लक्षणम् । ककुदावर्तिनी स्त्री ।

८९७. वातातीसाराभ्यां कुक् च । ५-२-१२९ ॥

आभ्यामिनिः कुक् च । रोग एवेष्टम् । वातरोगवान् वातकी । अतीसारकी । एकदेशविकृतत्वात् अतिसारकी ।

पिशाचाच्च वाच्यम् ।

पिशाचकी ।

८९८. वयसि पूरणात् । ५-२-१३० ॥

वयसि वर्तमानात्पूरणान्तादिनिरेव । दशमं वयोऽस्यास्तीति दशमी वृद्धः । पञ्चमो मासः संवत्सरो वास्यास्तीति पञ्चमी ।

८९९. सुखादिभ्यश्च । ५-२-१३१ ॥

इनिरेव । सुखी । दुःखी । प्रणयी । अलीकी ।

मालायाः क्षेपे ।

माली मूढः ।

बलाद्बाहुरूपूर्वात् ।

बाहुबली । ऊरुबली ।

सर्वादिर्धनबीजकेशात् ।

सर्वधनी वणिक् । सर्वबीजी कर्षकः । सर्वकेशी वा । सर्वादेः बलादपीति माधवः । सर्वबली नृपः ।

९००. धर्मशीलवर्णान्ताच्च । ५-२-१३२ ॥

द्विजधर्मोऽस्यास्तीति द्विजधर्मी । द्विजशीली । द्विजवर्णी ।

९०१. हस्ताज्जातौ । ५-२-१३३ ॥

हस्तीति गजजातिसंज्ञा । करदन्ताभ्यां च भोजः । करी । दन्ती ।

९०२. वर्णाद्ब्रह्मचारिणि । ५-२-१३४ ॥

वर्णी ब्रह्मचारी ।

९०३. पुष्करादिभ्यो देशे । ५-२-१३५ ॥

एभ्यो देशे इनिः । पुष्करिणी । पद्मिनी । तरङ्गिणी । तटिनी इत्यादि । अदेशे तु पुष्करवान् हस्ती ।

अर्थाच्चासन्निहिते ।

असन्निहितोऽर्थोऽस्येत्यर्थी याचकः ।

९०४. बलादिभ्यो मतुवन्यतरस्याम् । ५-२-१३६ ॥

एभ्यो मतुविनिश्च । बलवान् । बली । व्रतवान् । व्रती इत्यादि । ठनभावः फलम् ।

९०५. संज्ञायां मन्माभ्याम् । ५-२-१३७ ॥

मन्नन्तान्मशब्दान्ताच्च इनिः । दामिनी । सोमिनी ।

९०६. कंशंभ्यां बभयुस्तितुतयसः । ५-२-१३८ ॥

जलसुखवाचिभ्यां कंशंभ्यामेते भ्युः । शमस्यास्तीति शम्बः । शम्भः । युस्यमोः सित्त्वेन पदत्वात् अव्ययत्वेऽपि टिलोपाभावः । 'मोऽनुस्वारः' (८-३-२३) शंयुः । शंतिः । शंतुः । शंतः । शंयः । एवं कमोऽपि ।

९०७. तुन्दिवलिवटेर्भः । ५-२-१३९ ॥

तुन्दिरुदरम् । तुण्डिस्तूलतनाभिः । एकदेशविकृतत्वात् द्व्यवरि भ इति स्वामी । तुन्दिभः । तुण्डिभः । वलिभः । वटिभः । वटेस्तुण्डिः ।

९०८. अहंशुभमोर्युस् । ५-२-१४० ॥

अहमित्यहङ्कारे मान्तमव्ययम् । शुभमिति शुभार्थे । अहंयुः । शुभंयुः । इति मत्वर्थीयाः ॥

इतः परं प्रायः स्वार्थे प्रत्ययाः ।

९०९. प्राग्दिशो विभक्तिः । ५-३-१ ॥

'दिक्शब्देभ्यः (५-३-२७)' इति सूत्रात्प्राच्याः प्रत्यया विभक्त्याख्याः ।

९१०. किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । ५-३-२ ॥

किंशब्दाद्द्व्यादिवर्जाच्च सर्वनाम्नो बहोरपि ।
प्राग्दिशः प्रत्यया ज्ञेया नापरेभ्यो भवन्त्यमी ॥

९११. पञ्चम्यास्तसिल् । ५-३-७ ॥

पञ्चम्यन्तात्किमादेः स्वार्थे तसिल् स्यात् । पञ्चम्याः प्रातिपदिकान्तर्गतत्वात् 'सुपो धातु' (२-४-७१) इति लुक् । किम् तस् ।

९१२. कु तिहोः । ७-२-१०४ ॥

तादौ हादौ च विभक्तौ परतः किमः कुः स्यात् । कुतस् । अत्र विभक्त्यर्थस्यान्तर्गतत्वात्सामान्यजा सुविभक्तिरेव स्यात् । तेन 'तद्धितश्चासर्वविभक्तिः (१-१-३८)' इत्यव्ययत्वात्सुपो लुक् । कुतः । बहुतः । सर्वनामभ्यः सर्वतः । विश्वतः । तद् तस् ।

९१३. त्यदादीनामः । ७-२-१०२ ॥

त्यदादीनां विभक्तौ परतोऽन्त्यस्यात्वं स्यात् । त अ तस् । पररूपम् । ततः । यतः ।

९१४. इदम इश् । ५-३-३ ॥

९१५. एतदोऽश् । ५-३-५ ॥

प्राग्दिशीये परे एतौ स्तः । इतः । अतः । अदस् तस् । त्यदाद्यत्वपररूपत्वे । अद तस् ।

९१६. अदसोऽसेर्दादु दो मः । ८-२-८० ॥

सकाररहितस्यादसो दकारात्परस्य वर्णमात्रस्य उः स्यात् । दस्य च मः स्यात् । अमुतः

९१७. तसिलादिष्वाकृत्वसुचः । ६-३-३५ ॥

तसिलादिषु कृत्वसुच्पर्यन्तेषु पुल्लिङ्गसाधारणस्य अनूङ्स्त्रीलिङ्गस्य पुंवद्भावः स्यात् । तेन सर्वशब्दस्यापि सर्वतः इत्येव ।

प्राग्दिशीयास्ततः पाशचरट्या इष्टरूपपौ ।
कल्पजातीयदेशीया इत्येव तसिलादयः ॥

९१८. पर्यभिभ्यां च । ५-३-९ ॥

तसिल् स्यात् । परितः सर्वतोऽर्थे । अभितः इत्युभयतः शीघ्रसमीपाभिमुख्यादौ ।

९१९. सप्तम्यास्त्रल् । ५-३-१० ॥

सप्तम्यन्तात्किमादेस्त्रल् स्यात् । प्राग्वत्कुभावादिकमव्ययत्वञ्च । कुत्र । सर्वत्र । विश्वत्र । तत्र । एतस्मिन अत्र । अमुत्र । बहुत्र ।

९२०. इदमो हः । ५-३-११ ॥

सप्तम्यन्तादिदमो हः स्यात् । 'इदम इश्' (५-३-३) इह ।

९२१. किमोऽत् । ५-३-१२ ॥

किम उक्तार्थेऽत् । तः स्वरार्थः ।

९२२. क्वाति । ७-२-१०५ ॥

अति विभक्तौ परतः किमः कः स्यात् । 'यस्य' (६-४-१४८) इति लोपः । क । लत्वषत्वे । कुत्र ।

९२३. इतराभ्योऽपि दृश्यन्ते । ५-३-१४ ॥

इतरविभक्त्यन्तेभ्योऽपि किमादिभ्यः तसिल्त्रलौ हातौ च दृश्यन्ते ।

भवद्दीर्घायुरायुष्मद्देवानांप्रियैर्योग एवेष्टम् ।

स भवानित्यर्थे ततोभवान् । तत्रभवान् । को भवानित्यर्थे कुतोभवान् । कुत्र-

भवान् । कभवान् । अयं भवानित्यर्थे इतोभवान् । अत्तभवान् । इहभवान् । एवं ततोभवन्तं तत्तभवन्तमित्यादि सर्वविभक्तिष्वपि योज्यम् । तथा स दीर्घायुरित्यर्थे ततो-दीर्घायुः तत्रदीर्घायुः । ततआयुष्मान् ततोदेवानांप्रिय इत्यादि । इदयुक्तेः तच्छब्दा-दीनामेव ।

९२४. सर्वैकान्यकिंयत्तदः काले दा । ५-३-१५ ॥

कालवृत्तिभ्यस्सप्तम्यन्तेभ्य एभ्यो वा दा स्यात् ।

९२५. सर्वस्य सोऽन्यतरस्यां दि । ५-३-६ ॥

दाप्रत्यये परे सर्वस्य वा सादेशः स्यात् । सदा । सर्वदा । एकदा । अन्यदा ।

९२६. किमः कः । ७-२-१०३ ॥

किमो विभक्तौ परतः कः स्यात् । कदा । यदा । तदा । वेत्युक्तेः सर्वत्र काले इत्याद्यपि ।

९२७. इदमो र्हिल् । ५-३-१६ ॥

सप्तम्यन्तादिदमः काले र्हिल् स्यात् ।

९२८. एतेतौ रथोः । ५-३-४ ॥

इदमो रेफे थे च परे क्रमात् एत इत् इत्यादेशौ स्तः । एतर्हि ।

९२९. अधुना । ५-३-१७ ॥

इदमः कालेऽधौ निपात्यः ।

९३०. दानीं च । ५-३-९८ ॥

इदमः काले दानीं स्यात् । इदानीम् । मस्य 'हलन्त्यम्' (१-३-३) इति इत्वे प्राप्ते

९३१. न विभक्तौ तुस्माः । १-३-४ ॥

विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः । अस्य निषेधस्यानित्यत्वात् 'किमोऽत्' (५-३-१२) इति तकारस्त्विदेव ।

९३२. तदो दा च । ५-३-१९ ॥

सप्तम्यन्तात्तदः काले दानीं दा च स्यात् । तदानीम् । तदा ।

९३३. अनद्यतने र्हिल्न्यतरस्याम् । ५-३-२१ ॥

सप्तम्यन्तात्किमादेरनद्यतने काले वा र्हिल् स्यात् । किंयत्तदन्येभ्य एव इति भोजः । कर्हि । यर्हि । तर्हि । अन्यर्हि । विकल्पात् कदा तदा इत्याद्यपि । अद्यतने तु कदा तदा इत्याद्येव ।

९३४. सद्यः परुत् परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्यु-रितरेद्युः परेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः । ५-३-२२ ॥

एते सप्तम्यर्थवन्तः कालविशेषे स्युः ।

समानेऽहनि सद्यः स्यात्पूर्वस्मिन् वत्सरे परुत् ।
ततः पूर्वे परारिः स्यादस्मिन् वत्सर ऐषमः ॥
परे ह्यवि परश्वः स्यादद्येत्यस्मिन्नहन्यपि ।
पूर्वेद्युरादयः सर्वे तत्र तत्राहनि स्थिताः ॥
परे ह्यर्वीत्यतीतेऽपि तृतीयेऽह्याह भोजराट् ।
परुत्परारिशब्दौ च भावितत्परवर्षयोः ॥

उभयद्युरिति चेष्टम् ॥

९३५. प्रकारवचने थाल् । ५-३-२३ ॥

प्रकारेऽर्थे किमादेस्थाल् स्यात् । सर्वप्रकारेण सर्वथा । यथा । तथा

एतदस्थाल् नेष्टः ।

९३६. इदमस्थमुः । ५-३-२४ ॥

इदमः प्रकारे थमुः स्यात् । थे परे इशब्दादेशः । इत्थम् ।

९३७. किमश्च । ५-३-२५ ॥

कथम् । इति प्राग्दिशीयाः ॥

९३८. दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः । ५-३-२७ ॥

दिग्देशकालसप्तम्याद्यन्तेभ्यो दिक्छब्देभ्यः स्वार्थेऽस्तादिः स्यात् । इलोपः ।

९३९. अस्ताति च । ५-३-४० ॥

अस्तात्प्रत्यये परे पूर्वाधरयोः पुर् अध् इत्यादेशौ स्तः । पुरस्तात् । अधस्तात् । अव्ययत्वात्सुलुक् ।

९४०. विभाषावरस्य । ५-३-४१ ॥

अवरस्यास्तातौ अव् वा स्यात् । अवस्तात् । अवरस्तात् । एते सप्तम्याद्यर्थेषु योज्याः । पुरस्ताद्वसति । पुरस्तादागतः । पुरस्ताद्रम्यमिति दिशि । तथा देशे कालेऽपि ।

९४१. पूर्वाधरावराणामसि पुरधवश्चैषाम् । ५-३-३९ ॥

पूर्वादिभ्योऽस्तात्यर्थे असिप्रत्ययः पुराद्यादेशाश्च स्युः । पुरः । अधः । अवः । पुरत इति तु निपातः ।

९४२. दक्षिणोत्ताराभ्यामतसुच् । ५-३-२८ ॥

अस्तात्यर्थे । दक्षिणतः । उत्तरतः ।

९४३. विभाषा परावराभ्याम् । ५-३-२९ ॥

आभ्यामतसुच्वा । परतः । अवरतः । परस्तात् । अवरस्तात् ।

९४४. अञ्चेर्लुक् । ५-३-३० ॥

अञ्चत्यन्तेभ्यो दिक्छब्देभ्योऽस्तातेर्लुक् स्यात् । प्राच्यां दिशीत्यादौ प्रागित्येव अत्र तद्धितलुकि स्त्रीप्रत्ययस्यापि लुक् । एवं अवाक् । उदक् । प्रत्यक् ।

९४५. उपर्युपरिष्टात् । ५-३-३१ ॥

उपरि । उपरिष्टात् । ऊर्ध्वस्यास्तात्यर्थे एतौ ।

९४६. पश्चात् । ५-३-३२ ॥

अपरस्यास्तात्यर्थे पश्चभावः आतिश्च निपात्यते । अपरा दिक् पश्चात् ।

दिक्पूर्वस्यापि वाच्यम् ।

दक्षिणपश्चात् । उत्तरपश्चात् ।

दिक्पूर्वस्य केवलस्य चापरस्यार्थे पश्चभावो वाच्यः ॥

दक्षिणपश्चार्धः । पश्चार्धः ।

९४७. उत्तराधरदक्षिणादातिः । ५-३-३४ ॥

एभ्योऽस्तात्यर्थे आतिः स्यात् । उत्तरात्सति इत्यादि ।

९४८. एनबन्यतरस्यामदूरेऽपञ्चम्याः । ५-३-३५ ॥

पञ्चमीवर्जितपूर्वोक्तविभक्त्यन्तेभ्य उत्तरादिभ्योऽस्तात्यर्थेऽदूरत्वे द्योत्ये एनब्वा स्यात् । उत्तरस्यां दिश्यदूरे वसति उत्तरेण वसति । उत्तरेण रम्यम् । एवं अधरेण । दक्षिणेन । विकल्पादुत्तरत इत्यादयि । दिक्छब्दमात्रादेनबिति केचित् । पूर्वेण । पश्चिमेन ।

९४९. दक्षिणादाच् । ५-३-३६ ॥

अस्मादेनब्विषय आच् स्यात् । दक्षिणा वसति ।

९५०. आहि च दूरे । ५-३-३७ ॥

सप्तमीप्रथमान्ताद्दक्षिणात् अस्तात्यर्थे दूरे द्योत्ये आहिराजपि स्यात् । दक्षिणाहि दक्षिणा ।

९५१. उत्तराच्च । ५-३-३८ ॥

अस्मादपि दूरे आजाहौ स्तः । उत्तराहि । उत्तरा । इत्यस्तातिभागः ॥

९५२. संख्याया विधार्थे धा । ५-३-४२ ॥

सङ्ख्याभ्यः क्रियाप्रकारेऽर्थे धा स्यात् । एकधा वदति । द्विधा याति ।

९५३. अधिकरणविचाले च । ५-३-४३ ॥

अधिकरणं द्रव्यम् । विचालः संख्यान्तरावृत्तिः । तस्मिन्नर्थे संख्याभ्यो धा स्यात् । दारु द्विधा करोति । मृत्पिण्डावेकधा करोति ।

९५४. एकाद्धो ध्यमुञन्यतरस्याम् । ५-३-४४ ॥

एकात्परस्य धो वा ध्यमुञादेशः । ऐकध्यं भुङ्क्ते । एकधा ।

९५५. द्वित्र्योश्च धमुञ् । ५-३-४५ ॥

आभ्यां धो वा धमुञ् । द्वैधम् । त्रैधम् । द्विधा । त्रिधा ।

धमुञन्ताड्डो वाच्यः ।

स च तद्वर्तीति भोजः । द्विप्रकारवान् द्वैधो वर्णः । त्रैधः ।

९५६. एधाच्च । ५-३-४६ ॥

द्वित्रिभ्यां ध एधाजपि वा स्यात् । द्वेधा । त्रेधा ।

९५७. याप्ये पाशप् । ५-३-४७ ॥

कुत्सिते स्वार्थे पाशप् स्यात् । भिषक्पाशः । यज्ञस्पाशम् । स्वार्थिकानां प्रकृतिवल्लिङ्ग-वचनमिष्टम् । तच्च क्वचिदतिवर्तते इति रक्षस्पाशान् इत्याह भट्टिः ।

९५८. पूरणाद्भागे तीयादन् । ५-३-४८ ॥

तीयान्तात्पूरणशब्दात् भागे वाच्ये अन् स्यात् । स्वरभेदायान्विधिः । द्वितीयो भागः । तृतीयः ।

९५९. प्रागेकादशभ्योऽच्छन्दसि । ५-३-४९ ॥

एकादशभ्यः प्राच्यात् पूरणात् भागेऽर्थे लोके एव अन् । पञ्चमः सप्तमो भागः ।

९६०. षष्ठाष्टमाभ्यां ञ च । ५-३-५० ॥

आभ्यामच्छन्दसि भागेऽन् ञ च स्यात् । षष्ठः । षाष्ठः । अष्टमः । आष्टमः ।

९६१. एकादाकिनिच्चासहाये । ५-३-५२ ॥

असहायार्थादेकादाकिनिच् । चात् कन् । कनश्च वा लुक् स्यात् । एकाकी । एककः । एकः ।

९६२. भूतपूर्वे चरट् । ५-३-५३ ॥

प्राक् सुन्दरः सुन्दरचरः । ङित्त्वात्सुन्दरचरी । 'नमिलादिषु' ३-३-३५ इति सुन्दर्याः पुंवत्त्वम् ।

९६३. षष्ठ्या रूप्य च । ५-३-५४ ॥

षष्ठ्यन्तात् भूतपूर्वे रूप्यः चरट् च स्यात् । कुबेरस्य पूर्वं भूता कुबेररूप्या लङ्का । कुबेरचरी ।

९६४. अतिशायने तमबिष्ठनौ । ५-३-५५ ॥

अतिशये द्योत्ये एतौ स्तः । अयमेषां लघुतमः । 'टेः' ६-४-१५५ इति टिलोपः । लघिष्ठः । एवमन्तिकतमः ॥

अन्तिकस्य तमे तादेर्लोपः कादेश्च वा भवेत् ।
इति भोजोक्तितो लोकेऽप्यन्तमोऽन्तितमः स्थितौ ॥

९६५. तिङश्च । ५-३-५६ ॥

तिङन्तादतिशये तमप् स्यात् ।

९६६. किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । ५-४-११ ॥

तिङादेः परो यो घस्तदन्तादद्रव्यप्रकर्षे आमुप्रत्ययः स्यात् । आमः स्वरादिपाठाद्रव्यत्वम् । पचतितमाम् ।

९६७. द्विवचनविभज्योपपदे तरबीयसुनौ । ५-३-५७ ॥

द्व्यर्थवचने विभक्तव्ये चोपपदे सुतिङन्तादेतौ स्तः । अयमनयोर्लघुतरः लघीयान् । विभज्ये प्राच्येभ्यः प्रतीच्याः पटुतराः पटीयांसः । अत्र प्राच्यान्विभज्य तेभ्यः प्रतीच्यानामतिशय उच्यते । बौद्धप्रतियोग्यपेक्षायामप्यतिशायनिका इति वामनोक्तेरुपपदाप्रयोगेऽपि पटुतरोऽयमित्यादि स्यात् ।

९६८. अजादी गुणवचनादेव । ५-३-५८ ॥

इष्ठनीयसुनौ गुणवचनाल्लघुमृद्वादेरेव स्तः । तेन पाचकतरः पाचकतमः इत्यत्र न । 'ह्रस्वादौ' (८-३-१०१) इति षत्वम् । सर्पिष्टमम् । सर्पिष्टरम् ।

तिङन्तस्य षत्वं नेति वाच्यम् ।

भिद्युस्तमाम् ।

पुंसश्च न ।

पुंस्तमः ।

किमेतदित्यादीनामुः ।

किन्तमां नृप आह किन्तराम् । जिज्ञासितबहुविशेषतया प्रष्टव्यस्य प्रकर्षादेवं प्रश्नः । एतत्प्राह्णेतमाम् । 'घकाल' (६-३-१७) इति विकल्पादलुक्येदन्तत्वम् । लुकि तु प्राह्णतमे गतः । अव्ययात् उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तरस्तरुः । प्राह्णेतमामित्यत्र तु प्राह्णेशब्दस्य विभक्त्यर्थप्रधानत्वेनासत्त्वार्थत्वान्न द्रव्यप्रकर्षः । 'तसिलादिषु' (६-३-३५) इति पुंवत्वात्प्रियतमा । प्रियतरा ।

९६९. धरूपकल्पचेलड्ब्रुवगोलमतहतेषु ङ्योऽनेकाचो ह्रस्वः । ६-३-४३ ॥

धादिषु परेषु पुल्लिङ्गसाधारणस्य ङ्यन्तस्यानेकाचो ह्रस्वः स्यात् । ह्रस्वोक्तेर्न पुंवत् । सुन्दरितरा । सुन्दरितमा । तरुणिरूपा । तरुणिकल्पा । चेलडादयः कुत्सिते ब्राह्मणिचेली । ब्राह्मणिद्रुवा । ब्राह्मणिगोला । ब्राह्मणिमता । ब्राह्मणिहता । पुल्लिङ्गसाधारणस्येत्युक्तेः पृथिवीतरेत्यत्र न ।

९७०. नद्याः शेषस्यान्यतरस्याम् । ६-३-४४ ॥

ङ्यन्तवर्जितस्य नदीसंज्ञस्य ङ्यन्तेष्वेकाचश्च धादौ ह्रस्वो वा स्यात् । वामोरुतरा । वामोरूतरा । स्त्रितरा । स्तीतरा ।

कृञ्चेति नेति वाच्यम् ।

कर्त्रीतरा । उणादिकृदन्तः ।

९७१. उगितश्च । ६-३-४५ ॥

उगितो नदीसंज्ञात् वादौ ङ्यो वा स्यात् । उगितः शत्रादयः । लसन्तितरा । लसन्तीतरा । इयसुन् श्रेयसितरा । श्रेयसीतरा । विनुण् । सम्यक्किणितरा । सम्यक्किणीतरा ।

उगितः पुंवत्त्वं वा वाच्यम् ।

लसत्तरा । श्रेयस्तरा ।

९७२. तुरछन्दसि । ५-३-५९ ॥

तृच्तृन्नन्तादतिशयेऽर्थे छन्दसीष्ठेयसुनौ स्तः । लोकेऽपीति कौमुद्यादौ ।

९७३. तुरिष्ठेमेयस्सु । ६-४-१५४ ॥

एषु परेषु तृशब्दस्य लोपः स्यात् । कर्तृतमः कर्तिष्ठः । दोहीयसः धेनुः । दोग्ध्रीत्यत्र भस्यादे पुंवत्वात् ङीपि गते तृलोपात् घत्वादिनिवृत्तिः ।

९७४. प्रशस्यस्य श्रः । ५-३-६० ॥

अस्याजादयोः परयोः श्रादेशः स्यात् । अस्य 'प्रकृत्यैकाच्' (६-४-१६३) इति टिलोपाभावः । श्रेष्ठः । श्रेयान् ।

९७५. ज्य च । ५-३-६१ ॥

इष्ठेयसोः प्रशस्यस्य ज्य च स्यात् । ज्येष्ठः ।

९७६. ज्यादादीयसः । ६-४-१६० ॥

ज्यात्परस्येयस आदेरात्स्यात् । दीर्घः । ज्यायान् ।

९७७. वृद्धस्य च । ५-३-६२ ॥

इष्ठेयसोः वृद्धस्यापि ज्य स्यात् । वृद्धतमो ज्येष्ठः । ज्यायान् ।

९७८. अन्तिकबाढयोर्नेदसाधौ । ५-३-६३ ॥

अन्तिकतमो नेदिष्ठः । नेदीयान् । बाढतमः साधिष्ठः । साधीयान् ।

९७९. युवाल्पयोः कनन्यतरस्याम् । ५-३-६४ ॥

युवतमोऽल्पतमश्च कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठः ।

९८०. विन्मतोर्लुक् । ५-३-६५ ॥

इष्ठेयसोः परयोर्विनो मतुपश्च लुक् स्यात् । स्रग्वितमः स्रजिष्ठः । भास्वत्तमो भासिष्ठः । 'स्थूलदूर' (६-४-१६६) इति यणादिलोपः । पूर्वस्येको गुणश्च । स्थविष्ठः । दविष्ठः । यविष्ठ । ह्रसिष्ठः । क्षोदिष्ठः । एवं स्थवीयानित्यादि । 'प्रियस्थिर' (६-४-१५७) इति प्रियादीनां प्राद्यादेशाः । प्रेष्ठः । स्थिरं महत् । स्थेष्ठ । वरिष्ठः । बंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृन्दारकश्रेष्ठः वृन्दिष्ठः । ईयसुनि प्रेयानित्यादि । 'बहोर्लोपः' (६-४-१५८) इतीयस आदिलोपो बहोर्भू च । भूयान् ।

९८१. इष्ठस्य यिट् च । ६-४-१५९ ॥

बहोः परस्येष्ठस्य यिडागमो बहोर्भू च स्यात् । यिट इदुत्त्यर्थः । भूयिष्ठः । 'र ऋतो हलादेः' (६-३-१६२) इति द्रढिष्ठः । प्रदिष्ठः ॥

घौ पुनरिष्ठेयसुनोरिष्टौ श्रेयस्तरो यविष्ठतरः ।
स्वार्थेऽपि च घौ वाच्यावल्पाच्तरमप्यभिन्नतरम् ॥

९८२. प्रशंसायां रूपप् । ५-३-६६ ॥

प्रशस्तो भिषक् भिषग्रूपः ।

स्वार्थस्यैव भिषक्त्वादेः कुत्सादौ प्रत्यया मताः ।
भिषक्त्वाशो भिषग्रूपो नान्यैर्दोषगुणैर्भवेत् ॥
नामजात्योः पुनः स्वार्थे स्तुतिनिन्दाद्यसम्भवात् ।
तद्धर्मैः स्याद्देवदत्तपाशस्सिंहतमस्तथा ॥

अप्रशस्तेऽपि स्वार्थपूर्णत्वे रूपप् स्यात् । दस्युरूपः । अतिशायने प्रतियोग्यपेक्षास्ति । रूपपि नेति भेदः । तिङोऽनुवृत्तेः पचतिरूपम् । पचन्तिरूपम् । तिङन्ते क्रियाप्रधानत्वात् कृदेकत्वमेव ।

९८३. ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । ५-३-६७ ॥

सुतिङन्तेभ्य ईषदपूर्णतायामर्थे स्युः । ईषदूनो विद्वान् विद्वत्कल्पः । यत्कल्पम् । विद्वद्देश्यः । विद्वद्देशीयः । एवं पचतिकल्पमित्यादि । पञ्चकल्पं सुखमित्यादौ पञ्चगुणयोगात् पञ्चत्वजात्यभावाच्चेषदसमाप्तेरर्थात्सादृश्यम् । माधुर्यादिन्यूनतया च गुडकल्पो गुड इत्यादावपि स्यादिति हरः ।

९८४. विभाषा सुपो बहुच् पुरस्तात्तु । ५-३-६८ ॥

उक्तार्थे सुबन्तस्य पुरस्तात् बहुच्प्रत्ययो वा स्यात् । किञ्चिदूनं पटु बहुपटु । अन्नार्थबत्त्वेन प्रातिपदिकत्वात्पूर्वसुब्लुकि सुबन्तमेतत्तत्रापि स्वलिङ्गवचनत्वमेवेष्टम् । बहुतृणं नरः ।

९८५. प्रकारवचने जातीयर् । ५-३-६९ ॥

प्रकारो भेदः सादृश्यं च । तद्वति वाच्ये जातीयर् स्यात् । वक्रत्वविशेषवान् वक्रजातीयो दण्डः । चन्द्रजातीयं मुखम् । थाल् प्रकार एव । अयं तु तद्वति । तेन थालन्नादपि स्यात् । तथाजातीयः ।

९८६. आन्महतः समानाधिकरणजातीययोः । ६-३-४६ ॥

समानाधिकरणे उत्तरपदे जातीये च परे महतोऽन्त्यस्याद्यं स्यात् । महाजातीयः ।

९८७. प्रागिवात्कः । ५-३-७० ॥

'इवे प्रतिकृतौ' (५-३-९६) इत्यतः प्राक् कविधिः ।

९८८. अज्ञाते । ५-३-७२ ॥

सम्बन्ध्यादिविशेषेणाज्ञातेऽर्थे कः स्यात् । कस्यायमित्यज्ञातोऽध्वोऽध्वकः ।

९८९. अव्ययसर्वनाम्नामकच् प्राक् टेः । ५-३-७१ ॥

अस्मिन् प्रकरणेऽव्ययानां सर्वनाम्नां तिङध्य टेः प्रागकच् स्यात् । उच्चकैः । नीचकैः सर्वनाम्नांतु

साद्यादिभकारादिसुप्सु स्यात् प्रकृतेरकच् ।

अन्यत्र तु सुबन्तस्येत्याहुर्भोजहरादयः ॥

सर्वकस्मै । सर्वकेषाम् । युष्मकासु । सर्वकयोः । सर्वकेभ्यः । युष्मकाभिः । सुबन्तस्य सर्वके । त्वयका । मवतका । बहुव्रीहौ सर्वनामत्वनिषेधात् के एव कृते त्वत्कपितृकः इति भाष्ये । तत्रापि त्वकपितृक इत्यकजेवेत्यन्ये । तिङस्तु पचतकि । पचतके ।

अकञ्विषये तूष्णीमः काम्बाच्यः ।

प्रत्ययत्वेऽपि मित्त्वादन्त्यादचः परत्वम् । तूष्णीकाम् ।

शीले को मलोपश्च ।

तूष्णींशीलः तूष्णीकः ।

९९०. कस्य च दः । ५-३-७२ ॥

अकचि सति कान्ताव्ययस्य दकारोऽन्तादेशः स्यात् । पृथकत् । धकित् ।

९९१. कुत्सिते । ५-३-७४ ॥

काकचौ स्तः । विप्रकः । जल्पतकि । तूष्णीकमास्ते ।

९९२. संज्ञायां कन् । ५-३-७५ ॥

संज्ञायां कुत्सिते कन् स्याच्छूद्रकश्चूर्णकादयः ।
तिसृभावस्त्रिशब्दस्य स्यात्संज्ञायां कनि स्त्रियाम् ॥
तिसृकानामको ग्रामो रूढेरर्थोऽत्र मृग्यताम् ।

९९३. अनुकम्पायाम् । ५-३-७६ ॥

इहानुकम्पितः पुत्रः पुत्रको मन्दमेतकि ।

९९४. नीतौ च तद्युक्तात् । ५-३-७७ ॥

सामाद्युपाये शिक्षा नीतिरिति नाथः । तस्यां द्योत्यायां अनुकम्पायुक्तात् काकचौ स्तः । हन्त ते गुडकाः । एहकि । पूर्वत्र दयाविषयात्पुत्रादेरेव प्रत्ययः । इह तु तत्सम्बन्धात् गुडादेरपीति भेदः ।

९९५. बह्वचो मनुष्यनाम्नष्ठञ्वा । ७-३-७८ ॥

अनुकम्पामात्रे तद्युक्तनीतौ वार्थे बह्वचो नृनाम्नष्ठञ्वा स्यात् ।

९९६. ठाजादावूर्ध्वं द्वितीयादचः । ५-३-८३ ॥

उक्तार्थे ठेऽञादौ प्रत्यये च परे द्वितीयादच ऊर्ध्वमशब्दस्य भागस्य लोपः स्यात् । अनुकम्पितः शिक्ष्यमाणो वा देवदत्तो दैविकः वासिष्ठो वार्षिकः । मातृदत्तो मातृकः । उगन्तादुभयम् ।

एचस्त्विह द्वितीयाच्चेत् द्वितीयाजपि लुप्यते ।
कुबेरदत्तोऽनुकम्प्यः शिक्ष्यो वा कौबिको भवेत् ॥

ठचो विकल्पात्के देवदत्तकः ।

के च वा लोपो वाच्यः ।

देवकः ।

ठाजादौ के च पूर्वपदस्यापि वा लोपो वाच्यः ।

दत्तिकः । देवदत्तिकः ।

विनापि प्रत्ययेन पूर्वोत्तरपदयोर्लोपो वाच्यः ।

सत्या भामा । सत्यभामा ।

९९७. शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् । ५-३-८४ ॥

एतत्पूर्वकाणां शब्दानां ठाजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात् । अनुकम्पितः शेवलदत्तः शैवलिकः । तथा सुपरिदत्तः सौपरिकः । विशालदत्तो वैशालिकः । वरुणदत्तो वारुणिकः । अर्यमदत्तोऽर्यमिकः ।

एप्वकृतसन्धेर्लोपो वाच्यः ।

शेवलेन्द्रदत्तादौ शेवला इक इत्येकारस्थितिर्मा भूत् ।

क्वचिच्चतुर्थादच ऊर्ध्वं लोपो वाच्यः ।

बृहस्पतिदत्तो बार्हस्पतिकः ।

एकाच्पूर्वपदानान्तु तदूर्ध्वं लुप्यते क्वचित् ।
अनुकम्प्यो हि वागीशदत्तो वाचिक उच्यते

९९८. घनिलचौ च । ५-३-७९ ॥

बह्वचो नृनाम्नोऽनुकम्पानीत्योर्गतौ च स्तः । अजादित्वादुक्तलोपः । देवियः । देविलः । वासियः । वासिलः । उगन्ताद्घनिलचोरादिलोपः स्यात् इति भोजः । भानुवत्तो भानुयः । भानुलः । मातृयः । मातृलः ।

९९९. प्राचामुपादेरडज्वुचौ च । ५-३-८० ॥

उपादेर्बह्वचो नृनाम्न उक्तेऽर्थे डज्वुचौ च पूर्वोक्ताश्च वा स्युः । अनुकम्पित उपेन्द्रदत्त उपडः । उपकः । उपियः । उपिलः । उपिकः । उपेन्द्रदत्तकः । प्राचामिति पूजार्थम् ।

१०००. जातिनाम्नः कन् । ५-३-८१ ॥

मनुष्ये कृतेभ्यः सिंहादिनामभ्यः उक्तेऽर्थे कन् स्यात् । सिंहकः । शरभकः । ठज्घनिलच-श्चेष्टाः । सिंहिकः । शरिकः इत्यादि ।

१००१. अजिनान्तस्योत्तरपदलोपश्च । ५-३-८२ ॥

अजिनान्तस्य नृनाम्नः उक्तेऽर्थे कन्नुत्तरपदलोपश्च स्यात् । अनुकम्पितो व्याघ्राजिनो व्याघ्रकः ।

१००२. अल्पे । ५-३-८५ ॥

अल्पार्थे काकचौ स्तः । घृतकम् । वदतकि ।

१००३. ह्रस्वे । ५-३-८६ ॥

ह्रस्वो वृक्षो वृक्षकः ।

१००४. संज्ञायां कन् । ५-३-८७ ॥

ह्रस्वेऽर्थे नाम्नि कन् । वंशकः । वेणुकः ।

१००५. कुटीशमीशुण्डाभ्यो रः । ५-३-८८ ॥

ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः । स्वार्थेऽपि क्वचित्स्वलिङ्गाभाव उक्तः ।

१००६. कुत्वा डुपच् । ५-३-८९ ॥

चार्मणं स्नेहपात्रं कुतूः । सा ह्रस्वा कुतुपः ।

१००७. कासूगोणीभ्यां ष्टरच् । ५-३-९० ॥

आभ्यां ह्रस्वे ष्टरच् । स्त्रीत्वेन षित्त्वात् ङीष् । कासूतरी । गोर्णातरी । कासूः शक्तिः ।

१००८. वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । ५-३-९१ ॥

एभ्यस्तनुत्वे द्योत्ये ष्टरच् । बालो गौर्वत्सः । तस्य यौवनारम्भे बाल्यस्य तनुत्वात् वत्सतरः । तरुणो गौरुक्षा । सोऽपि तदुर्ध्ववयः प्राप्तौ तारुण्यस्य तनुत्वात् उक्षतरः । गर्दभेनाश्वायामुत्पादितोऽश्वोऽश्वतरः । अत्राश्वत्वस्य तनुत्वं शक्तेस्तनुत्वात् । ऋषभतरो दुर्बलोऽनड्वान् ।

१००९. किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् । ५-३-९२ ॥

द्वयोरेकस्य पृथक्करणे सति किंयत्तद्भ्यः स्वार्थे डतरच् स्यात् । अनयोः कतरो वैष्णवः । यतरः तेजस्वी । ततरः । कः यः सः इत्येवार्थाः । अन्याच्च भोजः । अन्यतरः । अस्याल्पाच्तरवत् स्वार्थे तरबिति स्वामी ।

१०१०. वा बहूनां जातिपरिप्रश्ने डतमच् । ५-३-९३ ॥

बहूनामेकस्य निर्धारणे तु यथार्हं जातिलक्षार्थेभ्यः किंयत्तद्भ्यो वा डतमच् स्यात् । एषां कतमो विप्रः । यतमः । ततमः । भोजोक्तेरन्यतमोऽपि । वेति व्यर्थमिति हराद्याः । अकजर्थमिति नाथाद्याः । ककः । यकः । सकः ।

किमोऽस्मिन्नर्थे डतरजपीष्टः ।

कतर एषां विप्रः ।

अजातेः प्रश्नेऽपीष्टम् ।

कतम एषां हरिः ।

१०११. एकाच्च प्राचाम् । ५-३-९४ ॥

एकशब्दादुक्तविषये वा डतरडतमौ स्तः । एतयोरेकतरः कृष्णः । एषामेकतमो रामः । अत्र जातिपरत्वनियमो न । विकल्पात् एककः । एकः ।

१०१२. अवक्षेपणे कन् । ५-३-९५ ॥

क्षेपसाधनात्कन् । व्याकरणकेन त्वं गर्वितः । तत्र व्याकरणस्य सम्यक्कृत्वेऽपि गर्वितस्य तन्निन्दासाधनं भवति । इति कभागः ॥

१०१३. इवे प्रतिकृतौ । ५-३-९६ ॥

इवार्थे प्रतिमायां वाच्यायां कन् स्यात् । अश्वसदृशी प्रतिमा अश्वकः । प्रतिकृतित्वादेव सादृश्यसिद्धेरिवोक्तिरुत्तरार्था ।

१०१४. संज्ञायां च । ५-३-९७ ॥

इवार्थे नाम्नि कन् । गर्दभकः ।

१०१५. लुम्मनुष्ये । ५-३-९८ ॥

संज्ञोक्तस्य कनो मनुष्ये वाच्ये लुप् । लुपि प्रकृतिवल्लिङ्गवचने । चञ्चा तृणपुरुषः । तत्सदृशमनुष्यनाम्नि चञ्चा ।

मनुष्यलुपि विशेषणानां युक्तवद्भावो नेति वाच्यम् ।

रम्यश्वश्चा ।

१०१६. जीविकार्थे चापण्ये । ५-३-९९ ॥

जीविकार्थायां प्रतिमायां वाच्यायां लुप् स्यात् । स्कन्दः । विष्णुः । याचद्भिः प्रतिगृहं प्रदर्श्यमाना देवप्रतिमा इमाः । पण्ये तु न लुप् । हस्तिकान् विष्णुकान् विक्रीणीते ।

१०१७. देवपथादिभ्यश्च । ५-३-१०० ॥

एभ्यः प्रतिकृतिकनो नाम्नि लुप् । देवानां मार्ग इव भातीति देवपथ आकाशगङ्गाख्या रेखा । आकृतिगणोऽयम् ।

अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।
लुप् स्याद्देवपथादित्वादिवे प्रतिकृतौ कनः ॥

देवालये गृहे वा पूजनार्थास्वर्चासु शिवः । विष्णुः । चित्रकर्मणि रामः । रावणः । ध्वजे वृषः । गरुडः । अभेदोपचारादपि सर्वसिद्धिः ।

१०१८. वस्तेर्ढञ् । ५-३-१०१ ॥

अस्मादिवार्थमाले ढञ् । वस्तितुल्यं वास्तेयं फलम् ।

१०१९. शिलाया ढः । ५-३-१०२ ॥

ढव्यपीष्टः । अम्य ढढञौ । शिलातुल्यं शिलेयं शैलेयं वा दधि ।

१०२०. शाखादिभ्यो यः । ५-३-१०३ ॥

शाखामुखजघनमेघचरणस्कन्धोरश्शिरश्शृङ्गाग्रशरणेभ्यः । शाखातुल्यः शाख्यः । मुख्यः । जघन्यः । मेघ्यो हरिः । चरण्यः । स्कन्ध्यः । उरस्यः । शिरस्यः । शृङ्ग्यः । अग्र्यः । गृहवदाश्रयः शरण्यः । शरणे समाश्रयणे साधुरिति यदिति शङ्करः । सोमवन् प्रियदर्शने सोम्यमिति च स्वामी ।

१०२१. द्रव्यं च भव्ये । ५-३-१०४ ॥

समर्थे वाच्ये द्रव्यमिति निपात्यते । द्रव्यमयं राजपुत्रः । पुष्पफलवान् द्रुरिवेष्टसाधनश्रम उक्तः । पुरुषार्थसाधकत्वात् धनमपि द्रव्यमिति नाथः ।

१०२२. कुशाग्राच्छः । ५-३-१०५ ॥

इवार्थे । कुशाग्रीया बुद्धिः । कुशाग्रार्द्धजरतीघुणाक्षरादिभ्यश्छः इति भोजः । अर्धवृद्धा हि नारी कामिनामर्धेष्टार्थानिष्टा च भवतीति तादृशं कार्यमर्धजरतीयम् । अबुद्धिपूर्वं सिद्धं घुणाक्षरीयम् ।

१०२३. समासाच्च तद्विषयात् । ५-३-१०६ ॥

तत्तद्धितार्थविषयात्काकतालादिसमासादिवार्थे छः स्यात् । समासोऽप्यनेनैव कल्प्यः ।

यदृच्छासदृश्य काकस्य पतत्तालस्य चान्वयः ।

प्रकृत्यर्थोऽत्र तत्तुल्यं काकतालीयमुच्यते ॥

एवमजायाः पतत्कृपाणस्य च योगेन सदृशं अजाकृपाणीयम् । अन्धहस्ते वर्तिकापातेन सदृशमन्धवर्तिकीयम् । दैवोपनतमेभिरुच्यते ।

एवं प्रयोगानुगुणं दण्डनाथोक्तमीरितम् ।

एष्विवार्थद्वयं वृत्ताविष्टं क्लिष्टतरं तु तत् ॥

१०२४. शर्करादिभ्योऽण् । ५-३-१०७ ॥

शर्कराकपालिकाकवाटिकासिकतानकुलनाराचोशतपत्रपुण्डरीकेभ्यः । शर्करातुल्यं शार्करं वचः । कापालिकम् । कावाटिकम् । सैकतम् । नाकुलम् । नाराचम् । शातपत्रम् । पौण्डरीकम् ।

गोर्लोमपुच्छाभ्याम् ।

गोलोमसदृशं गौलोमनम् । अण्यनः प्रकृतिभावः । गौपुच्छम् ।

अन् सपत्न्याः ।

सपत्नीसदृशत्वात् सपत्नः शत्रुः ।

१०२५. अङ्गुल्यादिभ्यष्ठक् । ५-३-१०८ ॥

अङ्गुलीतुल्यः आङ्गुलिकः । मण्डलवत्स्थितं माण्डलिकम् । एवं मुनिहरिकपिखलोदश्विद्रुशष्कुलीकुलिशगोण्यादेः ।

१०२६. एकशालायाष्ठजन्यतरस्याम् । ५-३-१०९ ॥

अन्यतरस्यामिति समुच्चये । तेन ठक् च स्यात् । एकशालिकः । ऐकशालिकः ।

१०२७. कर्कलोहितादीकक् । ५-३-११० ॥

कर्कः श्वेतोऽश्वः । तत्सदृशः कार्कीकः । लोहितवद्भासमानो लौहितीकः स्फटिकः । इति इवार्थभागः ॥

१०२८. पूगाञ्ञ्योऽग्रामणीपूर्वात् । ५-३-११२ ॥

पूगाः स्युर्बहुजातीया अर्थकामपरायणाः ।
तद्वाचकेभ्यः स्वार्थे ञ्यो न तु तन्नाथपूर्वकात् ।

शैव्यः शैव्यौ शिवयः । अत्र 'ञ्यादयस्तद्राजाः' (५-३-११९) इति तद्राजस्यात् बहुषु लुक् । एवं लौहघ्नव्यः लौहघ्नव्यौ लौहघ्नजाः । देवदत्तग्रामणीका देवदत्तकाः । पूग इत्यत्र ग्रामणीभूतदेवदत्तपूर्वकत्वाञ्ञ्यो न ।

१०२९. व्रातच्फञोरस्त्रियाम् । ५-३-११३ ॥

अत्र च्फञो ञ्यः पूर्वमुक्तः । व्रातात्तु व्रैहिमित्यः । व्रैहिमित्यौ । व्रैहिमित्याः । स्त्रियां तु ञ्यो न । व्रीहिमिता ।

१०३०. आयुधजीविसंघाञ्ञ्यङ्ञाहोकञ्वाह्मणराजन्यात् । ५-३-११४ ॥

वाहीकगतायुधजीविसङ्घेभ्यः स्वार्थे ञ्यट् स्यात् । मालव्यः । मालव्यौ मालवाः । टित्त्वान्मालवी । ब्राह्मणवाचिभ्यो राजन्यशब्दाच्च न । शालङ्कायनाः । राजन्यः । राजन्यस्य ञ्यटि रूपभेदाभावेऽपि स्त्रियां ङीप् स्यादिति तन्निषेधः ।

१०३१. वृकाट्ठेण्यण् । ५-३-११५ ॥

आयुधजीविसङ्घात् वृकात्स्वार्थे ठेण्यण् । वार्केण्यः वार्केण्यौ वृकाः । टित्त्वात् ङीप् । वार्केणी ।

१०३२. दामन्यादित्रिगर्तषष्ठाच्छः । ५-३-११६ ॥

दामनिप्रभृतिभ्यस्त्रिगर्तषष्ठेभ्यश्च स्वार्थे छः स्यात् । दामनीयः । दामनयः । त्रिगर्तेषष्ठा इति षडायुधजीविसङ्घा उक्ताः । कौष्टुकीयाः । कौष्टुकयः ।

कौष्टुकिर्जालमानिश्च कौण्डोपरथिदाण्डकी ।
ब्रह्मगुप्तो जानकिश्च त्रिगर्तोऽमीषु जानकिः ॥

स षष्ठ एषां सङ्घानामिति व्याचष्ट वृत्तिकृत् ।
त्रिगर्तेष्वेव षष्ठांश एत इत्याह भोजराट् ॥

१०३३. पश्वादियौधेयादिभ्यामणञौ । ५-३-११७ ॥

